CC-0.In Public Domain. Digitization by eGangotri

अत एव कुमारीतन्त्रे–

आत्मविद्याशिवैस्तत्त्वैराचमेत् साधकाग्रणीः ।
सप्तच्छिद्राणि संरुद्ध्य ततो मज्जेत् त्रिधा सुधीः ।
वह्निजायां वदेत् तत्र शुद्धेन पयसा प्रिये ॥

अथः प्रयोगः– देवरूपमात्मानं विभावयन् तीर्थान्तिके गत्वा मूलेन मृत्तिकया अङ्गं विलेपनं विधाय स्वार्णरजतमुद्रारूपान् कुशादीन् संगृह्य सर्वं देवीरूपं विभाव्य मूलमुच्चरन् मलापकर्षणं स्नात्वा आचम्य ॐ अद्येत्यादि अमुकदेवतायाः प्रीतये मन्त्रस्नानमहं करिष्ये इति संकल्प्य त्रिकोणचक्रं विलिख्य गङ्गेत्यादि पुनः पठित्वा तीर्थमावाह्य सूर्यमण्डलादङ्कुशमुद्रया मूलान्तेनाचम्य आत्मतत्त्वाय स्वाहा विद्यातत्त्वाय स्वाहा शिवतत्त्वाय स्वाहा इति त्रिराचम्य, मूलेन त्रिः शरीरं संप्रोक्ष्य पुनर्मूलेन मृत्तिकया अङ्गानि विलिप्य तेन कुम्भमुद्रया मूर्ध्नि जलेनाभिषिञ्च्य अङ्गुलीभिः श्रवणादिसप्तछिद्राणि संरुध्य मूलविद्यया त्रिर्निमज्य तयैव त्रिराचमेत् ।

इति श्रीराघवभट्टविरचिते कालीतत्त्वे प्रातःस्नानप्रतिपादनन्नाम द्वितीयतत्त्वम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तृतीयतत्त्वम्

अथ सन्ध्याविधिरुच्यते

तदुक्तं कुमारीकल्पे –

प्रणवं पूर्वमुद्धृत्य मण्यन्ते धारिणीति च।
वज्रिणीतिपदं प्रोक्तं महाप्रतिसरे[४८] तथा॥
रक्षद्वयं ततो हुँ फट् स्वाहेति तदनन्तरम्।
अनेनैव तु मन्त्रेण रक्षां कुर्याद् विचक्षणः॥
पुनराचम्य विन्यस्य षडङ्गमपि मन्त्रवित्।
वामहस्ते जलं गृह्याङ्गुलितोदकबिन्दुभिः॥
सप्तधा प्रोक्षणं कृत्वा मूर्ध्नि मन्त्रं समुच्चरेत्[४९]।
अवशिष्टोदकं हस्ते दक्षिणे गृह्य बुद्धिमान्॥
इडयाकृष्य देहान्तः क्षालयेत्[५०] पापसञ्चयम्।
कृष्णवर्णं तदुदकं दक्षनासा विरेचनम्[५१]॥
दक्षहस्ते च तन्मन्त्री पापरूपं विचिन्त्य च।
पुरतो वज्रपाषाणे निक्षिपेदस्त्रमन्त्रतः॥

अत एव यामलेऽप्याह[५२]–

षडङ्गन्यासमाचार्य[५३] वामहस्ते जलं ततः।
गृहीत्वा दक्षिणेनैव सम्पुटं कारयेत् ततः॥
शिववायुजलं पृथ्वी वह्निबीजं[५४] त्रिधा पुनः।
अभिमन्त्र्य च मूलेन सप्तधा तत्त्वमुद्रया॥
निःक्षिपेत् तज्जलं मूर्ध्नि शेषं दक्षे निधाय[५५] च।
शरीरान्तः स्थितं पापं क्षालयेत् साधकाग्रणीः॥
मूलेन तिलकं कुर्यात् सन्ध्यैषैव हि कौलिकी।
उद्दिश्य कुलगं शिष्यं कथिता देवि सुन्दरि॥

अस्यार्थः–एषैव एवकारेण मिथो व्यवच्छेदोऽभिमतः सन्ध्यादीनाम्। तथा च शाक्तं वैदिकं वाभिधेयं न तु समुच्चयम्[५६]। न च-

---

४८ *वज्रिणीति च संप्रोच्य महाप्रतिसरे तथा- ख, ग।*
४९ *समुच्चरन्- ख, ग।*
५० *क्षालितम्- ख, ग।*
५१ *दक्षनासा विरेचितम्- ख, ग।*
५२ *अत एन यामलादिरप्याह- ख।*
५३ *मारच्य- ख, ग।*
५४ *वन्हिबीजैः- ख, ग।*
५५ *निधापयेत्- ख, ग।*
५६ *समुच्चये- ख।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

उक्तेनैव विधानेन स्नानं कृत्वा तु तान्त्रिकः ।
वैदिकं तान्त्रिकं सन्ध्यां कृत्वा तर्पणमाचरेत् ॥ इति शारदाटीकाविरोध इति वाच्यम् ।[५७]
कौलिकं कुर्वतः कर्म वैदिकं नाभिधीयते ।
वैदिकं कुर्वतः कर्म कौलिकं नाभिधीयते ॥

इत्यादियामलवृद्धवचनस्वरसेन अथेह मिथो निरपेक्षमेव कर्म इति । अथर्ववेदस्वरसेन तस्योक्तार्थपरत्वादिति । तथा च येषां यत्रेच्छा तैस्तत्कर्म कर्तव्यमिति साम्प्रदायिकाः । कुलीनं[५८] शिष्यमुद्दिश्य एषैव कथितेति वचनस्वरसेन कौलिकमित्यादिवचनस्वारसेन कौलिकं प्रति कौलिकं[५९] वैदिकं प्रति वैदिकं[६०] च सन्ध्येति निवर्गः ।

तन्त्रान्तरेऽपि–

दिनेशायोत्क्षिपेत् मन्त्री वारिणा चाञ्जलित्रयम् ।
अष्टोत्तरशतावृत्त्या गायत्रीं प्रजपेत् सुधीः ॥

अत एवाह कुमारीकल्पे[६१]–

कालिकायै ततः प्रोक्तं[६२] विद्महे श्मशानवासिनीम्[६३] ।
डेन्तां धीमहीति ततो चोदेत् तन्नो घोरः प्रचोदयात्[६४] ॥
अस्याः प्रसादमात्रेण महापातककोटयः ।
सद्यः प्रलयमायान्ति साधकस्य न चान्यथा ॥
रावणस्य वधाच्चैव रामचन्द्रो विमोचितः ।
गुरुदाराभिगमनाच्चन्द्रोऽपि हि विमोचितः ॥
निजकन्याकर्षणाच्च ब्रह्मा चैव विमोचितः[६५] ।
मातृवधात् परशुरामोऽपि मोचितोऽस्याः प्रसादतः ॥
सुरापानाच्च श्रीकृष्णो दत्तात्रेयस्तथैव च ।
एवमेषा महाविद्या गोप्तव्या देवि सुन्दरि ॥
महापातकयुक्तोऽपि प्रजपेत् दशधा यदि ।
सत्यं सत्यं महादेवि मुक्तो भवति तत्क्षणात् ॥

अथ प्रयोगः– ॐ मणिधरिणि वज्रिणि महाप्रतिसरे रक्ष रक्ष हुँ फट् स्वाहेति शिखाबन्धनं विधाय मूलेन <u>तिलकं कृत्वा षडङ्गं</u> विन्यस्य वामहस्तेन जलं संगृह्याङ्गुल्यन्तरगलदुदकबिन्दुभिः मूलमुच्चरन् मूर्ध्नि सप्तवारं[६६]

५७ *उक्तेनैवेत्येवकारेण वैदिकस्नानं व्यवच्छेदवत् वैदिकसन्ध्याव्यवच्छेदस्याभिप्रेतत्वात् । न च तान्त्रिकस्नानमुक्तेनैव विधानेन कुर्यादिति तदर्थत्वेनेतरव्यवच्छेदप्राप्तिरिति तद्विरोधस्तदवस्थ एवेति वाच्यम् । अधिकपाठ- ख, ग ।*
५८ *कुलगं- ख ।*
५९ *कौलिक्येव- ख ।*
६० *वैदिक्येव वा- ख ।*
६१ *अत एवाह मुत्तरीतन्त्रम्- ख ।*
६२ *प्रोक्तो- ख, ग ।*
६३ *विद्महे पदमुच्चरेत्- ख ।*
६४ *तन्नो घोरपदं प्रोच्य प्रचोदयात् पठेदिति- ख, ग ।*
६५ *अयं श्लोकः खगमातृकायां नास्ति ।*
६६ *सप्तधा- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

प्रोक्षणं कृत्वाऽवशिष्टजलं दक्षहस्ते संगृह्य दक्षनासाग्रमुपनीय इडया देहान्तर्वर्तिसमस्तपापमाकृष्य दक्षिणनासाग्रे धृत्वा तज्जलं कृष्णवर्णं विचिन्त्य पुरतो वज्रोपमं पाषाणं विभाव्य तदुपरि अस्त्रमन्त्रेण क्षिप्त्वा गायत्रीं दशधा अष्टोत्तरशतावृत्त्या वा प्रजप्य नमस्कुर्वन् सूर्यमण्डले विसर्जयेदिति[६७]।

इति राघवभट्टविरचिते कालीतत्त्वे सन्ध्याप्रतिपादनन्नाम तृतीयतत्त्वम्।

---

६७ *कालिकायै विद्महे श्मशानवासिन्यै धीमहि तन्नो घोरे प्रचोदयात् अधिक पाठः- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ चतुर्थतत्त्वम्

अथ तर्पणविधिरुच्यते

तदुक्तं यामलादौ[६८]–

तर्पणादौ प्रयुञ्जीत तृप्यन्तां ब्रह्मभैरव।
आवाहने स्वपितृन् भैरवानिति कीर्तयेत्॥
तत्र भैरवरूपेण देवीमपि च कालिकाम्।
तृप्यतां कालिके मातः पितरश्चैव तृप्यताम्॥
अनेनैव विधानेन यथा शक्त्या च तर्पयेत्।
मार्तण्डभैरवायेति त्रिधा चार्घ्यं प्रकल्पयेत्॥

चूडामणावप्याह[६९]–

नमः[७०] सूर्याय देवाय त्रिधा चार्घ्यं प्रकल्प्य च।
देवान् पितृन् ऋर्षींश्चैव तर्पयेत् कुलवारिणा॥

आवाहनेन आवाह्य इत्यर्थ। इदमुपलक्षणम्। तत्परिवारानित्यपि बोध्यम्। नीलतन्त्रेऽप्याह[७१]–

मूलान्तेन तर्पयामीति स्वाहान्तं तर्पणं मतम्।
एकं त्रिधा तर्पणन्तु कृत्वा पापक्षयो भवेत्॥
कुशीतमोभ्रपुष्पञ्च कुलपुष्पं कुशाञ्जलम्।
प्रस्तग्राही[७२] ताम्रपात्रे कृत्वा वार्घं[७३] निवेदयेत्॥

मूलाद्यन्तेनोद्यदादित्यमण्डलवर्तिन्यै शिवचैतन्यमय्यै स्वाहेति तन्मनुः स्मृतः। सूर्यार्घस्त्वावश्यकः।

अन्यथानिषेधात्। तदुक्तं नन्दिकेश्वरसंहितायाम्–

यावन्न दीयते चार्घ भास्कराय निवेदनम्।
तावन्न पूजयेद् विष्णुं शङ्करं वा सुरेश्वरीम्॥

अथ प्रयोगः– प्रथमं श्रीब्रह्मानन्दनाथभैरवस्तृप्यतामिति[७४] गुरून् तर्पयेत्। ततो निजगुरुं सन्तर्प्य असिताङ्गादीन् देवीर्भैरवादींश्च तर्पयेत्। ततो जले यन्त्रं विभाव्य देवीमावाह्य स्वाहान्तमूलान्ते महाकालसहिते अमुकदेवि मातस्तृप्यतामिति त्रिः सकृद्वा सन्तर्प्य सूर्यमण्डले देवीं विभाव्य पूर्ववदर्घं दत्त्वा मूलं गायत्रीं वा समुच्चार्य महाकालसहितायै अमुकदेव्यै इदमर्घं स्वाहेति अर्घं दत्त्वा देवीं गायत्रीं वा यथाशक्त्या प्रजप्य देवीदक्षहस्ते गुह्येत्यादिना मन्त्रेण जपं समर्प्य सूर्यमण्डले विसर्जयेदिति।

इति श्रीराघवभट्टविरचिते कालीतत्त्वे तर्पणविधौ चतुर्थतत्त्वम्[७५]।

---

६८ *जामलादौ- ख।*
६९ *चूडामणिरथाह- ख।*
७० *कुल- ख, ग।*
७१ *नीलतन्त्रमप्याह- ख, ग।*
७२ *प्रस्तगृही- ख।*
७३ *चार्घ्यं- ख, ग।*
७४ *त्रि सकृद्वा वा तथैव दीव्यसिद्धमानवौघान् तृप्यतामिति अधिक पाठः- ख, ग।*
७५ *इति राघवभट्टविरचितं कालीतर्पणन्नाम चतुर्थतन्त्रम्- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ पूजाविधिरुच्यते

उत्थाय कुलवस्त्रे द्वे परिधाय कुलेन च।
तिलकं कुलरूपञ्च कृत्वा वै च[७६]कुलेश्वरी[७७]॥
फलविशेषाकाङ्क्षिभिः वस्त्रविशेषपरिधानम्। तदुक्तं स्वतन्त्रे तन्त्रादौ–
मोक्षार्थी रक्तवस्त्रेण[७८] भोगार्थी श्वेतवाससा।
मारणे कृष्णवस्त्रे वै वश्ये रक्तं सदा गृही॥
उच्चाटे व्याघ्रचर्माणि वृक्षस्त्वक् स्तम्भकर्मणि।
परिधाय ततो मन्त्री यागभूमिमथाविशेत्॥
ततश्च साधकश्श्रेष्ठः हृदि मन्त्रं परामृशन्[७९]।
अबहिर्मानसो योगी यागभूमिमथाविशेत्॥[८०]
जलं शङ्खकरे धृत्वा गत्वा द्वारि महेश्वरि।
क्षालयेत् हस्तपादौ च तन्मन्त्रं वै समुच्चरन्॥
तदुक्तं कुमारीकल्पे[८१]-
ॐ वज्रोदक हुँ फट् स्वाहा इति मन्त्रेण मन्त्रवित्।
जलमानीय सव्येन आसनं शोधयेत् ततः॥
प्रणवं पूर्वमुद्धृत्य लज्जाबीजं तथैव च।
ततो विशुद्धान्ते सर्वपापानि शमयेदथ॥
अशेषास्ते[८२] विकल्पः स्यादपनयेति ततः परम्।
कूर्चबीजं भवेन्मन्त्रः पादप्रक्षालने प्रिये॥
वेदाद्यञ्च तथा माया स्वाहेत्याचमनं मतः[८३]।
तथा[८४]आचमनं कृत्वा सामान्यार्घं प्रकल्पयेत्॥
त्रिकोणवृत्तभूबिम्बं मण्डलं रचयेत् ततः।
आधारशक्तिं सम्पूज्य तदाधारं विनिक्षिपेत्॥
अस्त्रेण पात्रं संशोध्य[८५] हृदा मन्त्रेण पूरयेत्।

७६ चैव- ख, ग।
७७ कुलेश्वरी- ख।
७८ रक्तवस्त्रे द्वे- ख।
७९ मृशन् परा- क।
८० ततश्च साधकश्श्रेष्ठः हृदिमन्त्रं परामृशन्।
अबहिर्मानसो योगी यागभूमिमथाविशेत्॥ अयं पाठः ख, गमातृकायां नास्ति।
८१ तदुक्तं कुमारीकल्पे अयं पाठः कमातृकायां नास्ति।
८२ अशेषान्ते- ख।
८३ मतम्- ख, ग।
८४ ततः- ख, ग।
८५ विशोध्य- ख, ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

निःक्षिपेत् तीर्थमावाह्य गन्धादीन् प्रणवेन तु ॥
दर्शयेद्धेनुमुद्रां वै सामान्यार्घ्यमिदं मतम्[८६] ।
सामान्यार्घ्येण देवेशि पूजयेद् द्वारपार्श्वयोः ॥
गणेशं क्षेत्रपालञ्च वटुकं योगिनीं तथा ।
गङ्गाञ्च यमुनाञ्चैव लक्ष्मीं वाणीं ततो विशेत् ॥
अन्यत्रापि–
गां बीजाद्यं गणेशञ्च वामाद्यं वटुकं तथा ।
क्षामाद्यं क्षेत्रपालञ्च यामाद्यां योगिनीं तथा ।
ऊर्ध्वं वामे दक्षिणे च अधश्चैव यथाक्रमात् ॥
ततो गृहं प्रविश्य मन्त्री भूतोपसारणं कुर्यात् । तदुक्तं स्वातन्त्रतन्त्रे-
भूमिव्योमस्थितान् सर्वान् विघ्नान् महाक्षतान्वितैः ।
सिद्धार्थैस्तिलसंघातैः प्रोत्सार्य चासनं विशेत् ॥
अन्यत्रापि–
भूतापसारणं कुर्यान्मन्त्रेणानेन साधकः ।
यस्मिन् कृते स्थिता भूता दूरं यान्ति शिवार्चने ॥
स्थितेषु तत्र भूतेषु नैवेद्यं मण्डलन्तथा ।
लुम्पन्ति हि तथा लुब्धा न नन्दति[८७] च देवता ।
तस्माद्यत्नेन कर्तव्यं भूतानामपसारणम् ॥
अत एव कुमारीकल्पेऽप्युक्तम्–
प्रणवं पूर्वमुद्धृत्य सर्वविघ्नांस्ततः परम् ।
उत्सादयेत् हुँ फट् स्वाहा च तदनन्तरम्[८८] ॥
अनेनैव च मन्त्रेण विघ्नान्नुत्सारयेत् सुधीः ।
प्रणवं पूर्वमुद्धृत्य रक्ष रक्ष तदनन्तरम् ॥
हुँ फट् स्वाहेति मन्त्रेण भूमिं च परिशोधयेत्[८९] ।
ततः पवित्र वज्रादौ[९०] प्रणवं पूर्वमुद्धरेत् ॥
वर्मद्वयमतश्चैव[९१] फट् स्वाहा तदनन्तरम् ।
अनेनैव तु मन्त्रेण कुर्यात् तस्याभिमन्त्रणम् ॥[९२]
ततः आसनस्थापनं कुर्यात् । तदुक्तं स्वातन्त्रतन्त्रे–

८६ *स्मृतम्- ख,* ।
८७ *न गृह्णन्ति- ख, ग ।*
८८ *रक्ष रक्ष- ख, ग ।*
८९ *भूमीः परिशोधयेत्- ख, ग ।*
९० *पवित्रवज्रभूम्यादौ- ख ।*
९१ *वर्णद्वयततश्चैव- ख, ग ।*
९२ *भूम्यभिमन्त्रणम्- ख, ग । ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

भूमौ त्रिकोणमालिख्याधारशक्ति[९३]प्रपूजनम् ।
मेरुपृष्ठऋषिः प्रोक्तः सुतलं छन्द ईरितम् ॥
कूर्मो देवता देवि चासनोपवेशने प्रिये ।
विनियोगश्च कथितः पठेत् धृत्वासनं ततः ॥
पृथ्वी त्वया धृतालोक देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्[९४] ॥
धृत्वा च देवेशि कुशान्तत्रैव दापयेत् सुधीः ।
मायाबीजं समुच्चार्य अधारशक्तये तथा ।
कमलासनमुच्चार्य[९५]ॐनमोऽन्तं[९६] प्रपूजयेत् ॥
कुमारीकल्पेऽप्युक्तम् ।
आकारान्ते सुरेखे च वज्ररेखे ततः परम् ।
हुँ फट् स्वाहेति[९७]ब्रूयात् मण्डलन्तु शवासने ॥
वीरासनेनोपविशेत् सम्पूज्यासनमेव च ।
एवं विधानतो देवि संस्थाप्यासनमेव च[९८] ।
तत्रोपविश्य विधिना[९९] भक्ष्यद्रव्यं तु हेतुकम् ॥
तदुक्तं भावचूडामणौ–
विना हेतुकमास्वाद्य क्षोभयुक्ता महेश्वरी ।
न पूजामनशं कुर्यात्[१००] न ध्यानं न तु चिन्तनम् ।
तस्माद् भुक्त्वा च पीत्वा च पूजयेत् परमेश्वरीम् ॥
विजयाकल्पेऽप्युक्तम्–
सविदासवयोर्मध्ये[१०१] संविदेव गरीयसी ।
संवित्प्रयोगे[१०२]तेनेह पूजादौ साधकोत्तमैः[१०३] ।
कर्तव्यञ्च[१०४] महापूजा करणीया सुनन्दितैः ॥
यामलादौ च–

---

९३ *धारशक्त्यादिपूजनम्- ख, ग ।*
९४ *पवित्रं चासनं कुरू- ख,ग ।*
९५ *कमलासनमालिख्य-ख*
९६ *ङेन्ततश्च प्रजयेत्- ख, ग ।*
९७ *स्वाहेति कुर्यात्तु- ख,ग ।*
९८ *सन्तोष्यासनमेव च- ख, ग ।*
९९ *विधानेन भक्षे द्रव्यन्तु हेतुकम्- ख, ग ।*
१०० *न पूजां मम सङ्कुर्यात्- ख,ग ।*
१०१ *संविदानन्दयोः- ख, ग ।*
१०२ *प्रयोगस्तेनेह- ख, ग ।*
१०३ *साधकोत्तमः- ख, ग ।*
१०४ *कर्तव्या च- ख ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

आनन्देन विना द्रङ्गो[१०५] न च तृप्यन्ति देवता । इति ।

CC-0. In Public Domain. Digitization by eGangotri

ततः शुद्धितत्त्वे विवेचयिष्ये

ततः पूजोपकरणानि स्वस्वस्थानेषु संस्थाप्य शोधयेत् ।

तदुक्तं कुलचूडामणौ –

नानाविधानि पुष्पाणि गन्धानि विविधानि च ।

कर्पूरीजातिधूपादिवासितं पट्टवासितम् ॥

ताम्बूलादीनि द्रव्याणि[१०६] धूपदीपादिकं ततः ।

सर्वालङ्कारभूषादिभूषितं कौलिकेश्वरि ॥

मूलमन्त्रं जपन् तोयैः प्रोक्षितैः[१०७] स्थापयेत् ततः ।

सर्व स्वदक्षिणे स्थाप्य वामे चार्घ्यं निवेदयेत् ।

पश्चिमे देवतायाश्च कुलद्रव्याणि धारयेत् ॥

कालिकापुराणेऽपि–

मदिरां पृष्ठतो दद्यात् अन्यपानन्तु वामतः[१०८] ।

पुष्पशोधनमन्त्रान्तरमप्युक्तम्–

प्रणवं पुष्पकेतुश्च तथा राजार्हतेऽपि च ।

शताश्वसम्यगित्युक्त्वा सम्बुद्धाय ततः परम्[१०९] ॥

पुष्पे पुष्पे महापुष्पे सपुष्पे[११०] पुष्पसम्भवे ।

पुष्पे च स्वावकीर्णे तु हुँ फट् स्वाहा तदन्तरम्[१११] ॥

मनुनानेन देव्यास्तु पुष्पशुद्धिमथाचरेत् ।

प्रणवं पूर्वमुद्धृत्य तदनन्तरमेव च ॥

हुँ फट् स्वाहा मनुः प्रोक्तः कायवाक्चित्तशोधने ।

रक्षद्वयं हुँ फट् स्वाहा मन्त्र आत्मरक्षणे ॥

स्वतन्त्रतन्त्रे–

पार्ष्णिघातकरस्फोटतर्जन्यङ्गुष्ठमध्यमम् ।

तालत्रयमथो दद्यात् सशब्दं संप्रदायतः ॥

धातुरन्ध्रनेत्रवसुरसैर्वेदाधिकैःप्रिये ।

मात्राभिः प्रणवं जप्त्वा पूरयेत् कुम्भरेचकैः[११२] ।

---

१०५ भ्रंशो- ख ।

१०६ ताम्बुलदेयद्रव्याणि- ख ।

१०७ प्रजप्तैश्च प्रोक्षितं- ख, ग ।

१०८ पृष्ठतः- ग ।

१०९ गतायसम्यगित्युक्त्वा सम्बुद्धाय ततश्च तु- ख,ग ।

११० सुपुष्पे- ख ।

१११ पुष्पावचयकीर्णे च तदनन्तरम्- ख, ग ।

११२ पूररेचककुम्भकैः- ख,ग ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

प्राणायामं ततः कृत्वा भूतशुद्धिमथाचरेत् ॥

अन्यत्राप्युक्तम्–

मनो जीवात्मनः शुद्धिः प्राणायामेन जायते ।

कालीक्रमेऽप्युक्तम्–

प्राणायामत्रयं कुर्यात् मूलेन प्रणवेन च[११३] ॥

ज्ञानार्णवेऽपि–

कनिष्ठानामिकाङ्गुष्ठैः यन्नासापुटधारणम् ।

प्राणायामः स विज्ञेयः तर्जनीमध्यमां[११४]विना ॥

स्वतन्त्रतन्त्रेऽपि–

संहारक्रमयोगेन पञ्चतत्त्वं समुद्धरेत् ।

शोषदाहप्लवान् कृत्वा[११५]वाय्वग्निसलिलाक्षरैः ।

ततो न्यासं प्रकुर्वीत फेत्कारीतन्त्र ईरितम् ॥

अन्यत्रापि–

देवीरूपं ततो ध्यायेदात्मानं कमलेक्षणे ।

ततो जीवं प्रविन्यस्य पाशादित्र्यक्षरेण तु ॥

प्राणमन्त्रेण उक्तेन ततोऽमुष्याः पदं वदेत् ।

प्राण इह वदेत्पश्चात् इह प्राणस्ततः परम् ॥

अमुष्या जीव इह स्थितो अमुष्याश्च पदं ततः ।

सर्वेन्द्रियाण्यमुष्या (?) वाङ्मनोनयनादतः[११६] ।

श्रोत्रघ्राणपदात्प्राणा इहागत्य सुखं चिरम् ।

वह्निजाया ततः प्राणमन्त्रोऽयं समुदीरितः[११७] ॥

अमुष्याः स्थाने साध्यदेवतायाः षष्ठ्यन्तं नाम देयमिति भावः ।

तदुक्तं यामलादौ–

अमुकपदं यद्रूपं यन्त्रमन्त्रेषु दृश्यते ।

साध्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत् ॥

कुमारीकल्पेऽप्युक्तम्[११८] –

कालिकातन्त्रेऽपि–

भैरवोऽस्य ऋषिः प्रोक्तः उष्णिक् छन्द उदाहृतम् ।

देवता श्यामला प्रोक्ता लज्जाबीजन्तु बीजकम् ॥

११३ वा- ख, ग ।

११४ तर्जनीमध्यमे विना- ख, ग ।

११५ शोषदाहप्लवं कृत्वा- ख, ग ।

११६ वाङ्मनोनयनात् ततः- ख, ग ।

११७ तिष्ठन्तु वह्निजयायान्तः प्राणमन्त्रोऽयमीरितः- ख, ग ।

११८ भूतशुद्धिं विधायैवं देवीरूपेण चिन्तयेत् । जीवन्यासं ततः कुर्याद् आत्मनि देवीं चिन्तयेत् ॥ अधिकपाठः- ख, गमातृकायाम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

शक्तिस्तु कूर्चबीजं स्यादनिरुद्धसरस्वती।
CC-0.In Public Domain. Digitization by eGangotri
कवित्वार्थे विनियोगः स्यादेवं ऋष्यादिकल्पना।
अनिरुद्धसरस्वतीति प्रथमं बीजं कीलकमित्यर्थः॥

कवित्वेऽप्युपलक्षणम्। अभिमतार्थ इत्यपि बोद्धव्यम्[११९]।

अत एव कालीक्रमे[१२०]

कीलकं चाद्यबीजं तु चतुर्वर्गार्थसिद्धये।

कुलचूडामणावप्याह[१२१]–

भैरवोऽस्य ऋषिः प्रोक्तः उष्णिक्छन्द उदाहृतम्।
श्यामला दक्षिणा काली[१२२] चतुवर्गफलप्रदा॥

तन्त्रान्तरेऽपि–

ऋषिं न्यसेद् मूर्द्धिन देशे छन्दस्तु मुखपङ्कजे।
देवता[१२३] हृदये चैव बीजं गुह्यन्तु देशके[१२४]।
शक्तिस्तु पादयोश्चैव कीलकं सर्वाङ्गके[१२५]न्यसेत्॥

ततः कराङ्गन्यासौ कुर्यात्। तदुक्तं कालीतन्त्रे–

अङ्गन्यासकरन्यासौ यथाविधि विधीयते[१२६]।
षड्दीर्घभाजबीजेन प्रणवाद्येन कल्पयेत्॥
हृदयाय नमः प्रोक्तं शिरसे वन्ह्विवल्लभा।
शिखायै वषडित्युक्तं कवचायहुमीरितम्।
नेत्रत्रयाय वौषट् स्यादस्त्राय फट् प्रकीर्तितम्॥

बीजमाद्यबीजं तत्र[१२७]पारिभाषितम्। तन्त्रान्तरे विबोधादिति भावः।

अत एव वीरतन्त्रेऽप्युक्तम्–

दीर्घषट्स्वरभाजाद्येन प्रणवाद्येन कल्पयेत्।

स्वतन्त्रेऽपि–

प्रणवं चाद्यबीजन्तु षड्दीर्घस्वरभाजितम्।
कुर्यात् षडङ्गविन्यासं मूलखण्डत्रयेण वा॥

भैरवतन्त्रे च–

---

११९ बोध्यम्- ख, ग।
१२० अत एवाह कालिकाक्रमः- ख, ग।
१२१ कुलचूडामणिरप्याह- ख, ग।
१२२ देवी- ख, ग।
१२३ देवतां- ख, ग।
१२४ गुह्ये च देशके- ख, ग।
१२५ सर्वाङ्गे- ख, ग।
१२६ यथावदभिधीयते- ख, ग।
१२७ तत्तु- ख, ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

षडङ्गानि न्यसेन्मन्त्री त्रिः सकृद्वा यथाक्रमम् ।

ततो वर्णन्यासं कुर्यात् । तदुक्तं कालीतन्त्रे–

एवं यथाविधिं कृत्वा वर्णन्यासं समाचरेत् ।

अ आ इ ई उ ऊ ऋ ॠ लृ वै हृदयाय[१२८]नमः ॥

ए ऐ ओ औ,ततो अं अः[१२९] क ख ग घ तथा पुनः ।

उच्चार्य दक्षिणं हस्तं[१३०] न्यसेत् साधकसत्तमः ॥

ङ च छ ज झ ञ ट ठ ड ढ तथा पुनः ।

इति वामभुजे न्यस्य ण त थ द ध पुनः न्यसेत्[१३१] ॥

न प फ ब भ इति च दक्षिणे जङ्घे[१३२]न्यसेत् ।

म य व र ल श ष स ह क्ष वामजङ्घके न्यसेत् ॥

ततो मातृकाश्रीकण्ठादिन्यासौ कुर्यात् ।

तदुक्तं स्वतन्त्रतन्त्रे–

आदौ च मातृकान्यासस्ततः श्रीकण्ठ उच्यते ।

ऋषिर्ब्रह्मा भवेत् छन्दो गायत्री मातृका पुनः ॥

दैवतं[१३३]व्यञ्जनबीजं शक्तयस्तु स्वरा अमी ।

अव्यक्तं कीलकं ज्ञेयं न्यसेदुक्तक्रमेण तु ॥[१३४]

उक्तक्रमेणेति । ऋष्यादिन्यासबिन्दुकं क्रमेण इत्यर्थः[१३५] ।

षडङ्गं मातृकायास्तु कारयेत् साधकोत्तमः ।

स्वराणां क्लीबहीनानां सबिन्दूनां क्रमेण तु ॥

युग्मं युग्मान्तरेणैव पञ्चवर्गसबिन्दुकम् ।

निःक्षिपेद्यादिवर्गन्तु शेषवर्णान्तरालके ॥

क्लीबहीनानामिति[१३६]ऋ ॠ लृ लृ रहितानामित्यर्थः । युग्मयुग्मन्तरालेति– अँ कँ खँ गँ घँ ङँ आँ हृदयाय नमः । इँ चँ छँ जँ झँ ञँ ईं । उँ टँ ठँ डँ ढँ णँ ऊँ । एँ तँ थँ दँ धँ नँ ऐँ, ओँ पँ फँ बँ भँ मँ औँ अँ यँ रँ लँ वँ शँ षँ सँ हँ क्षँ अः इति क्रमेण पूर्वोक्तषडङ्गन्यासक्रमेणेत्यर्थः । अथवा क्रमेति प्रथमस्वरयुग्मान्तराले प्रथमवर्गः,

---

१२८ हृदये न्यसेत्- ख, ग।
१२९ औ- ख।
१३० दक्षिणे हस्तौ न्यसेत्- ख, ग।
१३१ स्मरेत्- ख, ग।
१३२ जङ्घके न्यसेत्- ख।
१३३ देवता- ख, ग।
१३४ अव्यक्तं ध्वन्यात्मकः शब्दः अधिकपाठः- ख, ग ।
१३५ पूर्वोक्तक्रमेणेति ऋष्यादिन्यासक्रमेणेत्यर्थ- ख, ग।
१३६ रु रु अधिकपाठः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

एवम् द्वितीयस्वरद्वितीयवर्ग[१३७], तृतीयस्वरतृतीयवर्गः, चतुर्थस्वरचतुर्थवर्गः, एवं पञ्चमस्वरपञ्चमवर्गः, अँ अः तयोर्मध्ये यादिवर्गः प्रकर्तव्यः[१३८]। प्रक्षेतव्यः इति क्रमेणेत्यर्थः। एवम् षडङ्गं विन्यस्य तां ध्यायेत्।

CC-0. In Public Domain. Digitization by eGangotri

सम्पूर्णेन्दुप्रशुभ्रां सकललिपिमयीं लोलवक्त्रां त्रिनेत्रां।
शुक्लालङ्कारभूषां शशिमुकुटजटाजूटयुक्तां प्रसन्नाम्।
पुस्तस्रक्पूर्णकुम्भां सृणिमपि दधतीं[१३९] शुक्लपट्टाम्बराढ्याम्।
वाग्देवीं पद्मवक्त्रां स्तनभरनमितां चिन्तयेत् साधकेन्द्रः॥

एवं ध्यात्वा ललाटादिक्रमेण अकारादिक्रमेण क्षकारान्तान् न्यसेत्।

तदुक्तम्–

ललाटे[१४०]मुखवृत्ताक्षिश्रुतिघ्राणेषु गण्डयोः।
ओष्ठदन्तोत्तमाङ्गास्यदोपत्सन्ध्यग्रकेषु च॥
पार्श्वयोः पृष्ठतो नाभौ हृदये जठरांशके।
ककुद्यंशे च हृत्पूर्वपाणिपादेषु यत्नतः॥
जठरानलयोर्न्यस्य मातृकाणां यथाक्रमम्[१४१]।
ललाटेऽनामिकामध्ये विन्यस्य मुखवृत्तके॥
तर्जनीमध्यमानामा न्यसनीया पुनर्बुधैः।
तर्जन्यनामिकादेस्तु विन्यसेच्चैव नेत्रयोः[१४२]॥
अङ्गुष्ठकर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठौ नसोर्न्यसेत्।
मध्यमाङ्गण्डयोर्न्यस्य मध्यमामयोष्ठयोर्न्यसेत्॥
अनामादन्तयोर्न्यस्य मध्यमामुत्तमाङ्गके।
मुखेऽनामामध्यमां तु हस्तपादे च पार्श्वयोः॥
कनिष्ठकानामिकामध्यसर्वाभिः पृष्ठतो न्यसेत्।
तामङ्गुष्ठानाभिदेशे सर्वकुक्षौ च विन्यसेत्[१४३]॥
हृदये च सर्वमंशयोश्च ककुस्थल एव च।
हृत्पूर्वहस्तपत्कुक्षिमुखेषु स्थलमेव च॥
एतास्तु मातृकामुद्राः क्रमेणैव प्रकीर्तिताः।
अज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात्तस्य निष्फलः॥

---

१३७ *द्वितीयस्वरयुग्मान्तराले द्वितीयवर्गः:, एवञ्च तृतीयस्वरयुग्मान्तराले तृतीयवर्गः, एवम् चतुर्थस्वरयुग्मान्तराले चतुर्थः, एवं पञ्चमस्वर युग्मान्तराले पञ्चमः, एवम् अंअयोर्मध्ये यादिवर्गःप्रक्षेतव्यः- ख, ग।*

१३८ *प्रक्षेतव्यः- ख।*

१३९ *वरमपिदधती- ख, ग ।*

१४० *ललाटे- ख।*

१४१ *मातृकार्णाननुक्रमात्- अनामामध्यमाभ्यां तु ललाटे विन्यस्येद् बुधः। मुखवृत्तेर्विन्यसेत्तु कनिष्ठावर्जितैस्त्रिभिः॥ अधिकपाठः- ख, गमातृकायाम्।*

१४२ *तर्जन्यनामिका देवी न्यसेच्चैव तु नेत्रयोः- ख, ग।*

१४३ *ताः साङ्गुष्ठानाभिदेशे सर्वाः कुक्षौ च- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ततः श्रीकण्ठन्यासं कुर्यात् । तदुक्तं कालिकाक्रमे–

विन्यसेन्मातृकास्थाने श्रीकण्ठादीन् यथाक्रमम्[१४४]।
पूर्णोदर्यादिभिः सार्द्धं मातृकार्णसमन्वितम् ॥
श्रीकण्ठानन्तसूक्ष्मौ च त्रिमूर्तिरपरेश्वरः ।
अर्घीशो[१४५] भारभूतिश्चातिथीशस्थाणुको हरः ॥
झिण्टीशो भूतिकः सद्योजातश्चानुग्रहेश्वरः ।
अक्रूरश्च महेशान एते वै सुरमूर्तयः[१४६] ॥
पश्चात्क्रोधीशचण्डीश पञ्चान्तकशिवोत्तमाः ।
अथैकरुद्रेशकूर्मैकनेत्रेशचतुराननः ॥
अजेशसर्वसोमेशास्तथा लाङ्गुलीदारुकौ ।
अर्द्धनारीश्वरश्चोमाकान्तश्चाषाढिदण्डिनौ ॥
स्युरत्रिमीनमेषाख्या लोहितासंवर्तिकास्मृताः ।[१४७]
एते रुद्राः स्मृता वक्त्रा धृतशूलकपालिकाः[१४८] ॥
पूर्णोदरी स्याद्विजया[१४९] शाल्मलीतदनन्तरम् ।
लोलाक्षी वकुलाक्षी[१५०]च दीर्घघोणा समीरिता ॥
सुदीर्घमुखिगोमुख्यौ दीर्घजिह्वा तथैव च ।
चण्डोदर्युर्ध्वकेशी च तथाविकृतमुख्यपि ॥
ज्वालामुखी समाज्ञेया[१५१]पश्चादुल्कामुखी ततः ।
सुश्रीमुखी च विद्याख्याः मुख्यैताः सुरशक्तयः ॥
महाकालीसरस्वत्यौ सर्वसिद्धिसमन्वितौ[१५२] ।
गौरीत्रैलोक्यवन्द्या[१५३] स्यान्मन्त्रशक्तिस्ततः परम् ॥
आत्मशक्तिर्भूतमाता तथा लम्बोदरी मता ।
रावणी[१५४]नागरी ज्ञेया खेचरी चैव मञ्जरी ॥
रूपिणी विरणी पश्चात् काकोदर्यपि पूतना ।

---

१४४ अत्र श्रीकण्ठादीनित्यादिशब्देन गूढाङ्गषोढाङ्गन्यासौ ग्राह्यौ । यद्वा अनन्तादयो ग्राह्याः-अधिक पाठः- ख, गमातृकायाम् ।

१४५ अधिशो- ख ।

१४६ स्वरमूर्तयः- ख, ग ।

१४७ लोहितश्चाशिषी तथा । छगलण्डद्विरेण्डेशौ स महाकालवादिनौ । भुजङ्गेशपिनाकीशखड्गीशाख्या बकेश्वरः श्वेतभृग्वीशलकुली शिवाःसंवर्तकास्तथा- अधिकपाठः- ख, गमातृकायाम् ।

१४८ धृतश्चलकपालकाः- ख, ग ।

१४९ स्याद्विरजा- ख ।

१५० वर्तुलाक्षी- ख, ग ।

१५१ ततो ज्ञेया- ख ।

१५२ सर्वसिद्धिसमन्विते- ख, ग ।

१५३ विद्या- ख, ग ।

१५४ द्रावणी- ख, ग ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

स्याद्भद्रकालीयोगिन्यौ शङ्खिनी गर्जिनी[155] तथा ॥
CC-0. In Public Domain. Digitization by eGangotri
कालरात्रिकुब्जिन्यौ च कपर्दिन्यपि वज्रिणी ।
जया च सुमुखेशी च रेवती माधवी ततः ॥
वारुणी वायवी प्रोक्ता पश्चाद्रक्षोविदारिणी ।
ततश्च सहजा लक्ष्मीर्व्यापिनी माययान्विता ॥
एता रुद्राङ्कपीठस्थाः सिन्दुरारुणविग्रहाः ।
रक्तोत्पलकपालाख्या अलंकृतकराम्बुजाः ॥

ततोऽन्तःषोढा न्यसेत् । तदुक्तं वीरतन्त्रे–

केवलां मातृकां कृत्वा मातृकान्तरसम्पुटाम् ।
मातृकां पुटितं तारं न्यसेत् साधकसत्तमः ॥
एवं कामपुटं तारं कामं च तारसम्पुटम्[156] ।
शक्त्या च पुटितं तारं शक्तितारपुटं न्यसेत्[157] ॥
हीँ हँा कँ हँा क्लं[158] सोक्तमन्त्रेण पुटितं पुनः ।
तैस्तैस्तथा च मन्त्रेण[159] पुटितं विन्यसेद् बुधः ॥
अनुलोमविलोमेन मन्त्रकेवलमेव तु ।
विन्यस्य मातृकास्थाने व्याप्तमष्टोत्तरशतम् ॥
इति गुप्तेन[160] दुर्गायाः अङ्गे षोढा[161]प्रकीर्तिताः ।
तारायाः कालिकायाश्च उन्मुख्याश्च[162]तथापराः ॥
कृतेऽस्मिन् न्यासवर्ये तु सर्वपापं प्रणश्यति ।
अल्पमृत्युहरा[163] नूनं रोगशोकविनाशिकाः[164] ॥
दुष्टसत्त्वानि नश्यन्ति शत्रवो यान्ति मित्रताम् ।
वाणी तस्य मुखस्था च द्राक्षारसपरस्परा ॥
अणिमाद्यष्टसिद्धिस्तु तस्य हस्ते व्यवस्थिता ।
कायिकं वाचिकं वापि मानसं वापि यत्कृतम् ॥
सर्वं तस्य विनाशं तु याति न्यासस्य चिन्तनात् ।

---

१५५ *गर्जनी- ख, ग ।*
१५६ *एवं कामसंपुटितारं कामं च तारसम्पुटम्- ख, ग ।*
१५७ *शक्तिपुटितं तारं शक्तितारं पुटितां न्यसेत्- ख, ग ।*
१५८ *ह्रीं ह्राँ ऋँ ऋृं तृँ- ख, ग ।*
१५९ *तैस्ते तथा च मन्त्रं वै- ख, ग ।*
१६० *गुह्येन- ख, ग ।*
१६१ *अङ्गषोढाः- ख, ग ।*
१६२ *तुन्मुख्य- ख ।*
१६३ *अपमृत्युहरा- ख, अल्पमृत्युहरम्- ग ।*
१६४ *विनाशकम्- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

ब्रह्महत्या क्षयं यान्ति यत्किञ्चिदुपपातकम् ॥
यद्रूपं दृश्यते सोऽपि सतद्रूपञ्च गच्छति[१६५] **।**
यं नमन्ति महादेवि षोढा पुटितविग्रहाः ।
अल्पायुष्यं भवेत् सद्यो देवता कम्पते भयात् ॥
ततस्तत्त्वन्यासं कुर्यात् । तदुक्तं स्वतन्त्रतन्त्रे–
आत्मविद्याशिवैस्तत्त्वैस्तत्त्वन्यासं समाचरेत् ।
ततो बीजन्यासं कुर्यात् । तदुक्तं कालीकल्पे[१६६]–
ब्रह्मरन्ध्रे भ्रुवोर्मध्ये ललाटे नाभिदेशके ।
गुह्ये चक्रे च सर्वाङ्गे सप्तबीजानि विन्यसेत् ॥
ततो व्यापकन्यासं कुर्यात्[१६७] ।
पञ्चधा नवधा वापि मूलेन सप्तधा तथा ॥
स्वतन्त्रतन्त्रेऽप्युक्तम् –
मूलेन व्यापकं न्यासं नवधा कारयेत् प्रिये ॥
इति न्यासजालं विधाय चक्रराजं न्यसेत् । तदुक्तम्–
एवं विन्यस्तहस्तेन चक्रराजं समालिखेत् ।
स्वर्णे वा राजते ताम्रे पाषाणे चाष्टधातुके ॥
स्वयम्भूकुसुमं कुण्डगोलोत्थं रोचनागुरुम् ।
कस्तुरीमृगनाभिं[१६८]**च कुलकमलयोद्भवम् ॥**
एष गन्धः समाख्यातः सर्वदा चण्डिकाप्रियः ।
एतेन गन्धयोगेन योनिचक्रं समालिखेत् ।
योनिद्वयं ततः कुर्यात् षट्कोणमालिखेद् बहिः ॥
कालीतन्त्रे च–
आदौ त्रिकोणं विन्यस्य त्रिकोणं तद् बहिर्न्यसेत् ।
ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम् ॥
ततो वृत्तं समालिखेदष्टदलं ततः परम् ।
वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककम् ॥
नीलतन्त्रेऽप्युक्तम्–
पञ्चशक्तिं समालिख्य अधोवक्त्रां सुलक्षणाम् ।
ज्ञात्वैव मुक्तिमाप्नोति यन्त्रराजं न संशयः ॥
एतत्तु विलिखेत् ताम्रे कुण्डगोलविलेपिते ।

---

१६५ *तद्रूपं चाभिगच्छति- ग ।*
१६६ *कुमारीकल्पे- ग ।*
१६७ *तदुक्तं भैरवतन्त्रे गमातृकायां अधिकपाठः ।*
१६८ *काश्मीरमृगनाभि च- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

स्वयम्भूकुसुमैर्यन्त्रे कुंकुमागरुसेविते ॥
CC-0.In Public Domain. Digitization by eGangotri
एवं पीठं निर्माय स्त्रीवेशधारी सन् पीठपूजां[१६९] कुर्यात् । तदुक्तं कुमारीकल्पे–

ततः स्त्रीवेशधारी स्यात् सिन्दूराकृतभालकः[१७०].
श्रृङ्गारोत्कटवेशाख्यस्ताम्बूलपूरिताननः ॥
पीठन्यासं ततः कुर्याद् आधारशक्तिपूर्वकम् ।
प्रकृतिं कमठञ्चैव शेषं पृथ्वी तथा पुनः ॥
सुधाम्बुधिमणिदीपं चिन्तामणिगृहं[१७१]तथा ।
शयनं[१७२]पारिजातञ्च तन्मूले रत्नवेदिकाम् ॥
तस्योपरि[१७३] मणेः पीठं न्यसेत् साधकसत्तमः ।
चतुर्दिक्षु मुनीन् देवान् शवाँश्च शवमुण्डकान् ॥
अधर्मांश्चैव धर्मांश्च[१७४] पादगात्रचतुष्टये ।
हृदि शेषं तथा पद्मं सूर्यसोमौ महेश्वरि[१७५] ॥
वैश्वानरन्तथा सत्त्वं रजश्चैव तमस्तथा ।
आत्मानं चैव विन्यस्य शक्तिरष्टदले न्यसेत् ॥
इच्छाज्ञानक्रिया चैव कामिनी कामदायिनी ।
रतिरतिप्रियानन्दा कर्णिका यामलात्मना[१७६] ॥
वाग्भवं[१७७]प्रथमञ्चोक्त्वा परायै तदनन्तरम् ।
अपरायै परापरायै ह्यौर्वायै[१७८] यतः परम् ॥
सदाशिवमहाप्रेतं दन्तं पद्मासनं ततः[१७९] ।
नम इत्येव मन्त्रोऽयं पीठन्याससमुदाहृतः ॥

इति पीठं पूजयित्वा घटं स्थापयेत् ।[१८०]

कलां कलां गृहीत्वा तु देवानां विश्वकर्मणा ।
निर्मितोऽयं सुभैर्यत्नात्[१८१]कलशस्तेन उच्यते ॥

---

१६९ पूजादिकं- ख, ग ।
१७० सिन्दुराङ्कत- ख ।
१७१ दीपचिन्तामणि- ख ।
१७२ श्मशानं- ख ।
१७३ तल्पोपरि- ग ।
१७४ धर्मांश्चैवप्यधर्मांश्च- ख, ग ।
१७५ महेश्वरी- ख, ग ।
१७६ यामनोन्मनी- ख, ग ।
१७७ भाग्भवं- ख ।
१७८ ह्मौर्वाच्यमतः परम्- ग ।
१७९ उक्तं पद्मासनं नमः- ख, ग ।
१८० तदुक्तं स्वतन्त्रतन्त्रे अधिकपाठः- ग ।
१८१ सुरैर्यस्मात्- ख, ग ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सौवर्णं राजतं वापि मार्त्तिकं[१८२]कांस्यकान्वितम् ।
क्षालयेदस्त्रमन्त्रेण कुम्भं सम्यक् सुरेश्वरि ॥
ततस्तु कारणं[१८३] दिव्यं समानीय घटस्थितम् ।
वेष्टितं रक्तवस्त्रेण रक्तमाल्येन भूषितम् ॥
वामभागे महेशानि मण्डलं चतुरस्रकम् ।
तत्र संस्थापयेद् भक्त्या देवीबुद्ध्या वरानने ।
मण्डले कलशे द्रव्ये वह्न्यर्कशशिमण्डलम् ॥

इति द्रव्यमिति च शुद्धितत्त्वोक्तप्रकारेण संशोधितं कुर्यादिति ॥
भावचूडामणावप्युक्तम् –

स्ववामभागे षट्कोणं तन्मध्ये ब्रह्मरन्ध्रकम् ।
लिखित्वा तत्र कुम्भं वै सौवर्णं राजतं तथा ॥
ताम्रं भूमिमयं वापि यद्वा लोहविवर्जितम् ।
आधारे स्थापयदे् यन्त्रं सौवर्णं वापि राजतम् ॥
सौवर्णं भोगदं प्रोक्तं राजतं मोक्षदं स्मृतम् ।
कांस्यं शान्तिकरञ्चैव मृण्मयं बुद्धिवर्धनम्[१८४] ॥

ततः शङ्खवीरपात्रादीञ्च स्थापयेत् ।
अन्यत्रापि–

शङ्खवैरेयपात्रन्तु स्थापयेन्मध्यभागतः ।
श्रीविद्योक्तविधानेन ततः पूजां समाचरेत् ॥

समयाचारेऽप्युक्तम्–

सामान्यार्घं ततः कृत्वा पयसा साधकोत्तमः ।
तज्जलैर्मण्डलं कृत्वा पात्राणि स्थापयेद् बुधः[१८५] ॥

कुमारीकल्पेऽप्युक्तम् –

ततोऽर्घं कारयेन् मन्त्री स्ववामे सुरसुन्दरि ।
अर्घद्रव्यमर्घपात्रे निःक्षिपेद् यत्नतः सुधीः[१८६] ॥
कुण्डगोलोद्भवं द्रव्यं स्वयम्भूकुसुमं तथा ।
नाधर्मो विद्यते[१८७]शुद्धिर्मम मन्त्रस्य[१८८]साधने ॥

कुलार्णवादावप्युक्तम् –

१८२ मार्दवं- ख, ग ।
१८३ ततः कारणं- ख, ग ।
१८४ पुष्टिवर्धनम्- ख, ग ।
१८५ अथ- ख, ग ।
१८६ अर्घ्यद्रव्यमर्घपात्रेषु निःक्षिप्य प्रयत्नतः- ख, ग ।
१८७ जायते- ख, ग ।
१८८ नाधर्मो जायते सुभ्रु महामन्त्रस्य- ख, ग ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कुलमांसं तथा मत्स्यं मुद्रामैथुनमेव च।
अन्योन्यात्वं च तज्ज्ञेयं[१८९] पञ्चानां पूजने सदा ॥
अन्यत्राप्युक्तम्–
शङ्कया जायते ग्लानिः शङ्कया विघ्नभाजनम्।
शङ्कयाधोगतिं याति तस्माच्छङ्कां परित्यजेत् ॥
दिव्यं कुम्भसहस्रैस्तु मांसभारशतैरपि।
न तृप्तिर्भैरवीदेव्याः[१९०]कुलामृतं विना ध्रुवम् ॥
एतत्तु दिव्यद्रव्यादिकं शुद्धितत्त्वोक्तविधानेन शोधयित्वा घण्टशङ्खयोर्मध्ये निक्षिपेदिति।
ततः पीठमये देहे चिन्तयेदिष्टदेवताम्।
ततः कामकलाध्यानम्[१९१] आवाह्य कालिकां शिवाम् ॥
भैरवतन्त्रेऽप्युक्तम्। ततोऽन्यत्रापि–
कूर्माख्यमुद्रया पुष्पं चक्रमध्ये निधापयेत्।
देवीं सुषुम्नादेशे आनीय ब्रह्मरन्ध्रकम् ॥
वामनासापुटे ध्यात्वा निर्गतां स्वाञ्जलिस्थिताम्।
पुष्पमालोक्य तत्पुष्पं प्रतिमादौ निधापयेत् ॥
भैरवतन्त्रेऽप्युक्तम्–
ततः पूर्वोक्तरूपाञ्च[१९२] ध्यायेच्चैव हि दक्षिणाम्।
योगिनीचक्रसहितां महाकालसमन्विताम् ॥
कालिकातन्त्रेऽप्याह[१९३]–
ततो हृदयपद्मान्तः स्फुरन्तीं विद्युदाकृतिम्[१९४]।
सुषुम्नावर्त्मना नीत्वा शिवस्थाने महेश्वरि[१९५] ॥
ततोऽपि हृदयासने पद्मान्तरे समानयेत्।
वामनासया देवेशि[१९६]वायुबीजेन मन्त्रवित् ॥
देवेशीति च मन्त्रेण चक्रे[१९७] आवाहयेत् सुधीः।
ध्यात्वा कामकलामादौ ध्यायेद्देवीमतः परम्।
तदुक्तं भावचूडामणौ–

---

१८९ अन्योन्यं नित्यता ज्ञेया- ख, ग।
१९० नैव तृप्तिर्भवेत् देव्याः- ख, ग ।
१९१ कामकलाध्यानाद्- ख, ग।
१९२ ताम्- ख, ग ।
१९३ ततो हृदयपद्मान्तः स्फूरन्तीं परमां कलाम्। यन्त्रमध्ये समावाह्य न्यासजालं समादिशेत्। कुमारीकल्पेऽपि अधिकपाठः- ख, ग।
१९४ ततो हृदय पद्मान्तःस्फुरन्तीं परमां कलाम्- ख, ग ।
१९५ महेश्वरी- ख, ग।
१९६ वामया नासया देवि- ख, ग।
१९७ चक्रं- ख, ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मुखं बिन्दुवदाकारं तदधः कुचयुग्मकम्।
सर्वविद्यासुसम्पन्नं सर्ववाग्विभवप्रदम्[१९८] ॥
सर्वार्थसाधकं देवं सर्वरञ्जनकारकम्[१९९]।
तदधः सपरार्द्धञ्च समुपस्कृतमण्डलम्॥
सर्वदेवादिभूतञ्च सर्वदेवनमस्कृतम्।
सर्वानन्देन सम्पूर्णं सर्वरञ्जनकारकम्॥
सर्वार्थदं देववन्द्यं सर्वस्य च प्रवर्तनम्[२००]।
एतत्कामकलाध्यानं सङ्गोप्यं साधकोत्तमैः॥

स्वतन्त्रतन्त्रेऽपि–

देव्या ध्यानं प्रवक्ष्यामि सर्वदेवोपसेविताम्।
अञ्जनाद्रिनिभां देवीं करालवदनां शिवाम्॥
मुण्डमालावलीकीर्णां मुक्तकेशीं स्मिताननाम्।
महाकालहृदम्भोजस्थितां[२०१] पीनपयोधराम्॥
विपरीतरतासक्तां घोरद्रंष्टां शिवेन वै[२०२]।
नागयज्ञोपवीताञ्च चन्द्रार्द्धकृतशेखराम्॥
सर्वालङ्कारसंयुक्तां मुक्तमालाविभूषिताम्।
मृतहस्तसहस्रैस्तु बद्धकाञ्चीं दिगम्बराम्[२०३] ॥
शिवाकोटिसहस्रैस्तु योगिनीभिर्विराजिताम्।
रक्तपूर्णमुखां भोजां मद्यपानप्रसन्नकाम्॥
वह्नयर्कशशिनेत्रान्तु रक्तविस्फुरिताननाम्।
विगतासुकिशोराभ्यां कृतकर्णावतंसकाम् ॥
कण्ठावसक्तमुण्डानीं गलद्रुधिरचर्चिताम्।
श्मशानवह्निमध्यस्थां ब्रह्मकेशववन्दिताम्।
सद्यःकृतशिरःखड्गवराभयकराम्बुजाम्[२०४] ॥

अन्यत्रापि–

ऊर्ध्ववामे कृपाणां करकमलतलेच्छिन्नमुण्डं तथाधः।
सव्यभीतिं[२०५] वरञ्च त्रिजगदघहरे दक्षिणे कालिकेति॥

---

१९८ *सर्वविद्यासु सम्पूर्णा- ख, ग ।*
१९९ *सर्वार्थसाधनं देवं सर्वचक्रप्रवर्तनम्-ख सर्वार्थसाधकं देवि सर्वदेवनमस्कृतम्- ग।*
२०० *सर्वार्धिसाधनं देवं सर्वचक्रप्रवर्तनम्- ग।*
२०१ *हृदयाम्भोज- ख, ग।*
२०२ *हि- ख, ग।*
२०३ *दिगम्बराम्- ख, ग।*
२०४ *श्मशानवन्हिमध्यस्थामारभ्य कराम्बुजापर्यन्तं पाठः- ख, ग मातृकायां नास्ति।*
२०५ *सव्यभीतीं- ख।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
स्वतन्त्रतन्त्रे–
ध्यात्वा देवीं समावाह्य योनिमुद्रान्तु दर्शयेत् ।
खड्गमुण्डवराभीतिं परयोनिं सुदर्शयेत् ।
ततश्च सर्वकोणेषु देवीमाराधयेत् सुधीः ॥
देवी इति अङ्गदेवीह इत्यर्थः ॥
तदुक्तं कालीतन्त्रे ।
सर्वाः श्यामा असिकरा मुण्डमालाविभूषणाः ।
श्रुतावप्याह–
काली कपाली कुल्ला च कुरुकुल्ला विरोधिनी ।
विप्रचित्ता चोग्रचित्ता उग्रप्रभा घनाबला[२०६] ।
मात्रा मुद्रामितापञ्चदशकोणगा इति ॥
तर्जनं वामहस्तेन धारयन्त्यश्च सस्मिताः ।
ततोऽष्टदलेषु अष्टदेवीमावाहयेत् । तदुक्तं कुलसम्भवे–
बहिर्मण्डलतश्चापि ब्राह्मी नारायणी तथा ।
माहेश्वरी च चामुण्डा कौमारी चापराजिता ॥
वाराही च तथा पूज्या नारसिंही तथैव च ।
ब्रह्माणीं हंसमारूढां स्वर्णवर्णां चतुर्भुजाम् ॥
चतुर्वक्त्रां त्रिनेत्रां च कूर्चञ्च पङ्कजे तथा[२०७] ।
दण्डञ्च अक्षसूत्रञ्च[२०८] वहन्तीं चारुहासिनीम् ॥
जटाजूटधरां देवीं भावयेत् साधकोत्तमः ।
नारायणीं महादीप्तां श्यामां गरुडवाहिनीम् ॥
नानालङ्कारसंयुक्तां चारुकेशीं चतुर्भुजाम् ।
घण्टां शङ्खकपालञ्च चक्रं सन्दधतीं कराम्[२०९] ॥
मधुमत्तमदोल्लोलदृष्टिं सर्वाङ्गसुन्दरीम् ।
माहेश्वरीं वृषारूढां शुक्लां त्रिनयनान्विताम् ॥
कपालं डमरुञ्चैव वरदाभयशूलकम् ।
दधतीं देवदेवेशीं[२१०] नानाभरणभूषिताम् ॥
चामुण्डां मन्दहास्यां[२११]विकटितदशनां भीमवक्त्रां त्रिनेत्राम् ।

---

२०६ *उग्रप्रभा दीप्तानीलघनावला- ख, ग ।*
२०७ *त्रिनेत्रां चैव कूर्चञ्च पङ्कजं दधतीं तथा- ख, ग ।*
२०८ *दण्डपद्माक्षसूत्रं च- ख ।*
२०९ *पराम्- ख, ग ।*
२१० *टङ्कं च दधतीं देवी- ख, ग ।*
२११ *मट्टहासां- ख ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
नीलाम्भोजप्रभानुं प्रमुदितवपुषीं[२१२] नीरदण्डालिमालाम्[२१३] ॥
खड्गं शूलं कपालं नरशिरघटितं खेटकं धारयन्तीं।
प्रेतारूढां प्रमत्तां मधुमदमुदितां भावयेच्चण्डरूपाम् ॥
कौमारीं कुङ्कुमाभाञ्च त्रिनेत्रां शिखिसंस्थिताम्।
चतुर्भुजां शक्तिपाशामङ्कुशोभयधारिणीम्[२१४] ॥
नानालङ्कारसंयुक्तां प्रमत्तां परिचिन्तयेत्।
अपराजितां च पीताभामक्षसूत्रवरप्रदाम्।
कमलं मातुलिङ्गञ्च दधतीं परिचिन्तयेत् ॥
वाराहीं धूम्रवर्णाभां वराहवाहनां शुभाम्।
फलं खड्गं हलञ्चैव मुशलं वेदभुजैर्धृताम्।
नारसिंही नृसिंहस्य बिभ्रतीं सदृशीं[२१५]तनुम् ॥

इति काल्यादिपञ्चदशदेवीं प्रणवेन ब्राह्म्याद्यष्टदेवीं चाष्टदीर्घस्वरेण तदुक्तं श्रुतौ द्वितीयचतुर्थषष्ठाष्टादशद्वादशचतुर्दशषोडशस्वरभेदेनप्रणवेनाङ्गमिति ततश्च गुरुपङ्क्तिं पूजयेत्।

तदुक्तम्–

वायव्यादीशपर्यन्तं गुरुपङ्क्तिं समर्चयेत् ॥ भावचूडामणावप्युक्तम्–

भैरव उवाच

मातर्देवि महामाये बन्धमोक्षप्रवर्तिनि।
इदानीं श्रोतुमिच्छामि गुरुक्रममनुत्तमम् ॥

देव्युवाच

गुरुक्रमस्तु बहुधा मन्त्रविस्तरगौरवात्।
देवीनामप्यनन्तत्त्वात् कथं तत्कथयामि ते[२१६] ॥
अज्ञात्वा गुरुकुलं नष्टमार्गो भविष्यति[२१७]।
नष्टमार्गान्मन्त्रविद्ये न तादृग् फलगोचरे ॥
गुरूणां शिष्यभूतानां नास्ति चेतस्यतिक्रम क्रमः ॥
अस्त्रमन्त्रश्च विद्याश्च निष्फला नात्र संशयः।
तस्मात् सर्वत्र देवेश संक्षेपाच्छृणु तान् गुरून् ॥
आदौ सर्वत्र देवेश मन्त्रदः परमो गुरुः।
तत्रादौ कालिका देवी तस्याः श्रृणु गुरुक्रमम् ॥
महादेवी महादेव त्रिपुराश्चैव भैरव।

२१२ वपुषां- ख।
२१३ नीलाम्भोजनिभां प्रमुदितवपुषां नारमुण्डालीमालाम्- ख, ग।
२१४ पाशं कुशाञ्च वरदायिनीम्।
२१५ सदृशां- ख।
२१६ तत्कथं कथयामि ते- ख, ग।
२१७ नष्टमार्गान्मन्त्रविद्ये न तादृग्फलगोचरे- ख,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

दिव्यौघाः गुरवः प्रोक्ताः सिद्धौघान् कथयामि ते[२१८] ।
CC-0.In Public Domain. Digitization by eGangotri
ब्रह्मानन्दपूर्णदेवौ चलचित्तश्च लोचनः[२१९] ।
कुमारः कोधनश्चैव वरदस्मरदीपनः ॥
मायारि मारुति[२२०]चैव मानवौघाञ्छृणु प्रिये ।
विमलः कुशलश्चैव भीमासनः सुधाकरः ॥
मीनो गोरक्षकश्चैव भोजदेवः प्रजापतिः ।
मूलदेवो रन्तिदेवो विघ्नदेवो[२२१] हुताशनः ॥
सन्तोषः समयानन्दः कालिका गुरवः स्मृताः ।
आनन्दनाथशब्दान्ता गुरवः सर्वसिद्धिदाः ॥
स्त्रियोऽपि गुरुरूपाश्च अम्बान्ताः परिकीर्तिताः ।
मानवौघान्तिके देशे[२२२] स्वगुरुं परिपूजयेत् ।
देव्यास्तु दक्षिणे भागे महाकालं समर्चयेत् ॥
कुमारीकल्पेऽपि–
ब्राह्म्याद्या पूजयेत् पत्रे[२२३]पत्राग्रे भैरवान् यजेत् ।
दिक्पालान् पूजयेद्दिक्षुःतदस्त्राणि च तद्वहिः[२२४] ॥
अथमूलदेवीपूजां कुर्यात्[२२५].
तदुक्तं स्वतन्त्रतन्त्रे –
आवाहयेत् तु मण्डले मूलदेवीं प्रपूजयेत्
अग्नीशासुरवायव्यमध्ये[२२६]दिक्षु च पूजनम् ॥
तन्त्रान्तरे च–
इष्ट्वा हृदयमाग्नेयां ऐशान्यान्तु शिवं यजेत्[२२७] ।
नैऋत्याञ्च शिखा पूज्या वायव्यां कवचं यजेत् ।
अभ्यर्च्य पुरतो नेत्रं दिक्षु शस्त्रमथार्चयेत् ॥ इति ।
तर्पयेत् कालिकां देवीं सायुधान् सपरिष्करान्[२२८] ।
<u>पाद्यादिभिश्च मूलेन</u> देवीं सम्पूज्य तर्पयेत् ॥

२१८ अज्ञात्वादारभ्य कथयामि पर्यन्तपाठः-ख । गमातृकायां नास्ति ।
२१९ ब्रम्हानन्दः पूर्णदेवो चलचित्तश्चलाचलः- ख ।
२२० माया मायवती चैव- ख ,ग ।
२२१ विघ्नेवरो- ख, ग ।
२२२ देवम्- ख ।
२२३ यन्त्रे यन्त्राग्रे- ख ।
२२४ दिक्पालास्तु ते वाह्या तदस्त्रे शिवः तद्वहिः क .
२२५ अथ मूलदेवीपूजा कार्या- ख, ग ।
२२६ अग्नीन्द्रासुरवायव्यमध्ये- ख, ग ।
२२७ शिरो जयेत्- ख, ग ।
२२८ सपरिवारान्- ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

इति षोडशोपचारादिभिरिति शेषः ।

तदुक्तं मन्त्ररत्नावल्याम्–

आसनं स्वागतं पाद्यमर्घमाचमनीयकम् ।[२२९]
मधुपर्काचमनस्नानवसनाभरणानि च ॥
सुगन्धसुमलो धूपदीपनैवद्यवन्दना ।
प्रयोजयेदर्चनायामुपचारांस्तु षोडशः ॥
पाद्यमर्घ्यं निवेद्याथ तथैवाचमनीयकम् ।
मधुपर्क च मद्यञ्च गन्धप्रसूनके ततः[२३०] ॥
धूपदीपौ[२३१]च नैवेद्यं दशोपचारकं स्मृतम् ।
गन्धादयो नैवेद्यान्त[२३२]पूजापञ्चोपचारिका ॥

पूजाविशेक्षोऽप्युक्तम्[२३३] । तदुक्तं कालीकल्पे–

श्रीपदं पूर्वमुद्धृत्य पादुकापदमुद्धरेत्[२३४] ।
पूजयामि ततः पश्चात् पूजयेदङ्गदेवताम्[२३५]॥
पाद्यञ्च[२३६]पादयोर्दद्यान्नमोऽन्तेन तु मन्त्रवित् ।
सुधामन्त्रेण देवेशि[२३७]अर्घ्यं दद्याच्छिवोपरि[२३८] ॥
आचमनं मधुपर्कञ्च सुधामन्त्रेण वै मुखे ।
गन्धं च हृदये दद्यात् पुष्पाणि वौषडित्यपि[२३९] ।
ततो निवेदयामीति सर्वं दद्यान्महेश्वरि ॥

नमोऽन्तेनेति मूलेनेति शेषः । अत एव स्वतन्त्रतन्त्रादौ

पाद्यादिभिश्च मूलेन देवीं सम्पूज्य साधकः । इति साम्प्रदायिकाः । अतः अस्याः पूजादिकं सर्वं कार्यं मूलेन साधकवित् साधकैरिति । यामलादिवचनात् मूलेनावाहनं[२४०] पूजनमिति उपनिषद्वचनश्रवणाच्च विशेषविहितपरं साम्प्रदायिकमतम् । अथवा तेनेवेत्येवकारगर्भपाटलान्ययोगव्यवच्छेदप्रत्यया

२२९ *पाद्यार्घ्याचमनीयञ्च स्नानवसनभूषणम् । गन्धपुष्पधूपदीपनैवेद्याचमनानि च ।*
ताम्बूलाचमने स्त्रोत्रं तर्पणञ्च नमस्क्रिया । प्रयोजयेच्च पूजायामुपचारांश्च षोडशः ॥ अधिकपाठः- ख, ग ।

२३० *मधुपर्काचमनञ्चैव गन्धप्रसूनकेतनः- ख, ग ।*

२३१ *धूपदीपे -ख, ग ।*

२३२ *गन्धादिकनिवेद्यान्ता- ख ।*

२३३ *पूजायां विशेषोऽप्युक्तम्- ख, ग ।*

२३४ *पादुकापदमुच्चरेत्- ख ।*

२३५ *देवता- ख, ग ।*

२३६ *पाद्यन्तु- ख, ग ।*

२३७ *स्वाहा मन्त्रेण देवेश- ख, ग ।*

२३८ *शिरोपरि- ख, ग ।*

२३९ *स्नानं गन्ध हृदा- ख, ग ।*

२४० *तेनैवेत्येवकारगर्भपाठेनान्ययोगव्यवच्छेदप्रत्ययात् सांप्रदायिमतानुरोधेन न वेतरन्वयप्रत्ययाच्च मिथो विरोधादिति । मूलेनैवपाद्यादिभिः पूजयेदिति वर्गः अधिकपाठः ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

साम्प्रदायिकमतानुरोधेनेतरान्वयप्रत्ययाच्च मिथो विरोधादिति । मूलेनैव पाद्यादिभिः पूजयेदिति । अन्यत्राप्युक्तम्-
CC-0.In Public Domain. Digitization by eGangotri
मध्यमानामिकाभ्यान्तु अङ्गुष्ठाग्रेण पार्वति ।
दद्याच्च विमलं गन्धं मूलेनैव तु साधकः ॥
अङ्गुष्ठतर्जनीभ्याञ्च चक्रे पुष्पं निवेदयेत् ।
यथा गन्धं तथा देवी धूपं दद्याद्विचक्षणः ॥
मध्यमानामिकाभ्यान्तु मध्यपर्वणि देशिकः ।
अङ्गुष्ठाग्रेण देवेशि धृत्वा दीपं निवेदयेत् ॥
उत्तोलनं तथा कृत्वा गायत्र्या मूलयोगतः ।
तत्त्वार्थमुद्रया[२४१] देवि नैवेद्यानि निवेदयेत् ॥
मूलेनाचमनं दत्त्वा[२४२] ताम्बूलं तत्त्वमुद्रया[२४३] ।
अस्त्रेणैव तु धूपादीन् संपूज्य दापयेत् ततः ॥
धूपादिकञ्च स्वस्थाने दद्यात् ।
तदुक्तं यामलादौ[२४४]–
निवेदयेत् पुरोभागे गन्धपुष्पञ्च भूषणम् ।
दीपं दक्षिणतो दद्यात् पुरतोऽप्यथ वामतः[२४५] ॥
वामतस्तु तथा धूपमग्रतो वा न दक्षिणे ।
नैवेद्यं दक्षिणे भागे पुरतो न तु पृष्टतः ।
पाद्यादिना तथा पश्चात् पूजयेदङ्गदेवताः ॥
एवं सम्पूज्य पुनर्मूलेन देवीमभ्यचर्येदिति[२४६]
तदुक्तं स्वतन्त्रे–
ततः पुनर्मूलदेवीं मुद्रातर्पणपूजनैः ।
अर्चयित्वा जपं कृत्वा विसर्जयेत् ततः परम् ॥
कालीतन्त्रेऽप्युक्तम् –
ततः सावहितो मन्त्री गुरुं नत्वा शिरः स्थितम् ।
देवीं ध्यात्वा चाष्टोत्तरसहस्रप्रजपेन्मनुम् ॥
तेजोमयजपफलं देव्याहस्ते समर्पयेत्[२४७]।
गुह्यातिगुह्यगोप्तृत्वमिति मन्त्रेण मन्त्रवित् ॥
परिवारान्तमभ्यर्च्य पुनरभ्यर्चयेत्तु ताम् ।

२४१ *तत्त्वाख्य- ख, ग ।*
२४२ *कृत्वा- ख, ग ।*
२४३ *तेन मुद्रया तत्त्वमुद्रया- ख, ग ।*
२४४ *जामलादौ- ख, ग ।*
२४५ *पुरतोऽप्यथवा पुनः- ख, ग ।*
२४६ *देवीमभ्यर्च्य विसर्जयेत्- ख, ग ।*
२४७ *निवेदयेत्- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नत्वा च शिरसा देवीं स्वात्मनि च विसर्जयेत् ॥

पुष्पाणां विधिनिषेधौ च तत्र तत्त्व एव विवेचयिष्यामः ।

अथ पूजापद्धतिः

यथा[२४८] कामनया वस्त्रद्वयं परिधाय स्त्रीवत्तिलकं चन्दनादिना कृत्वा स्नानतत्त्वोक्तस्थानेषु यथेच्छया स्नानमाश्रित्य ॐ वज्रोदके हुँ फट् स्वाहा इति मन्त्रेण जलं समानीय आसनमभ्युक्ष्य उपरि[२४९] ॐ विशुद्धिसर्वपापानि समयाशेषविकल्पमपनय[२५०] हुँ इत्यात्मना[२५१] मन्त्रेण हस्तौ पादौ च प्रक्षाल्य ॐ ह्रीं स्वाहा इति आचम्य[२५२] रक्ष हुँ फट् स्वाहा इति हस्तं दत्त्वा आत्मरक्षां विधाय वामपादाघातेन तर्जनीमध्यमाभ्यामूर्ध्वोऽर्ध्वतालत्रयेण दिव्यदृष्ट्या विविधविघ्नानुत्सार्यच्छोटिकादिभिर्दशदिग्बन्धनं विधाय प्राणायामादिकं कुर्यात् । यं मूलाधाराय नमः संयोज्य दक्षिणाङ्गुष्ठेन दक्षिणनासापुटं धृत्वा मूलप्रणवं वा मूलाद्यबीजं वा षोडशवारं जपन् वामनासया वायुमापूर्य कनिष्ठानामिकाभ्यां वामनासापुटं धृत्वा मूलादिचतुषष्ठिवारं जपन् वायुं कुम्भयित्वा मूलादिद्वात्रिंशद्वारं जपन् दक्षिणनासया वायुं रेचयेदित्येकम् ।

पुनः कनिष्ठानामिकाभ्यां वामनासापुटं मूलादिषोडशवारं जपन् दक्षिणनासया वायुमापूर्य पुनरङ्गुष्ठेन नासापुटं धृत्वा मूलादिचतुः षष्ठिवारं जपन् वायुं कुम्भयित्वा मूलादिद्वात्रिंशद्वारं जपन् दक्षिणनासया वायुं रेचयेत् ।

पुनरङ्गुष्ठेन दक्षिणनासापुटं धृत्वा मूलप्रणवं वा मूलाद्यबीजं वा षोडशवारं जपन् वामनासया वायुमापूर्य कनिष्ठानामिकाभ्यां वामनासा पुटं धृत्वा मूलादिचतुः षष्ठिवारं जपन् वायुं कुम्भयित्वा मूलादिद्वात्रिंशद्वारं जपन् दक्षिणनासया वायुं रेचयेदित्यन्वयः । इत्येवं प्राणायामत्रयं विधाय भूतशुद्धिं कुर्यात् । यथा मूलाधारात् कुण्डलिनीं हंसमन्त्रेण समुत्थाप्य पृथिव्या सह स्वाधिष्ठाने समानीय तदनुजलपावनीनां विभाव्य[२५३] तस्माज्जलेन सह मणिपूरे समानीय तत्रत्ये वह्नौ जलं विलीनं विचिन्त्य ततो वह्निना सह अनाहते समानीय तत्रत्यवायौ वह्निविलीनं विचिन्त्य ततो वायुना सह विशुद्धे समानीय तत्रत्याकाशे वायुं विलीनं विभाव्य तस्मादकाशेन सहाज्ञाचक्रे समानीय तत्रत्ये मनस्याकाशं विलीनं विभाव्य मनोदेशे[२५४] विलीनं विभाव्य नादो बिन्दौ[२५५] समर्प्य ब्रह्मरन्ध्रस्थसदाशिवेन सह सङ्गमय्य वामनासपुटाग्रे यमिति वायुबीजं धूम्रवर्णं विचिन्त्य षोडशवारं जपन्[२५६] पापपुरुषेण सह शरीरं संशोध्य रमिति वह्निबीजं रक्तवर्णं चतुःषष्टिवारं जपन्[२५७] वायुं[२५८] कुम्भयित्वा तद् भूताग्निना शरीरं दग्धं विचिन्त्य[२५९]वमिति सुधाबीजं ललाटे विचिन्त्य द्वात्रिंशद्वारं जपन् वायुं रेचयेत् । शरीरमुत्पाद्य तत्त्रिकोणवृत्तचतुरस्रमण्डलं कृत्वा ॐ ह्रीं आधारशक्तये नमः । इति आधारशक्तिं सम्पूज्य तत्राधारं

---

२४८ अथ- ख, ग ।

२४९ उपविश्य- ख, ग ।

२५० विकल्पानपयनय- ख ।

२५१ इत्यनेन- ख ।

२५२ आचम्यारभ्य शरीरमुत्पाद्यपर्यन्तपाठः - ख, गमातृकायां नास्ति ।

२५३ तत्रत्य जले तां विलीनं विभाव्य- ख, ग ।

२५४ मनो नादे विलीनं विभाव्य- ख ।

२५५ ध्वनौ समर्प्य- ख ।

२५६ वामनासया वायुमपूर्य तेन शरीरं संशोष्य । अधिकपाठः ।

२५७ विभाव्य चतुःषष्ठिवारं जपेत्- ख ।

२५८ वायुं कुम्भयेत्- ख ।

२५९ वायु बीजं धुम्रवर्णं विचिन्तय- ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
निधाय अस्त्राय फट् इति पात्रं प्रक्षाल्य आधारे निधाय हृदयाय नमः इति जलेन सम्पूर्य ॐ इति मन्त्रेण गन्धपुष्पादिना संपूज्य अङ्कुशमुद्रया सूर्यमण्डले गङ्गेचेत्यादिमन्त्रेण तीर्थमावाह्य धेनुमुद्रयामृतीकृत्य तेनोदकेन चतुर्द्वारं[२६०] सम्प्रोक्ष्य तेषु तेषु द्वारेषु द्वारदेवताः पूजयेत् ।

यथा द्वारोर्ध्वं गां[२६१] गणपतये नमः, वामे क्षां क्षेत्रपालाय नमः, दक्षिणे वां वटुकनाथाय नमः, अधो यां योगिनीभ्यो नमः, एवमेव गं गङ्गायै नमः, यं यमुनायै नमः, श्रीं लक्ष्म्यै नमः, ऐं सरस्वत्यै नमः, एवं पूर्वद्वारक्रमेण द्वारचतुष्टयं सम्पूज्य वामाङ्गसङ्कोचपूर्वकं मण्डलं प्रविश्य ॐ सर्वविघ्नानुच्छेदय हुँफट् स्वाहा[२६२] इति सिद्धार्थाक्षतादिप्रक्षेपेण विघ्नोच्छेदनं विधाय ॐ रक्ष रक्ष हुँ फट् स्वाहा इति भूमिं संशोध्य, ॐ पवित्र वज्र हुँ फट् स्वाहा, इति भूमिमभिमन्त्र्य आः सुरेखे वज्ररेखे हुँ फट् स्वाहा इति मन्त्रेण त्रिकोणमण्डलं कृत्वा, ॐ ह्रीं आधारशक्तये नमः इति मन्त्रेण सम्पूज्य तत्राधारं संस्थाप्य हस्तेन धृत्वा पृथिवीति मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलच्छन्दो कूर्मो देवता आसनोपवेशने विनियोगः । इति ऋष्यादीन् स्मृत्वा–

पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां नित्यं पवित्रं कुरु चासनम् ॥

इति मन्त्रं पठित्वा वीराद्यासनेनोपविश्य द्रव्यशुद्धितत्त्वोक्तप्रकारेण कुलद्रव्यं संशोध्य भुक्त्वा देवमयो भूत्वा वामकर्णोपरि श्रीअमुकनन्दनाथगुरुपादुकाभ्यो नमः, दक्षिणे कर्णे गँ गणपतये नमः,[२६३] इति नत्वा पूर्ववदर्घं विधाय ततः किञ्चिज्जलं प्रोक्षणीपात्रे संस्थाप्य पूजोपकरणं संप्रोक्ष्य दक्षिणे पुष्पादिकं पृष्ठभागे देवतायाः कुलद्रव्याणि वामे चान्यत् पेयादिकं धृत्वा ॐ पुष्पकेतुराजार्हते शताय सम्यक्सम्बुद्धाय

ॐपुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्पसम्भवे ।
पुष्पे च स्वावकीर्णो[२६४] हुँ फट् स्वाहा ॥

इति मन्त्रेण पुष्पशुद्धिं विधाय स्वमूलेन सप्तधाभिमन्त्रितजलेनान्येषामपि शुद्धिं निष्पाद्य ॐ हुँ फट् स्वाहा इति मन्त्रेण कायवाक्चित्तशोधनामृतवृष्ट्या संप्लाव्य सोऽहमिति मन्त्रेण पुनः कुण्डलिनीं सुधालोलीभूतां पञ्चतत्त्वानि च सुषुम्नावर्त्मना स्व स्वस्थाने आनीय देवतारूपमात्मानं विभाव्य हृदि हस्तं निधाय जीवन्यासं कुर्यात् । आँ ह्रीं क्राँ हँ सः दक्षिणकालिकायाः प्राणा इह प्राणाः पुनस्तद्दक्षिणकालिकाया जीव इह स्थितः दक्षिणकालिकायाः सर्वेन्द्रियाणि दक्षिणकालिकायाः वाङ्मनश्चक्षुः श्रोत्रघ्राणप्राणा इहागत्य सुखञ्चिरन्तिष्ठन्तु स्वाहा इति जीवन्यासं कृत्वा ऋष्यादिन्यासं कुर्यात् ।

यथा अस्य मन्त्रस्य भैरव ऋषिरुष्णिक् छन्दोऽमुकदेवता[२६५] ह्रीं बीजं हुँ शक्तिः आद्यबीजं क्रीं कीलकं अभीष्टसिद्ध्यर्थे विनियोगः ॥ इत्यभिलप्य अनामया शिरसि भैरवाय ऋषये नमः । उष्णिक् छन्दसे नमः मुखे[२६६] । अमुकदेवतायै नमः हृदि[२६७]:। ह्रीं बीजाय नमः इति गुह्ये । हुँ शक्तये नमः इति पादयोः । आद्यबीजकीलकाय

२६० *द्वाराणि- ख, ग ।*
२६१ *गं- ख, ग ।*
२६२ *इत्याचम्य- ख ।*
२६३ *पृष्ठे क्षं क्षेत्रपालाय नमः, मध्ये देवतायै नम इति, नत्त्वा पूर्ववदध्र्यं विधायेति- ख, गमातृकायामधिकपाठः ।*
२६४ *पुष्पचयावकीर्णे- ख ।*
२६५ *कालीदेवता- ख ।*
२६६ *मुखे उष्णिक् छन्दसे नमः- इत्यादिपाठः सर्वत्र- ख ।*
२६७ *कालिकादेव्यै नमः- ख ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
नमः नाभौ[२६८] सर्वाङ्गे च विन्यस्य कराङ्गन्यासौ कुर्यात्।

तद्यथा–

ॐ ह्रां क्राँ अङ्गुष्ठाभ्यां नमः अङ्गुल्योः। ॐ ह्रीं क्रीं तर्जनीभ्यां नमः तर्जन्योः। ॐ क्रुं मध्यमाभ्यां नमः मध्यमयोः। ॐ ह्रैं क्रैं अनामिकाभ्यां नमः, अनामिकयोः। ॐ क्रौं कनिष्ठाभ्यां नमःकनिष्ठयोः। ॐ क्रः करतलकरपृष्ठाभ्यां नमः करतलयोः इति विन्यस्य ।

ॐ क्राँ हृदयाय नमः हृदि तर्जनीमध्यमानामभिः। ॐ क्रीं शिरसे स्वाहा शिरसि तर्जनीमध्यमाभ्याम्। ॐ क्राँ शिखायै वौषट् शिखायां मुष्टिं बद्ध्वाधोमुखाङ्गुष्ठेन। ॐ क्रैं कवचाय हुँ कवचे व्यस्तहस्तद्वयाङ्गुलिभिः। ॐ क्रौं नेत्रत्रयाय वौषट् नेत्रयोः तर्जनीमध्यमानामिकाभिः। ॐ क्रः अस्त्राय फट् सर्वाङ्गे तर्जनीमध्यमाभ्यां उर्ध्वोर्ध्वतालत्रयेण चोटिकादिभिर्दिग्बन्धनं विधाय वर्णन्यासं कुर्यात्।

ॐठं हृदि, ॐ ऐँ ठं दक्षिणभुजे, णँ ठं दक्षिणपादे इति विन्यस्य मातृकन्यासं कुर्यात्[२६९]। मँ वामपादे इति विन्यस्य मातृकान्यासं कुर्यात्।

तद्यथा–

सम्पूर्णेन्दुप्रसुभ्रां[२७०] सकललिपिमयीं लोलवक्त्रां त्रिनेत्रां। शुक्लालङ्कारभूषां शशिमुकुटजटाजूटयुक्तां[२७१] प्रसन्नाम्।।
पुस्तस्रक्पूर्णकुम्भां वरमपि दधतीं शुक्लपट्टाम्बराढ्यां
वाग्देवीं पद्मवक्त्रां कुचभरनमितां चिन्तयेत् साधकेन्द्रः ॥

इति ध्यात्वा मातृकामन्त्रस्य ब्रह्मा ऋषिः गायत्रीच्छन्दो मातृकादेवता हलो बीजानि स्वराः शक्तय अव्यक्तकीलकं पापक्षये विनियोगः। इति पठित्वा[२७२]–

ब्रह्मणे ऋषये नमः शिरसि। गायत्रीच्छन्दसे नमः मुखे।

मातृकादेवतायै नमः हृदि। हलो बीजे नमः गुह्ये। स्वरेभ्य शक्तिभ्यो नमः पादयोः। अव्यक्तकीलकाय नमः सर्वाङ्गे इत्यनामया मनसा वा विन्यस्य।

अँ कं खँ गँ घँ ङँ आँ हृदयाय नमः हृदि इति तर्जनीमध्यमानामिकाभिः[२७३]। इँ चँ छँ जँ झँ ञँ ईं शिरसे स्वाहा तर्जनीमध्यमाभ्यां शिरसि। उँ टँ ठँ डँ ढँ णँ गुं ऊँ शिखायै वौषट् बद्धमुष्ट्याधोमुखाङ्गुष्ठेन शिखायाम्। एँ तँ थँ दँ धँ नँ ऐँ कवचाय हुँ व्यस्तहस्ताङ्गुलिभिः कवचे। ओँ पँ फँ बँ भँ मँ औं नेत्रत्रयाय वौषट् तर्जनीमध्यमानामाभिः नेत्रयोः। अँ यँ रँ लँ वँ शँ षँ सँ हँ लँ क्षँ अः अस्त्राय फट् तर्जनीमध्यमाभ्यामूर्ध्वोध्वतालत्रयं दत्त्वा इति षडङ्गं विन्यस्य ॐ अँ नमः ललाटे अनामामध्यमाभ्याम्। ॐ आँ नमः मुखवृत्ते, तर्जनीमध्यमानामिकाभिः। ॐ इँ ईं नमः दक्षिणवामनेत्रयोस्तर्जन्यनामाभ्याम्। ॐ उँ ऊँ नमो दक्षिणवामकर्णयोरङ्गुष्ठेन। ॐ ऋँ ॠँ नमः दक्षिणवामनासिकयोः कनिष्ठाङ्गुष्ठाभ्याम्। ॐ लृँ लॄँ दक्षिणवामगण्डयोः मध्यमया। ॐ एँ ऐँ नमः ऊर्ध्वोऽधोऽधरयोः मध्यमया। ॐ ओँ औँ ऊर्ध्वोऽधो दन्तपङ्क्त्योः अनामया। ॐ अँ नमः शिरसि मध्यमया। ॐ अः नमः मुखे मध्यमया। ॐ कँ नमो दक्षिणे बाहुमूले। ॐ खँ नमः कपूरे। ॐ गँ नमो मणिबन्धे। ॐ

२६८ नाभौ क्रीं कीलकाय नमः- ख, ग।
२६९ अँ १० हृदि ऐ १० दक्षिणभूजे। टं वामभूजे। णं १० दक्षपादे- ख। मं वामपादे इति विन्यस्य मातृकान्यासं कुर्यात्- ख।
२७० शरत्पूर्णेन्दुप्रभां- ख।
२७१ जटाटोप- ख
२७२ इत्यभिलप्य- ख ।
२७३ अं कं ५ आं हृदयाय नमः अग्रेऽपि एतादृशः पाठः- ख।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
घँ नमोऽङ्गुलीमूले । ॐ ङँ नमः अङ्गुल्यग्रे । ॐ चँ नमः वामबाहुमूले । ॐ छँ नमः कर्पूरे[२७४]। ॐ जँ नमः मणिबन्धे[२७५] । ॐ झं नमः अङ्गुलीमूले । ॐ ञं नमः अङ्गुल्यग्रे । ॐ टँ नमः दक्षिणपादमूले । ॐ ठँ नमः जानुनि । ॐ डँ नमः ॐ गुल्फे । ॐ ढँ नमः अङ्गुलीमूले । ॐ णं नमः अङ्गुल्यग्रे । ॐ तँ नमः वामपादमूले। ॐ थँ नमः जानुनी । ॐ दँ नमः गुल्फे । ॐ धँ नमः अङ्गुलीमूले । ॐ नँ नमोऽगुल्यग्रे दक्षिणवत् । ॐ पं नमः दक्षपार्श्वे[२७६]। ॐ फँ[२७७]वामपार्श्वे । ॐ बँ [२७८]पृष्ठे कनिष्ठानामिकाभिः । ॐ भँ नमः नाभौ कनिष्ठानामिकाङ्गुष्ठैः । ॐ मँ नमः कुक्षौ कनिष्ठानामिकमध्यमातर्जन्यङ्गुष्ठैः । ॐ यँ नमो हृदि करतलेन । ॐ रँ नमः दक्षिणाङ्गे करतलेन । ॐ लँ नमः ककुदि करतलेन । ॐ वँ नमः वामाङ्गे करतलेन । ॐ शँ नमः हृदादिदक्षिणकराङ्गुलीपर्यन्तं करतलेन । ॐ षँ नमो हृदादिवामकराङ्गुलीपर्यन्तं करतलेन । ॐ सँ नमो हृदयादिदक्षिणपदाङ्गुलीपर्यन्तं करतलेन। ॐ हँ नमो हृदादिवामपादाङ्गुलीपर्यन्तं करतलेन । ॐ लँ नमः हृदाद्युदरे करतलेन । ॐ क्षँ नमः हृदयान्मुखपर्यन्तं करतलेन । इति मातृकान्यासः । इति मातृकां विन्यस्य श्रीकण्ठन्यासं कुर्यात् ।

तद्यथा– ॐ अँ श्रीकण्ठपूर्णदेवीभ्यां[२७९] नमः ललाटे । ॐ आँ अनन्तविजयाभ्यां नमः मृखवृत्ते । इँ सूक्ष्मेशशाल्मलीभ्यां नमः दक्षाक्षिणि[२८०] । ॐ ई लोलाक्षिभ्यां नमः वामाक्षिणि[२८१] । उँ अमरेश्वरलोलाक्षिभ्यां[२८२] नमः दक्षकर्णे । ऊँ अर्धीशदीर्घघोणाभ्यां नमः वामकर्णे । ऋँ[२८३]भारभूतीशदीर्घमुखीभ्यां नमः दक्षनासायाम् । ॠँ[२८४] अतिथीशगोमुखीभ्यां नमः वामनासिकायाम् । लृँ स्थाण्वीशदीर्घजिह्वाभ्यां नमः दक्षगण्डे । लॄँ हरकुण्डोदरीभ्यां नमः वामगण्डे । एँ भिण्डीशोर्ध्वकेशीभ्यां नमः ओष्ठे[२८५] । ऐँ भौतिकेशविकृतमुखाभ्यां नमः अधरे । ओँ सद्योजातज्वालामुखीम्यां नमः ऊर्ध्वदन्ते[२८६] । औँ अनुग्रहेशकमहाकालीभ्यां नमः अधोदन्ते । अँ अक्रूरेशसुमुखीभ्यां नमः शिरसि । अः महासनविद्यामुखीभ्यां नमः मुखे । कँ क्रोधीशमहाकालीभ्यां नमः दक्षांशे[२८७] । खँ चण्डेशसरस्वतीभ्यां नमः कूपरे । गं पञ्चान्तकेशगौरीभ्यां नमः मणिबन्धे ।

घँ शिवोत्तमेशत्रैलोक्यवन्द्याभ्यां नमः अङ्गुलीमूले । ङँ एकरुद्रेशमन्त्रशक्तिभ्यां नमः अङ्गुल्यग्रे । चँ कूर्मेशात्मशक्तिभ्यां नमः वामाङ्गे[२८८] । छँ एकनेत्रेशभूताभ्यां नमः कूर्परे । जँ चतुराननेशलम्बोदरीभ्यां नमः मणिबन्धे । झँ अजेशद्राविणीभ्यां नमः अङ्गुलीमूले । ञँ सर्वेशनागरीभ्यां नमः अङ्गुल्यग्रे । टं सोमेशखेचरीभ्यां नमः

---

२७४ कूपरि- ख, ग ।
२७५ करमूले- ख, ग ।
२७६ पददक्षपार्श्वे- ख, ग ।
२७७ फं नमः-ख एवम् अग्रेऽपि ।
२७८ पञ्चाङ्गुलिभिः- ख ।
२७९ पूर्णोदरीभ्यां नमः- ख, ग ।
२८० दक्षनेत्रे- ख, ग ।
२८१ वामनेत्रे- ख, ग ।
२८२ अमरेशवर्तुलाक्षिभ्या नमः -ख ग ।
२८३ रुं- ख ।
२८४ रूं- ख ।
२८५ ऊर्ध्वोष्ठे- ग ।
२८६ ऊर्ध्वदन्तपङ्क्तौ - ख, ग ।
२८७ दक्षवामाङ्गमूले- ख ।
२८८ वामबाहुमूले- ख, ग ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

दक्षोरुमूले। ठँ अङ्गुलीशमञ्जरीभ्यां नमः वामोरुमूले[२८९]। डँ दारुकेशरूपीभ्यां नमः गुल्फे। ढँ अङ्गनारीशवारुणीभ्यां नमः अङ्गुलीमूले । णँ उमाकान्तेशशाकोदरीभ्यां नमः अङ्गुल्यग्रे । तँ आशाढीशपूतनाभ्यां नमः वामोरुमूले । थँ दण्डीशभद्रकालीभ्यां नमः मध्ये । दँ अत्रीशयोगिनीभ्यां नमः गुल्फे । धँ मीनेशशलिनीभ्यां नमः अङ्गुलीमूले । नँ मखेशगजनीभ्यां नमः अङ्गुल्यग्रे । पँ लोहितेशकालरात्रीभ्यां नमः दक्षपार्श्वे । फँ शिखीशकुब्जिनीभ्यां नमः वामपार्श्वे। बँ छागलण्डेशकपर्दिनीभ्यां नमः पृष्ठे। भँ द्विरण्डेशवज्रिणीभ्यां नमः नाभौ। मं महाकालेशजयाभ्यां नमः[२९०]उदरे। यँ वाणीशसुमुखेश्वराभ्यां नमः हृदि। रं भुजङ्गेशरेवतीभ्यां नमः दक्षस्कन्धे। लँ पिनाकीशमाध्वीभ्यां[२९१] नमः ककुदि। वँ खड्गीशवायवीभ्यां नमः वामस्कन्धे। शँ रकेशवायवीभ्याँ[२९२] नमः हृदादिदक्षपादाङ्गुलीपर्यन्तम्[२९३]। षँ श्वेतेशरक्षोविदारिणीभ्यां नमः हृदादिवामकराङ्गुलीपर्यन्ताम्। सँ भृङ्गीशसहजाभ्यां नमःहृदादिदक्षपादाङ्गुलीपर्यन्तम् । हँ नन्दिनीशलक्ष्मीभ्यां नमः हृदादिमुखपर्यन्तम्[२९४]। लँ शिवव्यापिनीभ्यां नम उदरादिहृत्पर्यन्तम्। क्षं सम्वर्तेशमहामायाभ्यां नमः हृदादिमुखपर्यन्तं विन्यस्य षट्न्यासात्मकं षोढान्यासं कुर्यात्।

इति श्रीकण्ठन्यासः ।

यथा– प्रथमं मातृकान्यासं विधाय पुनस्तेषु स्थानेषु श्रीँ अँ श्रीँ अँ नमो ललाटे। श्रीँ आँ श्रीँ आँ नमो मुखवृत्ते। एवंक्रमेण मातृकवद् विन्यस्य[२९५] क्रीँ श्रीँ क्रीँ श्रीँ क्रीँ श्रीँ नमो[२९६] ललाटे। क्रीँ श्रीँ हुँ[२९७] नमो मुखवृत्ते। एवं क्रमेण न्यसेदिति तृतीयो न्यासः[२९८]। ह्री श्रीँ ह्रीँ श्रीँ ह्रीँ श्रीँ ह्री श्रीँ नमो मुखवृत्ते। इति एवं क्रमेण न्यसेदिति चतुर्थः। मूलं ह्राँ ह्रा ऋँ ॠँ कृँ मूलं ह्राँ ह्रा ऋँ ॠ कृँ मूलं ह्राँ ह्रा ऋँ ॠँ कृँ नमो ललाटे। मूलं ह्रा ह्राँ ऋँ ऋँ कृँ मूलं ह्रा ह्राँ ऋँ ऋँ कृँ मूलं ह्राँ ह्राँ ऋँ ऋँ कृँ[२९९] नमो मुखवृत्ते। एवं क्रमेण न्यसेदिति पञ्चमः। अनुलोमविलोमाभ्यां मातृकास्थाने केवलं मूलं विन्यस्याष्टोत्तरशतं व्यापकं व्यस्तहस्ताभ्यां मातृमुद्रादिभिर्न्यसेदिति[३००]।

इति षोढान्यासः ।

तत्त्वन्यासं कुर्यात्। तद्यथा–

मूलाद्यखण्डान्ते आत्मतत्त्वाय नमः पादादिनाभिपर्यन्तम् । द्वितीयमूलखण्डान्ते विद्यातत्त्वाय नमः नाभ्यादिहृत्पर्यन्तम्। तृतीयमूलखण्डान्ते शिवतत्त्वाय नमो हृदादिशिरःपर्यन्तं न्यसेदिति[३०१]। इति तत्त्वन्यासः। ततो बीजन्यासं कुर्यात्। आद्यबीजं ब्रह्मरन्ध्रे। द्वितीयं भुवि। तृतीयं भाले। चतुर्थं नाभौ। पञ्चमं गुह्ये। षष्ठं वक्त्रे। सप्तमं सर्वाङ्गे विन्यस्य व्यापकं कुर्यात्। यथा पञ्चधा नवधा शतधा वा मूलमुच्चरन् व्यस्तहस्ताभ्यां

---

२८९ *मध्ये- ख, ग।*

२९० *महाकालजयाभ्यां नमः- ख, ग।*

२९१ *पिनाकीशमाधवीभ्यां नम- ख।*

२९२ *वकेशवाणीभ्या नमः -ख ग।*

२९३ *दक्षहृदादिदक्षकराङ्गुलीपर्यन्तम्-ख।*

२९४ *हृदयादिवामपादाङ्गुलीपर्यन्तम्- ख।*

२९५ *एवं क्रमेण विन्यसेदिं तृतीयान्यासः-ख, ग।*

२९६ *ह्री श्रीँ ह्रीँ श्रीँ ह्री श्रीँ-ख ।*

२९७ *क्रीँ श्रीँ क्रीँ श्रीँ क्रीँ श्रीँ -ख।*

२९८ *चतुर्थन्यासः- ख, ग।*

२९९ *ह्राँ ह्राँ रूँ रूँ मूलं ह्राँ ह्राँ रूँ रूँ तृँ मूलं ह्राँ ह्राँ रूँ रूँ तृँ-ख, ग।*

३०० *मातृकामुद्राभिर्यसेदित्यङ्गषोढा विन्यस्य तत्त्वन्यासं कुर्यात्ः-ख, ग।*

३०१ *तत्त्वन्यासं विधाय-ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

न्यसेदिति। न्यासजालं विधाय यथोक्तविधिना यन्त्रराजं निर्माय पुरोवर्तिनि पीठे निधाय पीठपूजां कुर्यात्।
यथा– ॐ ह्रीं आधारशक्तये नमः। ॐ प्रकृतये नमः। ॐ कूर्माय नमः। ॐ अनन्ताय नमः। ॐ सुधाम्बुधायै नमः। ॐ मणिद्वीपाय नमः। ॐ चिन्तामणिगृहाय नमः। ॐ शशासनाय नमः। ॐ पारिजाताय नमः। ॐ रत्नवेदिकायै नमः। ॐ तदुपरि मणिपीठाय नमः। ॐ चतुर्दिक्षु नानामुनिभ्यो नमः। ॐ नानादेवेभ्यो नमः। परितः ॐ बहुमांसास्थिशिवाभ्यो नमः[302]। ॐ शवेभ्यो नमः। ॐ शवमुण्डेभ्यो नमः। पूर्वादिक्चतुष्टये ॐ धर्माय नमः। ॐ ज्ञानाय नमः। ॐ वैराग्याय नमः। ॐ ऐश्वर्याय नमः। चतुष्पादे ॐ अधर्माय नमः। ॐ अज्ञानाय नमः। ॐ अवैराग्याय नमः। ॐ अनैश्वर्याय नमः। मध्ये ॐ अनन्ताय नमः। ॐ पद्माय नमः। ॐ अँ अर्कमण्डलाय नमः। ॐ सँ सोममण्डलाय नमः२। ॐ मँ वह्निमण्डलाय नमः। ॐ सँ सत्वाय नमः। ॐ रँ रजसे नमः। ॐ तँ तमसे नमः। ॐ आँ आत्मने नमः। ॐ अँ अन्तरात्मने नमः। ॐ पँ परमात्मने नमः। ॐ ह्रीं ज्ञानात्मने नमः।

अष्टदले पूर्वादितः ॐ इच्छायै नमः। ॐ क्रियायै नमः। ॐ कामिन्यै नमः। ॐ कामदायिन्यै नमः। ॐ रत्यै नमः। ॐ रतिप्रियायै नमः। ॐ आनन्दायै २। ॐ कर्णिकायै नमः। ॐ मनोन्मन्यै नमः। मध्ये ॐ ऐँ परायै नमः। ॐ ऐँ परापरायै नमः। ॐ मणिपीठाय नमः। मणिपीठोपरि ॐ ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः। इति मणिपीठं सम्पूज्य घटस्थापनं कुर्यात्।

स्ववामे षट्कोणान्तर्गतं बिन्दुं विलिख्य बाह्यवृत्तं चतुरस्रं कृत्वा सामान्यार्घोदकेनाभ्युक्ष्य ॐ ह्रीं आधारशक्तिभ्यो नमः इति सम्पूज्य नम इति आधारं प्रक्षाल्य मण्डले संस्थाप्य ॐ मँ वह्निमण्डलाय दशकलात्मने नमः इति घटं सम्पूज्य, ॐ अस्त्राय फट् इति घटं प्रक्षाल्य, रक्तवस्त्रमाल्यादिना भूषयित्वा ओमिति त्रिपदिकोपरि देवीबुद्ध्या संस्थाप्य ॐ अँ अर्कमण्डलाय द्वादशकलात्मने नमः इति घटं सम्पूज्य मूलमुच्चरन् कारणेन घृतेन तैलेन दुग्धेन दध्ना तक्रेण वा सम्पूज्य[303] ॐ फडिति दर्भैः सन्ताड्य हुँमित्यवगुण्ठ्य मूलान्तेनैवाभ्युक्ष्य तेनैव त्रिधा गन्धमादाय पुष्पेण सह ओमिति मन्त्रेण कुम्भे निःक्षिप्य कारणेन पूरयेत्। पक्षे शापमोचनं कृत्वा द्रव्यशुद्धितत्त्वोक्तप्रकारेण संशोध्य शङ्खस्थापनं कुर्यात्। यथा ईंकारत्रिकोणवृत्तषट्कोणचतुरस्रमण्डलं निर्माय चतुरस्रचतुरेखायां ॐ **पूर्णशैलाय नमः। ॐ उड्डीयनाय नमः। ॐ जालन्धराय नमः।** ॐ कामरूपाय नमः। इति पूर्वादितः सम्पूज्य षट्कोणे हृदयाय नमः इति क्रमेण षडङ्गं सम्पूज्य मूलखण्डत्रयेण त्रिकोणस्याग्रदक्षिणोत्तरं सम्पूज्य ॐ ह्रीं आधारशक्तये नमः इति सम्पूज्य त्रिकोण षट्कोणवृत्तभूषितां यन्त्रिकां तत्र संस्थाप्य नमः इति सामान्यार्घोदकेनाभ्युक्ष्य वह्नेर्दशकलां पूजयेत्। यथा यँ धूम्रार्चिषे नमः। रँ उष्माय नमः। लँ ज्वलिन्यै नमः। वँ ज्वालिन्यै नमः। शँ विस्फुलिन्यै नमः। षं सुश्रियै नमः। लँ कपिलायैः। हँ हव्यवाहनायै नमः। क्षँ कव्यवाहनायै[304] नमः। इति संपूज्य वह्निमण्डलाय दशकलात्मने नमः इति षट्कोणे षडङ्गं सम्पूज्य मध्ये व्यस्तमूलमन्त्रेण देवीं सम्पूज्य फडिति मन्त्रेणार्घपात्रं प्रक्षाल्य त्रिपादिकोपरि संस्थाप्य तत्र सूर्यमण्डलं पूजयेत्। तद्यथा – कँ भँ तपिन्यै नमः। खँ बँ तापिन्यै नमः। गँ फं धूम्रायै नमः। घँ पँ मरिच्यै नमः। ङँ नँ ज्वलिन्यै नमः। चँ धँ रुच्यै नमः। छँ दँ सुषुम्नायै नमः। जँ थँ भोगदायै नमः। झँ तँ विश्वायै नमः। ञँ णँ बोधिन्यै नमः। टँ ठँ धारिण्यै नमः। ठं डं क्षमायै नमः इत्यर्ककलाः सम्पूज्य। अथवा अँ अर्कमण्डलाय द्वादशकलात्मने

---

३०२ *बहुमांसास्थिमोदमानशिवाभ्यो नमः–ख।*
३०३ *सम्पूर्य ॐ सोममण्डलाय षँ षँ षोडशकलात्मने नम इति सम्पूज्य–ख, ग।*
३०४ *कव्यवाहायै–ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
नमः इत्यर्कमण्डलं संपूज्य तत्र त्रिकोणवृत्तषट्कोणमर्घपात्रमध्ये विलिख्य व्यस्तहस्तमूलमन्त्रेण त्रिकोणं सम्पूज्य षट्कोणे षडङ्गं पूजयित्वा वमिति मूलमन्त्रं विलोममातृकाञ्च पठन् घटस्थकारणाद्यमृतेन त्रिभागमापूर्य जलेन भागैकं संपूर्य दूर्वाक्षतरक्तपुष्पादिनान सुगन्धिद्रव्याणि तत्र निःक्षिपेत् । तत्र सोमकलां सम्पूजयेत् । तद्यथा अँ अमृतायै नमः । आँ मानदायै नमः । इँ पूषायै नमः । ईं तुष्ट्यै नमः । उँ पुष्ट्यै नमः । ऊँ रत्यै नमः । ऋँ धृत्यै नमः । ॠँ शशिन्यै नमः । लृँ चन्द्रिकायै नमः । ॡँ कान्त्यै नमः । एँ ज्योत्स्नायै नमः । ऐँ श्रियै नमः । ओँ प्रीत्यै नमः । औँ आनन्दायै नमः । अँ पूर्णायै नमः । अः पूर्णामृतायै नमः । इति सोममण्डलं सम्पूज्य त्रिकोणवृत्तषट्कोणं तन्मध्ये कुशेन लिखित्वा त्रिकोणे रेखायां अँ १६ कं १६ थं १६ इति विलिख्य मूलखण्डत्रयेण त्रिकोणं सम्पूज्य षट्कोणे षडङ्गं पूजयित्वा गङ्गे चेति मन्त्रेणाङ्कुशमुद्रयासूर्यमण्डलात् तीर्थमावाह्य आनन्दानन्दभैरव्यौ तन्मन्त्रेण सम्पूज्य पूर्वादिक्रमेण पञ्चरत्नं पूजयेत् ।

तद्यथा । ग्लूं गगनरत्नेभ्यो नमः । स्लुँ स्वर्गरत्नेभ्यो नमः । प्लूँ पातालरत्नेभ्यो नमः । म्लूँ मर्त्यरत्नेभ्यो नमः । न्लूं नागरत्नेभ्यो नमः । म्लूं मध्यरत्नेभ्यो नमः । इति सम्पूज्य शङ्खस्थद्रव्ये दूतीयागप्रतिपादोक्तक्रमेण कुण्डगोलोद्भवद्रव्यमुत्पाद्य संशोध्य मांसं मत्स्यं मुद्राञ्च शुद्धितत्त्वोक्तप्रकारेण संशोध्य निःक्षिप्य हुमित्यवगुण्ठ्य धेनुमुद्रयामृतीकृत्य तालत्रयं दिग्बन्धनञ्च कृत्वा तदुपरि मूलं संजप्य सामान्यार्घपात्रवत् पात्राणि पातयेत्[३०५] । यथा घटसमीपे गुरुपात्रं भैरवपात्रं शक्तिपात्रं ततो योगिनीपात्रं ततो बलिपात्रं ततः पाद्यपात्रं तत आचनीयपात्रं ततो देवीपात्रं इति क्रमेण स्थापयित्वा सर्वपात्रेषु शङ्खद्रव्यबिन्दून् निःक्षिप्य गुरुपात्रामृतेन तत्त्वमुद्रया स्वशिरसि अमुकानन्दनाथपादुकां तर्पयामीति त्रिः सन्तर्प्य आत्मानं पूजोपकरणं चाभ्युक्ष्य सर्वं ब्रह्ममयं विभाव्य पूजामारभेत् ।

यथा चक्रस्य पूर्वदिशि त्रिकोणवृत्तं विलिख्य ऐँ ह्रीँ हुँ मण्डलाय नमः इति मण्डलं सम्पूज्य वामे वटुकाय नम इति पाद्यादिभिरभ्यर्च्य बलिमुपनीय बलिपात्रामृतेन एह्येहि देवीवटुकनाथकपिलजटाभासुरत्रिनेत्रज्वालामुख सर्वविघ्नान्नाशय नाशय सोपचारं बलिं गृह्ण गृह्ण स्वाहा इत्येष बलिवटुकाय नम इति वामाङ्गुष्ठेनानामिकाभ्याम् उत्सृज्य दक्षिणदिशि पूर्ववन्मण्डलं विलिख्याभ्यर्च्य[३०६] योगिनीपात्रामृतेन बलिमुपनीय

ऊर्ध्वं ब्रह्माण्डतो वा दिवि गगनतले भूतले निष्कले वा।

पाताले वा वने वा सलिलपवने या यत्र कुत्रस्थिते वा।

क्षेत्रे पीठोपपीठादिषु[३०७]च परिधृतं धूपदीपादिकेन ।

प्रीता देव्यः सदा नः शुभबलिविधिना पातु वीरेन्द्रवन्द्याः ॥

याँ योगिनीभ्यः स्वाहा । सर्वयोगिनी हूँ फट् स्वाहा एष बलियोगिनीभ्यो नम इति तत्त्वमुद्रया बलिपात्रामृतेन क्षाँ क्षीँ क्षुँ क्षै क्षौँ क्षः स्थानक्षेत्रपालधूपदीपसहितं बलिं[३०८] गृह्ण स्वाहा एष बलिः क्षेत्रपालाय नमः इति बलिं दत्त्वा पूर्ववन्मण्डलं विलिख्याभ्यर्च्य गणेशबलिमभ्यर्च्य गाँ गीँ गूँ गणपतये वरद वरद सर्वजनं मे वशमानय बलिं गृह्ण गृह्ण स्वाहा एष बलिर्गणपतये नमः इति बलिं दत्त्वा ।

स्ववामे चतुरस्रमण्डलं कृत्वा पूर्ववत् संपूज्य तत्र साधारणबलिं संस्थाप्य मूलेनाभिमन्त्र्य धूपादिना सर्वभूतं

---

३०५ *स्थापयेत्- ख, ग।*
३०६ *विधाय-ख।*
३०७ *कृतसदा-ख, ग।*
३०८ *गृह्ण गृह्ण -ख ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सम्पूज्य ऐँ ह्रीँ सर्वविघ्नकृद्भ्यः स्वाहा एष बलिः सर्वभूतेभ्यो नमः इति तत्त्वमुद्रया बलिपात्रामृतेनोत्सृज्य चक्रप्रेतासनोपरि[३०९] मूलेन मूर्त्तिं विचिन्त्यात्मानं कामकलारूपं विभाव्य करकच्छपिकया पुष्पादिकां गृहीत्वा मूलाधारान्कुण्डलिनीं ब्रह्मपथेन शिरोऽन्तं विभाव्य तत्रत्यामृतेन लोलीभूतां हृदयपङ्कजे[३१०] समानीय तदभेदेन मूलदेवीं अञ्जनाद्रिनिभामित्यादिक्रमेण ध्यात्वा क्रमेण यमिति वायुबीजेन वामनासया बाह्यकरस्थपुष्पे समारोप्य **देवेशि भक्तिसुलभे परिवारसमन्विते ।**

यावत् त्वां पूजयिष्यामि तावद्देवि इहावह ॥ इति मन्त्रं पठन् तत्पुष्पं कल्पितमूर्ति[३११] निधाय आवाहनमुद्रया महाकालसहिते अमुकदेवि इहावह इहावह इत्यावाह्य स्थापनामुद्रया इह तिष्ठ तिष्ठ इति संस्थाप्य सन्निधापनमुद्रया इह सन्निधेहि इति सन्निधाय निरोधनीमुद्रया सन्निरुद्धस्व सन्निरुद्धस्व इति सन्निरुध्य इति अङ्कुशेन लेलीहया मुद्रया वा जीवन्यासं विधाय हुमित्यवगुण्ठ्य षडङ्गेन सकलीकृत्यच्छोटिकाभिर्दशदिग्बन्धनमिति । वमिति[३१२] धेनुमुद्रया अमृतीकरणं कृत्वा ॐ आगतं कुशेनेदमासनमास्यतामित्यभिमन्त्र्य[३१३] योनिमुद्रां खड्गमुद्राञ्च प्रदर्श्य अग्नीशासुरवायुषु मध्ये दिक्षु च षडङ्गञ्च पूजयित्वा पञ्चदशकोणेषु काल्यादिपञ्चदशदेवीं यथोक्तक्रमेण ध्यात्वाष्टदले ब्रह्माण्याद्यष्टदेवीं यथोक्तक्रमेण विभाव्य मूलमन्त्रमुच्चार्य ॐ महाकालसहितेऽमुकदेवि सायुधे सपरिवारे मातस्तृप्यतामिति देवीपात्रामृतेन त्रिः सकृद्वा तर्पयित्वा मूलेन एतत्पाद्यं महाकालसहितायै अमुकदेव्यै नमः । इति पाद्यापात्रामृतेन पाद्यं दत्त्वा पादयोः मूलमुच्चार्यमर्घ्यं स्वाहा शिरसि अर्घ्यपात्रामृतेनार्घ्यं दत्त्वा, मूलेन महाकालसहितायै अमुकदेव्यै एष मधुपर्कः स्वाहेति मुखे दत्त्वा आचमनीयमप्येवं दत्त्वा मूलेन इदं स्नानीयं नमः इति सर्वाङ्गे दत्त्वा, गन्धमप्येवं दत्त्वा मूलेन महाकालसहितायै अमुकदेव्यै पुष्पाणि वौषडिति वारत्रयं पुष्पाणि दत्त्वा मूलेन निवेदयामि इति धूपदीपाभरणवस्त्रादिकं दत्त्वा आचमनीयपात्रामृतेन पुनराचमनीयं दत्त्वा पुनरत्र त्रिकोणचतुरस्रं निर्माय नैवेद्यपात्रं मण्डलोपरि संस्थाप्य तत्त्वमुद्रया संस्पृश्य बलिपात्रामृतेन मूलमन्त्रेण महाकालसहितायै अमुकदेव्यै ताम्बुलमिदं कर्पूरादिसहितं निवेदयामीति निवेद्य देवीदक्षिणभागे महाकालभैरवं पूजयित्वा भैरवपात्रामृतेन सन्तर्प्य गुरुपङ्क्तिं पूजयेत् । तद्यथा देवीदक्षिणभागे वायव्यादीशानपर्यन्तं पङ्क्तिक्रमेण विभाव्य महादेव्यम्बायै नमः । ॐ महादेवानन्दनाथाय नमः । ॐ त्रिपुराम्बायै नमः भैरवानन्दनाथाय नमः । इति. दिव्यौघगुरून् पाद्यादिभिः सम्पूज्य गुरुपात्रामृतेन त्रिः सकृद्वा तत्त्वमुद्रया सन्तर्प्य ॐ पूर्णानन्दनाथाय नमः। ॐ बलचित्तानन्दनाथाय नमः । ॐ चलाचलनाथाय नमः । ॐ कुमारनन्दनाथाय नमः । ॐ क्रोधानन्दनाथाय नमः। ॐ वरदानन्दनाथाय नमः । ॐ स्मरदीपानन्दनाथाय नमः । ॐ मायाम्बायै नमः । ॐ मायावत्यम्बायै नमः इति सिद्धौघगुरून् पाद्यादिभिः सम्पूज्य गुरुपात्रामृतेन तत्त्वमुद्रया त्रिः सकृद्वा सन्तर्प्य ॐ विमलानन्दनाथाय नमः । ॐ मीनानन्दनाथाय नमः[३१४] । ॐ गोरक्षानन्दनाथाय नमः । ॐ भोजदेवानन्दनाथाय नमः । ॐ भोजदेवानन्दनथाय नमः । ॐ प्रजापत्यानन्दनाथाय नमः । ॐ विश्वेदेवानन्दनाथाय नमः। ॐ हुताशनानन्दनाथाय नमः । ॐसमयानन्दनाथाय नमः । ॐसन्तोषानन्दनाथाय नमः इति मानवौघगुरून् पाद्यादिभिः सम्पूज्य गुरुपात्रादिभिः सम्पूज्य गुरुपात्रामृतेन तत्त्वमुद्रया सन्तर्प्य पञ्चदशकोणेषु पञ्चदशदेवीः पूजयेत् ।

३०९ चक्रस्थप्रेतासनोपरि- ख, ग ।
३१० हृदयाष्टदलपङ्कजे- ख, ग ।
३११ क्लृप्तमूर्तौ-ख ।
३१२ चमिति- ख ।
३१३ आगतं कुलमिदमासनमास्यतामित्यभिलप्य- ख, ग ।
३१४ भीमसेनानन्दनाथाय नमः- ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यथा प्रथमतः । सर्वाश्यामा इत्यादिक्रमेण ध्यात्वा सम्मुखकोणे ॐ नमः महाकाल्यै । वामकोणे ॐ कपालिन्यै नमः । दक्षिणकोणे ॐ कुल्यायै नमः । इति सम्पूज्य योगिनीपात्रामृतेन त्रिः सकृद्वा सन्तर्प्य कुरुकुल्लाविरोधिनीं विप्रचित्तां सम्पूज्य तदन्तत्रिकोणे ॐ उग्रां उग्रप्रभादीप्तां पूर्ववत्सम्पूज्य सन्तर्प्य ततस्त्रिकोणे[३१५] नीलां घनां वलाकां[३१६] सम्पूज्य सन्तर्प्य तदन्तःत्रिकोणे मात्रां मुद्रान्वितां[३१७] पूर्ववत् सम्पूज्य अष्टदलेष्वष्टशक्तीर्ध्यात्वा पूजयेद्यथा ।

पूर्वदले ॐ आं ब्रह्माण्यै[३१८]नमः । अग्निदले ॐ ई नारायण्यै नमः । दक्षदले ॐ ऊँ माहेश्वयै नमः । नैर्ऋतिदले ॐ ऋ चामुण्डायै नमः । वरुणदले ॐ लृँ कौमार्यै नमः । वायुदले ॐ ऐँ अपराजितायै नमः । उत्तरदले ॐ औँ वाराह्यै नमः । ईशानदले ॐ अः नारसिंहायै नम इति पाद्यादिभिः सम्पूज्य योगिनीपात्रामृतेन त्रिः सकृद्वा सन्तर्प्य अष्टदलाग्रेषु अष्टभैरवान् पूजयेत्[३१९] ।

यथा पूर्वदलाग्रे ॐ ऐँ ह्रीँ असिताङ्गभैरवाय नमः । ॐ ऐँ ह्रीँ वरदभैरवाय नमः । ॐ ऐँ ह्रीँ चण्डभैरवाय नमः । ॐ ऐँ ह्रीँ क्रोधभैरवाय नमः । ॐ ऐँ ह्रीँ ऊनमत्तभैरवाय नमः । ॐ ऐँ ह्रीँ संहारभैरवाय नमः । ॐ ऐँ ह्रीँ कपालभैरवाय नमः । ॐ ऐँ ह्रीँ भीषणभैरवाय नमः । ॐ ऐँ ह्रीँ सँहारभैरवाय नमः । ॐ ऐँ ह्रीँ सङ्कर्षण भैरवाय नमः । इति क्रमेण पाद्यादिभिः सम्पूज्य भैरवपात्रामृतेन त्रिः सकृद्वा तत्त्वमुद्रया सन्तर्प्य ततो दिक्पालान् प्रपूजयेत्[३२०] । ॐ ऐँ ह्रीँ[३२१] इन्द्राय सुराधिपतये श्यामवर्णाय ऐरावतासनाय वज्रहस्ताय नम इति संपूज्य रँ वह्नये तेजोधिपतयेछागवाहनाय शक्तिहस्ताय नमः इति सम्पूज्य, यँ यमाय प्रेताधिपतये महिषवाहनाय दण्डहस्ताय नम इति सम्पूज्य इति पूर्ववत् सम्पूज्य, नैर्ऋतदिशि क्षँ नैर्ऋतये रक्षोधिपतये अश्ववाहनाय खड्गहस्ताय नमः इति सम्पूज्य, वँ वँ वरुणाय जलाधिपतये मकरवाहनाय पाशहस्ताय नम इति पूर्ववत् सम्पूज्य, वायव्ये यँ वायवे वाय्वधिपतये मृगवाहनाय अङ्कुशहस्ताय नमः इति पूर्ववत् सम्पूज्य, उत्तरे कुँ कुबेराय नरवाहनाय गदाहस्ताय नमः इति पूर्ववत् सम्पूज्य वँ वरुणाय जलाधिपतये मकरवाहनाय पाशहस्ताय नम इति सम्पूज्य, वायव्ये हौँ ईशानाय भूताधिपतये शूलहस्ताय वृषवाहनाय नम इति पाद्यादिभिः पूजयित्वा इति क्रमेण दिक्पालान् ततो देव्यस्त्राणि पूजयेत् ।

यथा वामोर्ध्वहस्ते ॐ खड्गाय नमः[३२२] । तदधो हस्ते मुण्डाय नमः । दक्षिणोर्ध्वहस्ते ॐ अभयाय नमः । तदधोहस्ते ॐ वराय नमः । इति सम्पूज्य घटस्थद्रव्यं देव्यै निवेद्य पुनर्देवीं पूजयेत् । देवीपात्रामृतेन सन्तर्प्य धूपदीपादिकञ्च पुनर्दद्यात् । ॐ घण्टायै नम इति घण्टां सम्पूज्य प्राणायामं षडङ्गन्यासं विधाय मुद्रां प्रदर्श्य मालया वा करेण वाष्टोत्तरशतं विंशतिर्वा सञ्जप्य गुह्यादिना मन्त्रेण देवीवामहस्ते शङ्खामृतेन समर्प्य यथाशक्त्या स्तुत्वा पूर्ववत् जप्त्वा तत्परिवारान् तस्यामेव लीनं विभाव्य गुरून् स्वशिरसि देवीं हृदये वा समर्प्य वामभागे निर्माल्यवासिनीं निर्माल्येन सम्पूज्य पुष्पयन्त्रलेपं शिरसि निधाय यथासुखं बलिं विरहेदिति ।

इति श्रीराघवभट्टविरचिते कालीतत्त्वे पूजाप्रतिपादनन्नाम पञ्चमतत्त्वम् ।

---

३१५ *तदन्तास्त्रिकोणे-ख, ग ।*

३१६ *तदन्तास्त्रिकोणे पूर्ववत्-ख ।*

३१७ *मुद्रमिता-ख ।*

३१८ *ब्राह्मयै नमः-ख ग ।*

३१९ *यजेत्- ख, ग ।*

३२० *पूजयेद्यथा-ख ग ।*

३२१ *लं अधिकपाठः गमातृकायाम् ।*

३२२ *तदधोहस्ते मुद्रायै नमः-ख, थ ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

[३२३]द्रव्यशुद्धिविधिरुच्यते

तदुक्तं विजयाकल्पे–

संविदासवयोर्मध्ये[३२४] संविद्देवि गरीयसी।

सा पुनश्च चतुर्विधा तदुक्तं तत्रैव। ब्राह्मणक्षत्रियवैश्यशूद्राँश्चेति श्वेतरक्तपीतकृष्णपुष्पभेदतः[३२५]।

संविदे ब्रह्मसम्भूते ब्रह्मपुत्रि सदानघे।

भैरवानाञ्च दत्तार्थ[३२६]पवित्रा भव सर्वदा॥

ॐब्रह्माण्यै नमः स्वाहेति मन्त्रेण ब्राह्मणीं शोधयेदिति।

सिद्धिमूलक्रिये[३२७] देवि हीनबोधप्रबोधिनि।

राजाप्रजावशंकरि शत्रुकण्ठनिषूदिनि॥

ऐँ क्षत्रियायै नमः स्वाहेति शोधयेदपरां ततः।

अज्ञाने धनदीप्ताग्ने[३२८] ज्ञानाग्नौ ज्ञानरूपिणि।

अज्ञानस्याकृतिं प्रीतिं[३२९] सम्यज्ज्ञानं प्रयच्छ मे॥

ॐ ह्रीं वैश्यायै नमः स्वाहा शोधयेत्तु ततः परा।

नमस्यामि नमस्यामि योगमार्गप्रदर्शिनिम्।

त्रैलोक्यविजये मातः समाधिफलदा[३३०] भव॥

क्लीं शूद्रायै नमः स्वाहेति मन्त्रमुत्तमम्॥

यद्वैकेन मन्त्रेण सर्वाः शोधयेत् । तदुक्तं तत्रैव–

ॐ अमृते अमृतोद्भवे अमृतवर्षिणि[३३१]पदन्ततः।

अमृतमाकर्षय द्वन्द्व सिद्धिं देहि पदन्ततः॥

सर्वमेवो ततो ब्रूयाद्वशमानय ततः परम्।

द्विठान्तोऽयं मनुः प्रोक्तः चतुर्णाञ्चैव साधने[३३२]॥

उत्तरातन्त्रे च सर्वसाधारणं प्रकारान्तरमपि–

मूलमन्त्रं सप्तवारं तस्योपरि नियोजयेत्।

आवाहनादिमुद्राञ्च धेनुयोनिं ततः परम्॥

---

३२३ *ॐ नमः श्रीकालिकायै-ख, ग।*

३२४ *सम्विदानन्दयोः-ख, ग।*

३२५ *ब्राह्मणीक्षत्रियावैश्याशूद्रांश्चेति श्वेतरक्तपीतकृष्णपुष्पभेदतः।*

३२६ *दता त्वं-ख।*

३२७ *सिद्धिमौलिश्रिये देवि–ख, ग।*

३२८ *दीप्ता च- ख, ग।*

३२९ *अज्ञानस्याकृतं प्रीतिः-ख।*

३३० *वरदा भव- ख, ग।*

३३१ *अमृतवर्षिणि- ख, ग।*

३३२ *चतूर्णां चैव शोधने-ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दिग्बन्धनं छोटिकाभिस्तालत्रयपुरःसरम्।
दिव्यदृष्ट्या तथा पार्ष्णिघातैर्विघ्नान् विघातयेत्॥
सप्तधा तर्पयेत् ब्रह्मरन्ध्रे मूलं समुच्चरन्।
गुरुपद्मे[३३३]सहस्रारे तथा च तत्त्वमुद्रया[३३४]॥
त्रिधैव तर्पयेद् भक्त्या साधकः सिद्धमानसः।
ऐँ वद वद पदं ब्रूयात् वाग्वादिनिपदं ततः॥
मम जिह्वाग्रे स्थिरीति भव सर्वपदं ततः।
सत्त्वं वशंकरि स्वाहा मन्त्रेण जुहुयान्मुखे॥

इतिविजयाशोधनम्।

अथ कुलद्रव्यशुद्धिः

तत्रादौ शापमोचनं कुर्यात् तदुक्तं कुमारीतन्त्रे–

अन्यच्च श्रृणु देवेशि यथा कुलादिकर्मणि।
हानि[३३५]रक्षायते येन तान् वै मन्त्राञ्छृणुस्व मे॥
एकमेव परं ब्रह्मस्थूलसूक्ष्ममयं ध्रुवम्।
कचोद्भवां ब्रह्महत्यां तेन तां नाशयाम्यहम्॥
सूर्यमण्डलसंभूते वरुणालयसम्भवे।
अमाबीजमये देवि शुक्रशापाद्विमुच्यते[३३६]॥
वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि।
तेन सेवनतो देवी[३३७]ब्रह्महत्यां व्यपोहति[३३८]॥
एवं मन्त्रत्रयेणैव अभिमन्त्र्यं कुलं सुभम्।
प्रदद्यात् चण्डिकायै[३३९]च ततो नैवेद्यमुद्धरेत्॥

ब्राँ ब्रीं ब्रूँ ब्रौं ब्रः[३४०] ब्रह्मशापविमोचितायै सुधादेव्यै नमः। इतिदशवारं पठेदिति। इति ब्रह्मशापविमोचनम्। ततः[३४१] क्राँ क्रीं क्रूँ क्रैं क्रौं क्रः स्वाहेति कृष्णशापविमोचनम्। ततो द्रव्यमध्ये आनन्दभैरवानन्दभैरव्यौ ध्यायेत्[३४२]।

तद्यथा–

कोटिसूर्यप्रतीकाशं चन्द्रकोटिसुशीतलम्।

---

३३३ *गुरुं पद्मे- ख,ग।*
३३४ *तथा तत्त्वाख्यमुद्रया- ख, ग।*
३३५ *हानि र्न जायते –ख, ग।*
३३६ *विमुच्यताम्- ख, ग।*
३३७ *तेन तेन पदं देवि-ख, ग।*
३३८ *व्यपोहतु- ख।*
३३९ *चण्डिकायेव-ख, ग।*
३४० *रैं, रौं, रः,- ख , ग।*
३४१ *ह्राँ ह्रीं ह्रुँ ह्रैं ह्रौं ह्रः कुलकृष्णशापं विमोचय अमृतं श्रावय श्रावय पाठ भेद-ख, ग।*
३४२ *भावयेत्- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अष्टादशभुजं देवं पञ्चवक्त्रं त्रिलोचनम् ॥
अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरिस्थितम् ।
वृषारूढं नीलकण्ठं सर्वाभरणभूषितम् ॥
कपालखड्गाङ्गधरं घण्टाडमरुवादिनम् ।
पाशाङ्कुशधरं देवं गदाशूलकधारिणम् ॥
खड्गखेटकपट्टीशमुद्गरं शूलदण्डकम् ।
विचित्रखड्गकं मुण्डं वरदाभयपाणिनम् ।
लोहितं देवदेवेशं भावयेत् साधकोत्तमः ॥

एवं ध्यात्वा हैं आनन्दभैरवाय वषडित्यानन्दभैरवं वारत्रयं पूजयेदिति ।

भावयेच्च सुधां देवीं सँ चन्द्रकोटियुतप्रभाम्[३४३] ।
हिमकुन्देन्दुधवलां क्षें पञ्चवक्त्रां त्रिलोचनाम् ॥
अष्टादशभुजैर्युक्तां मँ सर्वानन्दकरोद्यताम् ।
प्रहसन्तीं विशालाक्षीं लँ देवदेवस्य सम्मुखीम् ॥

एवं ध्यात्वा हसक्षमलवरयूँ सुधादव्यैः वौषडिति आनन्दभैरवीं सम्पूज्य, द्रव्यमध्ये त्रिकोणचक्रं विलिख्य वामावर्तेन[३४४] पश्चिमकोणादारभ्य दक्षिणकोणपर्यन्तम् अकारादिषोडशाक्षरं दक्षिणकोणादुत्तरपर्यन्तं कादिषोडशान्तमक्षरं उत्तरादिपश्चिमपर्यन्तं थादिषोडशाक्षरम् हँ लँ क्षं त्रीन् विलिख्य ततः शिवशक्तिसमागमाद् द्रव्यमध्ये अमृतत्वं विचिन्त्य धेनुमुद्रया अमृतीकृत्य वमिति वरुणबीजं मूले अष्टधा पात्रेऽष्टधा जपेदिति । तदुक्तं स्वतन्त्रतन्त्रे–

ततश्च भावयेद् द्रव्यं चन्द्रकोटिनिभं[३४५] प्रिये ।
अकथादित्रिपङ्क्त्या तु हलक्षमध्यमण्डितम् ॥
पूर्वोक्तयोनिमुद्रायां शिवशक्त्या[३४६]समागमम् ।
अमृतं चिन्तयेद् द्रव्ये अष्टधा अमृतं जपेत् ॥
अष्टधा मूलमन्त्रञ्च घटं धृत्वा जपेत् ततः ।
एतत्तु कारणं देवि सुरसङ्घनिसेवितम् ॥
अत एव तस्य नाम सुधेति भुवनत्रये ।
तस्य गन्धप्रकाशस्तु तेन गन्धेन कौलिकः ।
न पूजयेत् सुरां देवीं कालिकां दक्षिणां शिवाम् ॥

इति द्रव्यशुद्धिः ।

अथ मांसशुद्धिः

मांसं त्रिविधं भवति । तदुक्तं यामलतन्त्रे–

मांसञ्च त्रिविधं देवी जलखेचरभूचरम् ।

---

३४३ *चन्द्रकोट्यमृतप्रभाम्- ख, ग ।*
३४४ *वामावर्तेन पश्चिमकोणान्मातृकां विलिख्य ततः- ख, ग ।*
३४५ *ततश्च भावयेद् द्रव्यं रक्तं रक्तनिभिं प्रिये- ख, ग ।*
३४६ *शिवशक्त्योःसमागमम्-ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
गोनरेभाश्वमाहिषवराहाजामृगोद्भवम् ।
महामांसाष्टकं प्रोक्तं देवताप्रीतिकारणम् ॥
तदभावे तदनुकल्पः, तदुक्तं समयाचारे[३४७]–
ॐप्रतद्धियास्तवते वीर्य्येणमृगोनभीमः कुचरो गविष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि यि स्वाहेति मन्त्रेण मासं शोधयेदिति ।

अथ मत्स्यशुद्धिः
तदुक्तं तत्रैव– ॐत्र्यम्बकमिति ।
मत्स्यञ्च त्रिविधं प्रोक्तमुत्तमाधममध्यमम् ।
उत्तमं त्रिविधं देवी शालपाठीनरोहिताः ॥
प्रवीणं कण्टकैर्हीनं तैलोक्तं स्वादुसंयुतम् ।
देव्याः प्रीतिकरञ्चैव मध्यमं तदुदीरितम् ।
क्षुद्राणि तानि सर्वाणि अधमान्याहुरुत्तमाः[३४८] ॥
ॐत्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् । उर्व्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् । इति मन्त्रेण मत्स्यं शोधयेदिति ।
अथ मुद्राशुद्धिः
तदुक्तं कुलार्णवे–
व्रैहेयं मण्डलाकारं चन्द्रबिम्बनिभं शुभम् ।
चारुपङ्कमनोहारि शर्कराद्यैः प्रपूरितम् ।
पूजाकाले देवतायै[३४९] एता मुद्राः प्रकीर्तिताः ॥
ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीवचक्षुराततं तद्विप्रानौ विपन्नवोजागृवांसः समिन्धते विष्णो र्यत्परमं पदम् । इति मन्त्रेण मुद्रां शोधयेदिति ।
अथ कुण्डगोलोद्भवशुद्धिः
विष्णुर्योनिं कल्पयेदिति ?
प्लूँ ज्लूँ प्लूँ ग्लूँ स्वाहा अमृतो अमृतोद्भवे अमृतवर्षिणि अमृतं श्रावय श्रावय स्वाहेति मन्त्रेण कुण्डगोलोद्भवोत्पत्तिः[३५०] पदेकतत्त्वोक्तप्रकारेणशोधयेदिति ।
अथ तत्त्वशुद्धिः
तदुक्तं श्रुतौ ॐ **प्राणोपानव्यानोदानसमानोमे दान समानाः मे शुध्यन्ताम् । ज्योतिरहं विरजामि विपाप्मा भूयांस स्वाहा ।**
ॐ पृथिव्यप्तेजोवाय्वाकाशानि मे शुध्यन्तां ज्योतिः ।
प्रकृत्यहंकारबुद्धिमनःश्रोत्राणि मे शुध्यन्तां ॥

---
३४७ *लवणार्द्रकपिम्पाकगोधूममाषपञ्चमम् । लसुनञ्च महेशानि मांसप्रतिनिधौ स्मृतम् ॥ अधिक पाठः ख, ग ।*
३४८ *मत्स्यञ्चेत्यारभ्य अधमान्याहुरुत्तमापर्यन्तपाठः- ख, गमातृकायां नास्ति ।*
३४९ *देवतानाम्- ख ।*
३५० *कुण्डगोलोद्भवादिकं शोधयेदिति- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

त्वक्चक्षुः श्रोत्रजिह्वावचांसि मे शुध्यन्तां।

स्पर्शरूपगन्धाकाशानि मे शुध्यन्तां।

वायुः तेजः सलिलभूम्यात्मनो मे शुध्यन्तां॥

इति सप्तमन्त्रैर्हस्ताभ्यां सर्वाङ्गाणि मार्जयेदिति । [351]दक्षहस्ते त्रिकोणं विलिख्य कानयसदृशीं शुद्धिं त्रिकोणदक्षोत्तरसन्मुखमध्येषु निधाय वामहस्ताङ्गुष्ठमध्यमानामायोगे एकां गृहीत्वा मूलमन्त्रिते ह्रीं श्रीं आत्मतत्त्वेन स्थूलदेहं शोधयामि स्वाहा। अनेन शुद्धिं स्वीकृत्य ह्रीं श्रीं विद्यातत्त्वेन सूक्ष्मदेहं शोधयामि स्वाहा। दक्षिणस्थां स्वीकृत्य ह्रीं श्रीं शिवतत्त्वेन स्थूलदेहं शोधयामि स्वाहा। उत्तरस्यां ह्रीं श्रीं सर्वतत्त्वेन सूक्ष्मदेहं शोधयामि स्वाहा। अनेन वामदक्षिणस्थां शुद्धिं स्वीकृत्य वस्त्रेण हस्तौ विशोध्य हस्ताभ्यां सर्वाङ्गे मार्जयेदिति। इति तत्त्वशुद्धिः।

अथ शक्तिशुद्धिः

तदुक्तं कुलतन्त्रे –

अभिषेकाद् भवेच्छुद्धिः मन्त्रस्योच्चारणे[352]श्रुतौ।

रतिकाले महेशानि दीक्षाकाले च कन्यका॥ शुद्ध्यन्तीति विशेषः।

सुधया रेतसा वापि जलेन मनुनापि वा।

सम्भोगेऽभिषिञ्चेन्नारीं रण्डीं वा मन्त्रवर्जिनीम्[353]॥

आदौ मायां समुच्चार्य त्रिपुरायै समुच्चरेत्।

नमः शब्दं समुच्चार्य इमां शक्तिं ततो वदेत्॥

पवित्रीकुरु शब्दान्ते मम शक्तिं कुरु प्रिये।

वह्निकान्तां समुच्चार्य शुद्धिमन्त्रः सुरेश्वरि॥

अनेन मनुना देवी अभिषिक्तास्स्त्रियः सदा।

रममाणेऽभिमन्त्र्य च सर्वसिद्धिमवाप्नुयात्॥

अभिषेकादिति। प्रथमं ह्रीं त्रिपुरायै नमः। इमां शक्तिं पवित्रीकुरु मम शक्तिं कुरु स्वाहा। इति मन्त्रेण जलादिना अभिषिञ्च्य शनैः शनैः स्वाहेत्थं निजं मन्त्रं जपन् रतिं कुर्यादिति। रत्यर्थं शक्तिशुद्धिः । दीक्षाकाले पूजाकाल इत्यर्थः। यद्वा तासां प्रथमं दीक्षार्थं जलादिना उक्तमन्त्रेणाभिषिञ्चेदिति दीक्षार्थं शक्तिशुद्धिः। दीक्षिता शक्तिः सदा सर्वकर्मणि शुद्धैव। तदुक्तं यामलादौ।

सन्दीक्षिता तु या शक्तिः सैव शुद्धा भवेत् सदा।

अदीक्षिता तु या शक्तिः मायान्तस्यै[354] निवेदयेत्।

अथवोक्तविधानेन शोधयेच्छक्तिमुत्तमाम्॥

अन्यत्रापि–

तस्मात् सर्वप्रयत्नेन दीक्षयेच्छक्तिमुत्तमाम्[355]॥

---

३५१ दक्षहस्त इत्याद्यारभ्य .....मार्जयेदिति पर्यन्तपाठः- ख, ग, मातृकायां नास्ति।

३५२ अभिशेकाद् मन्त्रस्योच्चारणात् श्रुतौ- ख, ग।

३५३ रण्डां वा मन्त्रवर्जिताम्- ख, ग।

३५४ मायान्तस्यै निवेदयेत्-ख, ग।

३५५ दीक्षयेत् निजकौलिकीम्- ख , ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

इत्यादि गुरुवचनाच्च अभिषेकमन्त्रेणैव स्वाभिन्नबुद्ध्या स्वमन्त्रेण मायाबीजेन वा दीक्षयेत् इत्येव शुद्धिः[३५६]। मातङ्गीतन्त्रेऽप्युक्तम्[३५७]–

दीक्षामात्रेण शुद्ध्यन्ति स्त्रियः सर्वत्र कर्मणि । इति। अत्र मात्रपदेन अभिषेकस्य व्यतिरेके प्रत्ययादभिषेकोऽपि स्वातन्त्रद्रव्यशुद्धिहेतुः । अत एव अभिषेक इति स्वातन्त्रैव हेतुता प्रतीयत इत्याहुः[३५८]। शक्तिशुद्धिस्त्वावश्यकी अन्यथा निन्दाश्रवणात् तदुक्तं समयाचारे –

असंस्कृतां तु यः शक्तिं पूजयेद्रमयेदथ।
पचते नरके घोरे सिद्धिञ्चापि न विन्दति ॥ इत्यादिवचनश्रवणाद्।

इति श्रीराघवभट्टविरचिते कालीतत्त्वे द्रव्यशुद्धिप्रतिपादनन्नाम षष्ठतत्त्वम्।

---

३५६ *गुरुचरणोक्ताभिषेकमन्त्रेणैव स्वभेदेन स्वमन्त्रेण मायाा बीजेन वा दीक्षयेदित्येवशुद्धिः- ख, ग।*

३५७ *मातङ्गिनीतन्त्रेऽप्युक्तम्- ख, ग।*

३५८ *अत्र मात्रपदेन अभिषेकस्य व्यतिरेकप्रत्ययादभिषेकोऽपि स्वतन्त्रशुद्धिहेतुः। अत एव अभिषेकादिस्वतन्त्रैव हेतुता प्रतीयत इत्याहुः - ख।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सप्तमतत्त्वम्

अथ कुण्डोगोलोद्भवोपत्तिविधिरुच्यते

तदुक्तं स्वातन्त्रतन्त्रे–

आनीय शोभनां बालां कुलामृतरसाय च।
प्रसूनतूलिकामध्ये कुलपुष्पं हरेद्यथा॥
वाग्भवं कामबीजञ्च श्रीबीजं कामराजकम्।
हंसहेमात्मकं दत्त्वा आधारशक्तिमुच्चरेत्॥
श्रीपादुकां ततो दत्त्वा पूजयामि वदेत् ततः।
दक्षपादतले देवि पूजयेन्मनुनामुना॥
अनेन मनुना तस्या ललाटेषु मनोहरम्।
त्रिकोणं तत्र संलिख्य सिन्दूरादिविशेषतः॥
वटुकं योगिनीञ्चैव क्षेत्रपालं गणेश्वरम्।
लक्ष्मीं सरस्वतीञ्चैव पूजयेत्तत्र सुन्दरि॥
कामबीजं समुच्चार्य कामबीजं ततः परम्।
श्रीपादुकां ततो दत्त्वा पूजयामि वदेत्ततः॥
दक्षपादतले देवि पूजयेन्मनुनामुना।
वसन्तं तं[३५९] समुच्चार्य नादहीनरमां ततः॥
पादुकां पूजयामीति तस्या वामकरे न्यसेत्।
शक्तिबीजं समुच्चार्य सामवामपदं[३६०] ततः॥
श्रीपादुकां ततो दत्त्वा पूजयामि स्तनद्वये।
आरोहक्रमतः कामः कलास्याः सञ्चरेत् सुधीः॥
श्रद्धाप्रीतिरतिश्चैव धृतिः कान्तिर्मनोहरा।
मनोरमा मनोरामा मदनोन्मादिनीति च॥
मोहिनी[३६१] दीपनी चैव बोधिनी च वशंकरी।
रञ्जिनी सुभगा देवी शोभना प्रियदर्शना॥
अकारादिस्वरैरर्च्याः कलाकुसुमधन्वनः।
पूषार्यमा सुमना[३६२] रतिः प्रीतिस्तथा धृतिः॥
सौम्या मरीचिश्च दशमी तथा चैवांशुमालिनी।
अङ्गिरा शशिनी चैवच्छाया सम्पूर्णमण्डला॥
पुष्टिश्चैवमृता चैव कलाः षोडश षोडश।

---

३५९ *च समुच्चार्य नादहीनां रमाम्- ख, ।*
३६० *सामपादपदं- ख।*
३६१ *नन्दिनी- ख।*
३६२ *सुमनसा- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अकारादिस्वरयुताः पूजयेत् प्रयतः सुधीः ॥
पृष्टवंशयात् समारभ्य शिरोन्तं काम चापकम् ।
विन्यस्य विधिवन्मन्त्री पूजयेत् तत्तु मूर्द्धनि ॥
धर्मात्मकं समुच्चार्य कामचापपदं ततः ।
पादश्रीपादुकां दत्त्वा पूजयामीति पूजयेत् ॥
मूर्द्धिन पादे मुखे गुह्ये हृदयेषु तथा क्रमात् ।
पञ्चबाणैः पञ्चबाणान् यथास्थानेषु पूजयेत् ॥
द्राँ द्रावणपदं दत्त्वा वामपादे पदं ततः ।
पदे श्रीपादुकां दत्त्वा पूजयामीति पूजयेत् ॥
कामबीजं पदं दत्त्वा मोहबाणपदन्ततः[३६३] ।
क्लीमात्मकं समुच्चार्य सन्दीपनपदं ततः ॥
बाणपादपदं[३६४] तदा दत्त्वा श्रीपादुकां ततो वदेत् ।
पूजयामीति सम्पूज्य शोषणं पदमुच्चरेत्[३६५] ॥
शोषणञ्च समालिख्य बाणपादपदं[३६६] ततः ।
बाणपदे पदं दत्त्वा पूजयामीति पूजयेत्[३६७] ।
श्रीपादुकं ततो दत्त्वा पूजयामीति पूजयेत् ।
ललाटे मण्डलं पश्चात् त्रिकोणं पूजयेत्ततः ॥
वाग्भवं शुभपादञ्च श्रीपादुकां ततो वदेत् ॥
पूजयामि ततो दत्त्वा दक्षरेखासु पूजयेत् ॥
स्त्रीमात्मकं समुच्चार्य भगपादपदं ततः ।
श्रीपादुकां ततो दत्त्वा पूजयामीचि पश्चिमे ॥
कामबीजं समुच्चार्य भगसर्पिपदं ततः ।
श्रीपादुकां ततो दत्त्वा पादुकाञ्च ततो वदेत् ॥
पूजयामीति सम्पूज्य पूजयेद्वामपाश्वर्के ।
हसमात्मकमालिख्य भगावह ततः पदम् ॥
पदेश्री पादुकां दत्त्वा पूजयेद् मध्यदेशके[३६८] ।
उड्डीशीतिपदं दत्त्वा उड्डीशीति ततः परम् ॥[३६९]

---

३६३ *तदा- ख ।*
३६४ *बाणपदे- ख ।*
३६५ *शोषणवाणमुच्चरेत्- ख ।*
३६६ *बाणपदे- ख, ग ।*
३६७ *अयं श्लोकः कमातृकायां नास्ति ।*
३६८ *मध्यदेशतः- ख, ग ।*
३६९ *पादश्रीपादुकां दत्त्वा पूजयामीति मस्तके ।*
श्रीपदं त ततो दत्त्वा कामेश्वरीपदं ततः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नाथदेवपदं दत्त्वा रक्ताम्बा च ततो वदेत्।
श्रीचर्यनाथमालिख्य पदेश्रीपादुकां ततः ॥
पूजयामीति सम्पूज्य पूजयेच्च हृदि सुते।
श्रीपदञ्च समालिख्य जालन्धरपदं ततः ॥
महापीठे समालिख्य नादहीनरमां[३७०] ततः।
जालेशीति पदं दत्त्वा जालीशमालिखेत्ततः[३७१] ॥
नाथदेवपदं दत्त्वा श्रीजालाम्बापदं ततः।
श्रीषष्ठीश पदं दत्त्वा नाथदेवपदं तत ॥
पादश्रीपादुकां दत्त्वा पूजयामि ततो वदेत्।
अनेन मनुना देवि पूजयेन्नाभिमण्डले[३७२] ॥
श्रीपदं च ततो दत्त्वा पूर्णेश्वरीं ततो वदेत्।
देवीश्रीपूर्णनाथञ्च वदेच्च भक्तितस्ततः ॥
ब्लौं ब्लुं ब्लः इति समुच्चार्य मन्त्रेण साधकोत्तमः।

देवीश्री श्रीपदमालिख्य कामेश्वरी नन्दनाथ च।
श्रीमहामाभाष्यपुष्टाम्बा श्रीपदं च ततो वदेत् ॥
मित्रीशनाथपदमालिख्य पादश्रीपादुकां ततः।
पूजयामि ततो दत्त्वा पूजयेत् कामशासने ॥
गुह्यपीठस्य वामे तु गुरुपङ्क्ति यजेत् सुधीः।
अनङ्गकुसुमादिभ्यो क्लीं सरोजे यजेत् पुनः
देवीश्री श्रीपादमालिख्य कामेश्वरीनन्दनाथ च।
श्रीमहामाभाष्यपुष्टाम्बा श्रीपदं ततः।
मित्रीशनाथपदमालिख्य पदेश्रीपादुकां ततः।
पूजयामि ततो दत्त्वा पूजयेत् कामशासने।
गुह्यपीठस्य वामे तु गुरुपङ्क्तिं यजेत् सुधीः।
अनङ्गकुसुमादिभ्यो ॥ अधिकपाठः -ख ॥
३७० *नादहीनां रमां ततः- ख।*
३७१ *देवी जालीशमालिखेत्- ग।*
३७२ *देवीश्रीपूर्णनाथं देव चामुण्डापदमात्माभाष्यदेवीश्रीपदमालिखेत्।*
उड्डीशपदमालिख्य देवपादं ततः परम् ॥
श्रीपादुकां ततो दत्त्वा पूजयामीति मस्तके।
श्रीपदञ्च ततो दत्त्वा कामेश्वरीपदं ततः ॥
देवीश्री श्रीपादमालिख्य कामेश्वरीनन्दनाथ च।
श्रीमहामाभाष्यपुष्टाम्बा श्रीपदं ततः।
मित्रीशनाथपदमालिख्य पदे श्रीपादुकां ततः।
पूजयामि ततो दत्त्वा पूजयेत् कामशासने।
गुह्यपीठस्य वामे तु गुरुपङ्क्तिं यजेत् सुधीः।
अनङ्गकुसुमादिभ्यो क्लीं सरोजे यजेत् पुनः
वाग्भवं ,,,, समुच्चार्य क्लीमात्मको वदेत् ततः ॥ अधिकपाठः ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
योनिमुद्रां प्रदर्श्याथ योनौ क्षोभं विचिन्तयेत् ॥
वाग्भवं कामराजञ्च स्त्रीबीजं तदनन्तरम् ।
क्षोभस्त्रीनामविद्येयं[३७३] स्तनयोः क्षोभमाचरेत् ॥
योनिमुद्रां प्रदर्श्याथ शनैरिति[३७४] च साधकः ।
वाग्भवं स्लुँ समुच्चार्य ब्लैं ब्लीँ च ततो वदेत् ॥
क्लौमात्मकं समुच्चार्य ह्रीमात्मकं समुच्चरेत् ।
क्षमात्मकं ततो दत्त्वा तस्याः क्षोभं विचिन्तयेत् ॥
द्राविणीनामविद्येयं भ्रुवोर्मध्ये विचिन्तयेत् ।
मूलमन्त्रैः पञ्चवारं ततो योनौ विचिन्तयेत् ॥
चेतनीनामविद्येयं चिन्तयेद्योनि मध्यतः ।
परानन्दमयो भूत्वा निर्भरानन्दमानसः ॥
चिन्तयेन्निजविद्याया बीजं मूर्ध्नि सरोजके ।
ततस्तस्या योनिमध्ये मूलमन्त्रैश्च साधकः ॥
पुष्पाञ्जलिं ततो[३७५] दत्त्वा ततः क्षोभं विचिन्तयेत् ।
स्वयमक्षुभितो मन्त्री शक्तिक्षोभं विचिन्तयेत् ॥
कल्लोलिनीकाननकन्दरादौ दुर्गाश्रमे वार्पितचित्तवृत्तिः ।
मृदुक्रमारम्भरतिः स्ववीर्यं ततोऽपि दीर्घं रमते रतिषु ॥
कुलामृतञ्च यन्नाम[३७६] गृहीत्वा दुर्लभं नरैः ।
तेनामृतेन दिव्येन तर्पयेच्च त्रिलोचनाम् ॥
सान्निध्यादीक्षणाद्वापि प्रीता सिद्धिं प्रयच्छति ।
समस्तदेवतानाञ्च तर्पणाच्च सदामृतैः ॥
गुरूणां साधकानाञ्च सर्वेषां तर्पणं चरेत् ।
तेनामृतेन दिव्येन सर्वे तुष्टा भवन्ति च ॥
यत्कामं कुरुते मन्त्री तत्क्षणात्तत्प्रसिध्यति ।
अर्थाद्वा कामुकाद्वापि लौल्याद्वापि च यो नरः ॥
लिङ्गयोनिरतो मन्त्री रौरवं नरकं व्रजेत् ।
पूजाकालं विना यस्तु पश्येच्छक्तिं दिगम्बराम् ।
अल्पायुश्च हतश्रीश्च निष्कीर्तिश्च न संशयः ॥
एतदभावे अनुकल्पमपि कुर्यादिति । तदुक्तं भावचूडामणौ–

---

३७३ *क्षोभिणीनामविद्येयं- ख, ग ।*
३७४ *शनैरेव च- ग ।*
३७५ *त्रयं- ग ।*
३७६ *यत्नात् गृह्णीयात्- ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

अपरापुष्पमध्ये[३७७] तु कुलस्थानं मनोहरम्।
हयारिकुसुमे वापि स्वयमस्ति सदाशिवः ॥
तन्मध्येऽनघमादाय पुष्पमध्ये तु चन्दनम्।
रक्तकुङ्कुमरागं वा दत्त्वा तत्र शिवाम्बिके[३७८] ॥
योजयेच्छिवशक्त्योश्च ऐक्यं संभावयेद्[३७९] धिया।
क्षणं विचिन्त्य तत्रैव सञ्चिन्त्य परमेश्वरि ॥
दत्त्वा तदेव कुण्डोत्थं द्रव्यं परमदुर्लभम्।
अमृतादधिकं ज्ञेयमेतद्द्रव्यं तु साधकैः ॥

इति कुण्डगोलोद्भवोत्पत्तिः ॥

अथ पद्धतिः

प्रसूनतूलिकोपरि[३८०] शक्तिं संस्थाप्य ऐं क्लीं श्रीं ह्रीं आधारशक्तिश्रीपादुकां पूजयामीति सिन्दूरेण तस्याः शिरसि त्रिकोणं निर्माय ॐ मदिरार्णवपादुकां पूजयामि, ॐ प्रेतासनपादुकां पूजयामि। क्ष्यां पङ्केरुहासनपादुकां पूजयामि। ॐ महाप्रेतासनपादुकां पूजयामि। इत्युपर्युपर्यासनानि संपूज्य तत्र कम्बलासनमास्तीर्योपविश्य भुवि मण्डलानि[३८१] चतुरस्राणि विधाय च तत्र वाँ वटुकनाथपादुकां पूजयामि। याँ योगिनीपादुकां पूजयामि। क्षाँ क्षेत्रपालपादुकां पूजयामि। गाँ गणेश्वरपादुकां[३८२] पूजयामि। इति पूर्वादिक्रमेण पूजयित्वा पुरतो चतुरस्रमण्डलं विधाय श्रीं लक्ष्मीपादुकां पूजययामि। ऐं सरस्वतीपादुकां पूजयामि। इति सम्पूज्य तस्या दक्षपादे[३८३] क्लीं कामराजपादश्रीपादुकां पूजयामि। सौंः सोमपादश्रीपादुकां पूजयामि। स्तनयोः सम्पूज्य कामकलां न्यसेत्। यथा – ॐ अँ श्रद्धाकलाश्रीपादुकां पूजयामि दक्षपादाङ्गुष्ठे। ॐ आँ प्रीतिकलाश्रीपादुकां पूजयामि पादपृष्ठे। ॐ इँ रतिकलाश्रीपादुकां पूजयामि गुल्फे। ॐ ईँ धृतिकलाश्रीपादुकां पूजयामि जङ्घे। ॐ उँ कीर्तिकलाश्रीपादुकां पूजयामि जानुनि। ॐ मनोरमाकलाश्रीपादुकां पूजयामि उरुमूले[३८४]। ॐ ॠँ मनोवश्याकलाश्रीपादुकां पूजयामि नितम्बे। ॐ लृँ मनोन्मादिनीकलश्रीपादुकां पूजयामि कट्यां। ॐ लॄँ मोहिनीकलाश्रीपादुकां पूजयामि स्तने। ॐ ऐं दीपनीकलाश्रीपादुकां पूजयामि कक्षायाम्। ॐ ऐँ रोधिनीकलाश्रीपादुकां पूजयामि कण्ठे। ॐ ओँ वशीकरीकलाश्रीपादुकां[३८५] पूजयामि कर्णमूले। ॐ औँ रञ्जिनीकलाश्रीपादुकां पूजयामि कपोले। ॐ अँ शुभगोकलाश्रीपादुकां पूजयामि नेत्रे। ॐ अँः प्रियदर्शनीकलाश्रीपादुकां पूजयामि शिरसि। इत्येवमेताः कलाः सम्पूज्य सोमकलां[३८६] पूजयेद्यथा–

---

३७७ अपराजितापुष्पमध्ये- ग।
३७८ शिवात्मिके- ग।
३७९ ऐक्यं तं भावयेद् धिया- ग।
३८० प्रसूनतुलिकोपरि- ख, ग।
३८१ भूवि परितो मण्डलानि- ख, ग।
३८२ गणपतिश्रीपादुकां- ग।
३८३ दक्षपादतले- ख।
३८४ उरुमध्ये- ख, ग।
३८५ वंशकरी- ग।
३८६ कलाः- ख, ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ॐ अँ पूषाकलाश्रीपादुकां पूजयामि शिरसि । ॐ आँ अर्यमाकलाश्रीपादुकां पूजयामि वामनेत्रे । ॐ इँ सुमनाकालश्रीपादुकां पूजयामि दक्षनेत्रे । ॐ ई रतिकलाश्रीपादुकां पूजयामि कर्णमूले । ॐ उँ प्रतिकलाश्रीपादुकां पूजयामि गले । ॐ ऊँ धृतिकलाश्रीपादुकां पूजयामि कक्षायाम् । ॐ ऋँ सौम्याकलाश्रीपादुकां पूजयामि स्तने । ॐ ॠँ मरीचिकलाश्रीपादुकां पूजयामि कट्याम् । ॐ लृँ दशमीकलाश्रीपादुकां पूजयामि उरुमूले[३८७] । ॐ लॄँ अँशुमालिनीकलाश्रीपादुकां पूजयामि उरुमूले । ॐ एँ अङ्गिराकलाश्रीपादुकां पूजयामि उरुमध्ये । ॐ ऐं शशिनीकलाश्रीपादुकां पूजयामि उरुमध्ये[३८८] । ॐ औं छायाकलाश्रीपादुकां पूजयामि जङ्घायाम् । औं पूर्णमण्डलकलाश्रीपादुकां पूजयामि गुल्फे । ॐ अँ तुष्टिकलाश्रीपादुकां पूजयामि पृष्ठे । ॐ अँः अमृताकलाश्रीपादुकां पूजयामि वामपादाङ्गुष्ठे । इति विन्यस्य । ॐ धूँ कामचापश्रीपादुकां पूजयामीत्यनेन मन्त्रेण पृष्ठवंश्यादारभ्य चापाकारेण मस्तकपर्यन्तं विन्यसेत्[३८९] ।

द्राँ द्रावणबाणश्रीर्मूर्ध्नि, ह्रीं ह्रीं ऊनमादिनीबाणश्रीः पादयोः । क्लीं मोहनबाणश्री वक्त्रे । क्लौँ[३९०] सन्दीपनबाणश्रीः गुह्ये । सँः शोषणबाणश्रीः हृदि । एवं क्रमेण विन्यस्य ललाटेभ्योऽ[३९१]ग्रे त्रिकोणं पूजयेत् ।

तद्यथा ॐ सुभगपादश्रीपादुकां पूजयामि दक्षरेखायाम् । श्रीभगपादश्रीपादुकां पूजयामि पश्चिमरेखायाम् । क्लीं भगसर्पिणीश्रीपादुकां पूजयामि वामरेखायाम् । सौः भगावहश्रीपादुकां पूजयामि मध्ये सम्पूज्य पीठचतुष्टयं पूजयेद्यथा ।

श्रीउड्डीशदेवीउड्डीशनाथदेवश्रीरक्ताम्बाश्रीचर्यनाथश्रीपादुकां तर्पयामि नमः इति उड्डीयानमहापीठे हृदि । श्रीजलेश्वरीदेवी जालीशनाथदेव श्रीजालाम्बादेवी श्रीषष्ठीशनाथश्रीपादुकां पूजयामि तर्पयामि नम इति जालन्धरपीठे नाभौ । श्रीपूर्णेश्वरीदेवी श्रीपूर्णनाथदेव श्रीचामुण्डाम्बाश्रीः उड्डीशनाथश्रीपादुकां पूजयामि तर्पयामि नमः इति पूर्णगिरिपीठे शिरसि । कामेश्वरीदेवीश्रीकामेश्वरानन्दनाथश्रीमहातुष्टाम्बाश्रीमित्रेशनाथश्रीपादुकां पूजयामि तर्पयामि नम इति कामरूपपीठे स्मरशासन इति क्रमेण विन्यस्य पीठस्य वामभागे स्वगुरुपङ्क्तिं सम्पूज्य हृत्पद्मे अनङ्गकुसुमादिभ्यो नमः इति पूजयेत् ।

ततः ऐँ ब्लँ ब्लूँ ब्लः इति मन्त्रेणाधरे योनिमुद्रां विचिन्त्य योनौ शक्तिभ्यो[३९२] हँ चिन्तयेत् । ऐँ क्लीं स्त्रीं क्षोभिणीमन्त्रेण स्तनयोः क्षोभं विचिन्तयेत् । ऐँ ब्लीं ह्रीं क्षं इति द्राविणीविद्यास्मरण तस्याः भ्रूमध्ये क्षोभं विचिन्तयेत् । पुनस्तस्या योनौ ह्रीं ह्रीं क्लीं ब्लूँ सः मूलविद्यां विन्यस्य कुलद्रव्यं घटात् पात्रान्तरे कृत्वा गुरवे निवेद्य शक्त्यै दत्त्वा स्वयं स्वीकृत्य आनन्दमयो भूत्वा निजविद्याद्यबीजं स्वशरसि विन्यस्य पुनस्तस्या योनौ मूलविद्यया करवीरबाणपुष्पाञ्जलित्रयं दत्त्वा[३९३] तां क्षोभयन् स्वयमपि कल्लोलिनीत्यादिना अक्षुब्धो भूत्वा शिवरूपमात्मनि शक्तिस्वरूपतां तां विभाव्य आनन्दमयं विधाय परिवर्तेन[३९४] तदमृतमुद्धृत्य देवताया गुरुप्रभृतीनां तर्पणं सकृद्वाऽवशिष्टमर्घपात्रे निःक्षिप्य निःशङ्कं पूजयेदिति ।

---

३८७ *नितम्बे- ख ।*
३८८ *जानुनि ।*
३८९ *विन्यस्य पञ्चवाणान्न्यसेत्- ग ।*
३९० *क्लौं- ख ।*
३९१ *ललाटस्थो*
३९२ *शक्तिभ्यो भं- ख, ग ।*
३९३ *पुष्पाञ्जलित्रयं प्रक्षेपेण- ख, ग ।*
३९४ *वामावर्त्तेन- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

केचित्तु दूतीदेहन्यस्तन्यासान् स्वदेहेऽपि न्यसेदितित्याहुः । तद्भावे तदनुकल्पना[३९५] च कुर्यात् । यथा अपरापुष्पं हयारिपुष्पं समानीय लघु यथा स्यात्तथा चन्दनादिना अपरापुष्पमापूर्य हयारीपुष्पं तेन संयोज्योभयोः शिवशक्तित्वेन सञ्चिन्त्य तयोः सङ्गमं विभाव्य तस्माच्च कुलद्रव्योपत्तिं विचिन्त्य तदुपरि यथाशक्त्या निजविद्यां जप्त्वा तत्कुसुममर्घपात्रे निःक्षिप्य देवतायै निवेदयेदिति ।

इति श्रीराघवभट्टविरचिते कालीतत्त्वे कुण्डगोलोद्भवोत्पत्तिप्रतिपादनन्नाम सप्तमतत्त्वम् ।

---

३९५ *तदनुकल्पनमपि पूर्वोक्तं कुर्यात्- ख ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अष्टमतत्त्वम्

अथ नित्यानुष्ठानविधिरुच्यते

तदुक्तं कालीतन्त्रे–

आदौ पुरस्क्रियां कुर्यान्नियमेन यथाविधि।
ततः सिद्धमनुर्मन्त्री प्रयोगार्हो न चान्यथा॥
जीवहीनो यथा देही सर्वकर्मसु न क्षमः।
पुरश्चरणहीनोऽपि तथा मन्त्रप्रकीर्तितः।
तस्मादादौ पुरश्चरणं[३९६] कृत्वा साधकसत्तमः॥

फेत्कारिणीयेऽपि–

भिक्षाहितसमाहारः सकृद्रात्रौ विधीयते।
दिवसे वा जपं कुर्यात् पौरश्चरणिको द्विजः॥
शाकयावकभैक्षाणि चरुणा सह सर्पिषा।
दध्ना मूलफलैर्वापि कुर्यादशनमन्वहम्॥
ब्रह्मचर्यं तथैवोक्तं स्नानं त्रैसन्धिकं[३९७]तथा।
पूर्वाङ्गञ्च देवतायाः[३९८] पूजां कृत्वा विशेषतः॥
सर्वमन्त्राः[३९९]प्रयोक्तव्याः प्रायशः प्रणवादिकाः।
अनन्यचेता आसीनो वाग्यतो विहितासनः॥
अनुष्ठिते वै मन्त्राणि गुरुसद्मनि नित्यशः[४००]।
सम्पूर्णेऽनुष्ठिते तस्मिन् सुवर्णं गुरवे ददेत्।
अन्यथा व्यभिचाराय सर्वमेतदुदाहृतम्॥

अन्यत्रापि–

देवतागुरुमन्त्राणामैक्यं सम्भावयेद्[४०१]धिया।
जपेदेकमना प्रातःकालान्मध्यं दिनावधि॥
यत्संख्यया समारब्धं कर्तव्यञ्च महर्निशम्।
यदि न्यूनाधिकं कुर्यात् व्रतनष्टो भवेन्नरः[४०२]॥

कुलसम्भवेऽपि–

स्नातः शुक्लाम्बरधरः शुचिः प्रयतमानसः।

---

३९६ *पुरश्चर्यां कृत्वा- ख, ग।*
३९७ *ब्रह्मचर्यं तथा कुर्यात् स्नानं त्रिसन्ध्यकं तथा- ख, ग।*
३९८ *पूर्वाङ्गो देवतायाश्च- ख, ग।*
३९९ *सर्वे मन्त्राः- ख, ग।*
४०० *नित्यगः- ख, ग।*
४०१ *सम्भावयन् धिया- ख, ग।*
४०२ *व्रतभ्रष्टो भविष्यति- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

दिवारात्रौ[४०३] च कर्तव्यं सर्वकर्मार्थसिद्धये ।। CC-0. In Public Domain. Digitization by eGangotri

तन्त्रान्तरेऽपि–

संख्यापूर्णे[४०४] निजद्रव्यैर्जपसंख्यादशांशतः ।
ततो होमदशांशेन जलं सम्पूज्य देवताम्[४०५] ।।
तर्पयित्वा विधानेन दशांशमभिषिञ्चयेत् ।
तद्दशांशेन तु विप्राणां भोजयेद्विधिपूर्वकम् ।
एषः पाशवकल्पस्तु सर्वतन्त्रेषु सेवितः[४०६] ।।

तदुक्तं स्वतन्त्रतन्त्रे–

दिवा लक्षं शुचिर्भूत्वा हविष्याशीज्जपेन्नरः ।
ततस्तु तद्दशांशेन होमयेद्धविषा प्रिये ।।
तर्पयेत् तीर्थतोयेन पयसा सर्पिषापि वा ।
मनुना वा सितामिश्रतोयेन परमेश्वरि[४०७] ।।
देवीं चाभिषिञ्चेत् तोयैस्तर्पणस्य दशांशतः ।
तद्दशांशं हविष्यान्नं भोजयेद् भक्तितः प्रिये ।।
कालीतन्त्रविदो विप्रान् दक्षिणां गुरवे ददेत् ।
पाशवं कथितं कल्पं श्रृणु चान्यं ततः प्रिये ।
एवं पौरश्चरणिकं सामान्यविधिपूर्वकम् ।।

पाशवकल्पोक्तपूजापूर्वकं च लक्षजपतद्दशांशहोमात्मकं पुरश्चरणं पशूनां पर्यवसितमिति ।।

अथ वीरपुरश्चरणविधिरुच्यते

तदुक्तं कुलचूडामणौ–

पुरश्चरणकाले तु[४०८] परशक्तिं प्रपूज्य च ।
दीक्षितां वस्त्रपुष्पाद्यैर्भोज्यैः पायससम्भवैः ।।
आरम्भकाले चानीतं स्वयं पक्वान्नसंस्कृतम् ।
नानाविधं पुष्पकञ्च[४०९]नानारससमन्वितम्[४१०]।।

---

४०३ *दिवा चैव प्रकर्तव्यम्- ख, ग ।*

४०४ *सङ्ख्यापूर्णैः- ख, ग ।*

४०५ *यथोक्तकुण्डे जुहूयात्तद्दशांशत एव हि ।*
एवमभिषेकः कर्माणि कुर्याद् वै साधकोत्तमः ।।
ब्राह्मणान् पूजयेद् भक्त्या दक्षिणां गुरवे ददेत् ।
अथवा प्रत्यहं जप्त्वा जुहूयात्तद्दशांशतः ।
एवमभिषेककर्माणि कुर्याद् वै साधकोत्तमः-अधिकपाठः ख, गमातृकायाम् ।

४०६ *सूचितः- ख, ग ।*

४०७ *मधुना वा परमेश्वरी- ख ।*

४०८ *च- ख ।*

४०९ *पेष्टकञ्च- ख, ग ।*

४१० *नानाविधरसायनम्- ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
दुग्धं दधि घृतं तक्रं नवनीतं सशर्करम्।
उपलीखण्डचूर्णञ्च नानागन्धविलेपनम्॥
चन्दनं मृगनाभिञ्च श्रीखण्डं नवपल्लवम्।
टङ्कनं लोध्रकं चैव जलजं वनजन्तथा॥
नानाशैलसमुद्भूतं नानालङ्कारभूषितम्।
अन्यगेहे समानीय चार्घोदकविशोधितम्॥
अमृतीकरणं कृत्वा शक्तिञ्चाभिमुखं नयेत्।
तेनोदकेन सर्वास्ताः सम्प्रोक्ष्य विधिपूर्वकम्॥
अमृतीकरणं पश्चात्सकलीकरणादि वा।
अथाष्टकन्यकाममध्ये[४११] देवीरूपधरा यतः॥
ब्राह्मणी क्षत्रिया वैश्या शूद्रा च कुलभूषणा।
वेश्या नापितकन्या च रजकी योगिनी तथा॥
विशेषवैदग्धयुताः सर्वा एव कुलाङ्गनाः।
अष्टकन्यारूपभेदं विलोक्यामर्षचेष्टिताः।
ब्राह्मण्याद्यष्टशक्तीनां नामभिः कृतसंज्ञकाः।
आसनं प्रथमं दत्त्वा स्वागतञ्च वदेत् ततः॥
अर्घपाद्यञ्च पानीयं मधुपर्कञ्जलन्तथा।
स्नापयेद् गन्धपुष्पाद्यैः केशसंस्कारमाचरेत्॥
धूपयित्वा ततः केशान्कौशेयञ्च निवेदयेत्।
ततः स्थानान्तरे पीठमास्तीर्य पादुकायुगम्॥
दत्त्वा तत्र समासीनां नानालङ्कारभूषणैः।
भूषयित्वा विलेपञ्च गन्धमाल्यं निवेदयेत्[४१२]॥
नानाशक्तिं समावाह्य मूर्ध्नि तां तां समानयेत्।
भोज्यमण्डलमध्ये[४१३] च स्वर्णपात्रे सुशोभने॥
चर्व्यं चोष्यं तथा लेह्यं पेयञ्चैव च भैक्षकम्।
अदीक्षिता तु या शक्तिस्तस्यै मायां निवेदयेत्॥

अथ प्रथमं पूजातत्त्वोक्तप्रकारेण शङ्खं घण्टाञ्च संस्थाप्य तेनोदकेन ताः सम्प्रोक्ष्य यथोक्तक्रमेण स्वरूपं विचिन्त्य तदनुसारेण नाम धृत्वा सम्पूज्य पाद्यादिभिर्देवीं ध्यात्वा तासां मूर्ध्नि समावाह्य जीवन्यासादिकं विधाय पाद्यादिभिः सम्पूज्य ततस्तासु भैक्षादिकं भुञ्जानासु सव्यकर्णेषु शक्तिस्तोत्रं पठेदिति।

नारिकेलं कपित्थञ्च नागरङ्गसुदर्शनम्।
पिण्याकबीजपूरञ्च दाडिमीफलमुक्तमम्
नानावन्यफलञ्चैव नानागन्धविलेपनम्- अधिकपाठः गमातृकायाम्।

४११ *अथाष्टकन्यकां वक्ष्ये- ख, ग।*
४१२ *माल्यं चैव- ख, ग।*
४१३ *तु- ख।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
तदुक्तं तत्रैव–
आसां सव्येषु कर्णेषु ततः स्तोत्रं समाचरेत्।
मातर्देवि नमस्तेऽस्तु ब्रह्मरूपधरेऽनघे।
कृपया हर मे विघ्नं मन्त्रसिद्धिं प्रयच्छ मे॥
महेशि वरदे देवि परमानन्दरूपिणि।
कृपयेत्यादि॥
कौमारि सर्वविघ्नेशि[४१४] कुमारक्रीडनेऽबले।
कृपयेत्यादि॥
विष्णुरूपधर देवि विनतासुतवाहिनि[४१५]॥
कृपयेत्यादि ॥
वाराहि वरदे देवि द्रंष्ट्रोद्धृतवसुन्धरे।
कृपयेत्यादि॥
शक्ररूपधरे देवि शक्रादिसूरपूजिते।
कृपयेत्यादि॥
चामुण्डे मुण्डमालास्रक्[४१६] चर्चिते विघ्ननाशिनि।
कृपया॥
महालक्ष्मीर्महामाये[४१७] क्षोभसन्तापनाशिनि।
कृपया॥
पितृमातृमये देवि पितृमातृबहिष्कृते[४१८]।
कृपया॥
एके बहुरते देवि विश्वरूपे नमोऽस्तु ते॥
कृपया॥
एतत् स्तोत्रं पठेद्यस्तु कर्मारम्भेषु संयुतः।
विदग्धां वा समालोक्य तस्य विघ्नं न जायते॥
कुलीनस्या द्वारदेव्यः कथिता स्तवपुत्रकः।
दीक्षाकाले नित्यपूजासमये नार्चयेद्यदि॥
तस्य पूजाफलं वत्स नीयते यक्षराक्षसैः।
यदि व्रीडापरास्ता तु भोजने तद्गृहाद् बहिः॥
स्थित्वा स्तोत्रं पठेत्तावद्यावत्तृप्तिः प्रजायते।

---

४१४ सर्वविघ्नेशि- ख, ग।
४१५ विष्णुरूपधरे देवि शक्रादिसूरपूजिते- ख।
४१६ सृक्- ख, ग।
४१७ क्षोत्रसन्तापनाशिनी- ख, ग।
४१८ मिति मातृमये देवि मितिमातृबहिष्कृते- ख, ग।
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
आचम्य मुखवासादि ताम्बूलञ्च निवेदयेत् ॥
प्रदद्याच्च पुनर्माल्यं गन्धचन्दनपङ्क्तिनम् ।
विसृर्ज्य प्रदक्षिणीकृत्य वरं प्रार्थ्य सुखी भवेत् ॥
अन्या यदि न गच्छन्ति निजकन्या निजानुजा ।
अग्रजा मातुलानी वा माता वा तत्सपत्निका ॥
वयस्या जातितो वापि पूज्याः स्युः परमाकला ।
पूज्याः कुलरसैः सर्वाः निजाहङ्कारवर्जिताः ॥
सर्वाभावेऽप्येकतरा पूजनीया प्रयत्नतः ।
संस्कृता संस्कृता वापि जननी वापिनिःपतिः ॥
पूर्वाभावेऽपरापूज्या मदंशा योषितो यतः ।
एकश्चेत् कुलसर्वज्ञः पूजार्हस्तत्र भैरवः ॥
सर्व एव सुराः पूज्या ब्रह्मविष्णुशिवादयः ।
एका चेद्युवती तत्र पूजिता वा विलोकिता ॥
सर्वा एव परा देव्यः पूजिताः कुलभैरवः[४१९] ॥

इदञ्चादौ मध्ये अन्ते च पौरश्चरिकाणां वीराणां शक्तिपूजनमावश्यकम् । अन्यथा निन्दाश्रवणात् । तदुक्तं कुलचूडामणितन्त्रादिषु–

आदौ मध्ये च अन्ते च लक्षपूर्णे विशेषतः ।
न पूजयति चेत्कान्तं तदा विघ्नैर्विलुप्यते ॥
पूर्वार्जितं फलं नास्ति का कथा परजन्मनि ।
तस्मात् सर्वप्रयत्नेन यदीच्छेदात्मनो हितम् ॥
समापिक्रोधसन्ताप[४२०] समलं विघ्ननाशनम् ।
यत्नतः पूजनीयाः स्युः कलाः कूलजनास्ततः ॥

इति एवमेव तत्कर्म दिवसे निष्पाद्य रात्रौ देवीं यथाविधि पूजयित्वा उत्तमशय्यामासीनस्ताम्बूलपूर्णास्यो भूत्वा यथोक्ताचारं कुर्वन् तुल्यसंख्यया प्रत्यहं समाप्तिपर्यन्तं रहस्यमालया[४२१] जपेदिति ।

तदुक्तं स्वतन्त्रतन्त्रे–

रात्रौ मांसासवैर्देवीं पूजयित्वा यथाविधि ।
ततो नग्नां स्त्रियं नग्नो रमन् क्लेदयुतोऽपि वा ॥
जपेल्लक्षं ततो देवि होमयेज्ज्वलितानले ।
होमकुण्डस्थिते[४२२]सर्पिर्मांसमत्स्ययुतन्तथा ॥
दशांशं तर्पयेन्मद्यैर्मांसमिश्रैस्तु साधकः ।

---

४१९ कुलभैरव- ख, ग ।
४२० ममापि क्रोधसन्ताप- ख, ग ।
४२१ रहसि मालामादाय जपेदिति- ख, ग ।
४२२ योनिकुण्डे स्थिते सर्पिर्मांसमत्स्ययुतं तथा- ख, ग ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
तर्पणस्य दशांशेन अभिषिञ्च्य जगन्मयीम् ॥
दशांशं भोजयेत्साधु साधकः कालिकाप्रियम् ।
मद्यं मासञ्च मत्स्यञ्च चर्वणञ्चापि दापयेत् ॥
ततस्तु तोषयेद्भक्त्या गुरुं स्वर्णादिभिः प्रिये ।
एतत्कल्पद्वयाद्देवि मन्त्रः सिद्ध्यति निश्चितम् ॥
अत्रेदं तत्त्वं पशूनां पुरश्चरणचतुष्टयात् सिद्धिः । तदुक्तं एकविंशकल्पे ।
भावानां विरहाणाञ्च क्षुद्राणां क्षुद्रचेतसाम् ।
चतुर्गुणजपः प्रोक्तः सिद्धये नान्यथा भवेत् ॥
क्षुद्राणां पशूनामित्यर्थ । ननु वीरतामिच्छता द्विजेन किं कार्यमिति । उच्यते पशूनां द्विजातीनां पाश एव कल्पः । वीराणां द्विजातीनां वैर एवेति विभागात् मनुः–
द्विजातीनाञ्च सर्वेषां दिवा विधिरिहोच्यते ।
शूद्राणाञ्च तथा प्रोक्तं रात्राविष्टं महाफलम् ॥ इति वाक्येन विरोधः स्यादिति चेत् न, तन्त्रतन्त्रान्तरैवाक्यतया द्विजातीनामित्यनेन पशूनामित्यस्य[४२३] विवक्षितत्त्वाद् । शूद्राणामित्यनेन वीराणामित्यर्थस्याभिप्रेतत्त्वाच्चेति[४२४] । अथवा मन्त्रान्तरपरतयैव वेदवाक्यं योज्यम् । एवं चार्थविशेषं अत एवाह कुलार्णवादिः[४२५]–
सुरस्त्रीकुलशास्त्रेभ्यः सम्यग्विज्ञायते यतः ।
कुलद्रव्यं निषेवेत तस्य सिद्धिर्न दूरतः ॥
विना द्रव्याधिवासेन न जपेन्न स्मरेत् प्रिये ।
ये जपन्ति यथा मूढास्तेषां दुःखं पदे पदे ॥
मद्यं मासं तथा मत्स्यं मुद्रा मैथुनमेव च ।
अन्योन्यं नित्यतो[४२६]ज्ञेया पञ्चानां पूजने सदा ।
ब्राह्मणैस्तु सदा कार्या क्षत्रियैस्तु रणागमे ।
वैश्यैर्धनप्रयोगे तु शूद्राणामिष्टकर्मणि ॥ शूद्रैः केवलपशुभिरित्यर्थः । तदुक्तं भावचूडामणितन्त्रादौ–
वीरसाधनकार्यस्तु कर्तव्यो वीरपुरूषै ।
दीनैरपि च कर्तव्यं पशुभिर्न च पामरैः ॥
वरं पाशवकार्यन्तु न पशोरिति निश्चितम् ।
यद्यत्तत्तत् पुरा प्रोक्तं साङ्गतं मन्त्रसाधनमिति ॥
अन्यदपि तन्त्रोक्तम्–
यदि विप्रः कुलश्रेष्ठः कुलद्रव्यपरायणः ।
तदानेन विधानेन कर्तव्यं कुलतोषणम् ॥
कुलश्रेष्ठ इति वीरभावप्रपन्न इत्यर्थः । वीरभावप्रपन्नानामेषो विधिरावश्यकः । अन्यथा निन्दाश्रवणात् । तदुक्तं

---

४२३ पशूनामित्यर्थस्य विवक्षितत्त्वात्- ख, ग ।
४२४ शूद्राणामित्यादिना वीराणामीत्यर्थस्याभिप्रेतत्त्वात्- ख, ग ।
४२५ कुलार्णवादिः- ख ।
४२६ नित्यता ज्ञेया- ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

स्वतन्त्रे–

विना पीत्वा सुरां भुक्त्वा मांसं गत्वा रजस्वलाम्।
यो जपेद्दक्षिणादेवीं तस्य दुःखं पदे पदे ॥

कुलसम्भवेऽप्युक्तम्–

रात्रौ नग्नो मुक्तकेशो मैथुने वाथ[४२७]तत्त्वतः।
प्रकर्तव्यं प्रयत्नेन सर्वकामार्थसिद्धये ॥

कुण्डन्तु योनिरूपमिह ध्येयम्। तदुक्तं तन्त्रान्तरे–

योनिरूपन्तु कुण्डं वै कृत्वा वितस्थिमात्रतः।
हस्तविस्तारतस्तावत् कृत्वा वापि तथाप्यधः ॥
तत्र कार्याभिमन्त्रेण[४२८]अग्निस्थापनिका किया।
महाकालाय देवाय दद्याच्च प्रथमाहुतिम् ॥
एवं मद्येन मांसेन भक्तेन रुधिरेण च।
कृष्णपुष्पेण चाज्येन रक्तेन तु विशेषतः ॥
आमिषादिभिरप्येवं श्मशाने जुहुयात् सुधीः।
तर्पयेच्च पयोभिश्च रक्तधारायुतैस्तथा ॥
मज्जाभिश्च तथा तद्वत् स्वकीयेन करेण[४२९] च।
आकर्षितायाः कन्यायाः कुलप्रक्षालनेन च ॥
मेषमहिषरक्तेन नररक्तेन चैव हि।
मूषमार्जाररक्तेन तर्पयेत् परदेवताम्।
तेन तेन च द्रव्येण मार्जनञ्च दशांशतः ॥

एवं त्रिकोणं कुण्डं सामान्यविधिनापि संस्कृत्य मूलेनाग्निं संस्थाप्य महाकालाय प्रथमाहुतिं दत्त्वा दशांशेन होमयित्वा तद्दशांशेन जलादौ यन्त्रं विलिख्य यथासम्भव देवीं पूजयित्वा मूलमुच्चार्य अमुकदेवीं तर्पयामीति सन्तर्प्य मूर्ध्नि देवतामावाह्य पुष्पादिना सम्पूज्य मूलमुच्चार्य अमुकदेवतामभिषिञ्चयामीति। अभिषिच्य दशांशेन देवताब्राह्मणान् सम्पूज्य अभिषेकदशांशेन यथा वैभवं सन्तर्प्य स्वर्णादिदक्षिणां दत्त्वा गुरुं सन्तोष्य विरहेदिति। ब्राह्मणभोजनन्त्वावश्यकम् अन्यत्रानुकल्पस्यापि सम्भवेत्। तदुक्तं कुलप्रकाशे–

एकमङ्गं विहीयेत मन्त्रान्नेष्टमवाप्नुयात्।
अन्यैश्च विविधैर्देवि पदार्थैः षड्रसान्वितैः ॥
सुभोजितेषु विप्रेषु सर्वं हि सफलं भवेत्।
सम्यक्सिद्धैकमन्त्रस्य पञ्चाङ्गोपासनेन हि।
सर्वे मन्त्राश्च सिद्ध्यन्ति तत्प्रभावात् कुलेश्वरि ॥

---

४२७ *चापि- ख।*
४२८ *तत्र कार्या हि मन्त्रेण- ख।*
४२९ *कचेन च- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अन्यत्रापि–

सर्वथा भोजयेद्विप्रान् कृतसङ्गार्थसिद्धये ।
विप्राराधनमात्रेण अङ्गं साङ्गं भवेत् सदा ॥ इति ॥

होमतर्पणाभिषेकानामशक्तौ द्विगुणत्रिगुणचतुर्गुणपञ्चगुणविप्रक्षत्रियवैश्यशूद्रैर्यथासंख्यं जपः कार्यः । तदुक्तं कुलप्रकाशे–

यद्यदङ्गविहीनः स्यात् तत्संख्या द्विगुणो जपः ।
कुर्वीत त्रिचतुःपञ्चसंख्यया साधकः क्रमात् ॥
होमकर्माद्यशक्तानां विप्राणां द्विगुणो जपः ।
इतरेषां तु वर्णानां त्रिचतुः पञ्चसंख्यया ।
गुरुं सन्तोषयेदेवं मन्त्राः सिद्ध्यन्ति मन्त्रिणः ॥

अन्यत्रापि–

शूद्राणां होमाच्चतुर्गुणो जप एव न तु शक्तानामपि होमः । तदुक्तं ज्ञानप्रकाशे–

स्त्रीशूद्राभ्यां न होतव्यं मन्त्रोच्चारणपूर्वकम् इत्यादि । तस्मात् पाशवकल्पे लक्षजपतद्दशांशहोमाद्यात्मकं पुरश्चरणम् । वैरकल्पेऽपि तथैव पर्यवसितमिति[४३०] ।

लक्षमेकं जपेद्विद्यां हविष्याशी दिवा शुचिः । रात्रौ ताम्बूलपूर्णास्य शय्यायां लक्षमानतः ।। इति अथ श्रव[४३१] वशी लक्षं मन्त्रं प्रजपति हविष्याशनरतो दिवा मातुर्युग्मचरणकमलध्याननिरतः परं नक्तं नग्नो निधुवनविनोदेन मनोलक्षांशास्य[४३२] स्मरहरसमानक्षितितले इति वाक्ययोर्वशक्रमेण समुचितद्वयात्मकं पुरश्चरणम् । अथाहैनं मन्त्रराजं नियमेनानीय लक्षमावर्तयति स पाप्मानं तरति ब्रह्महत्यां तरति इत्यादिवचनवत् एतत्कल्पद्वयाद्देवि मन्त्र सिद्ध्यति निश्चितम् इत्यादिवचनबहवः । वा विकल्पद्वयसु च कृत्वा परतयोपपत्तये किञ्चिदेकस्मिन्कर्मणि नानाविरुद्धकर्मानङ्गत्वादिति न्यायविरोधाच्च । शुचिः पशुवशीत्यपि पशुरेवापरं वीर इति तयोरर्थादिति भावः । तथा च शुर्चिहविष्याशी सन् दिवा लक्षं जपन्न तु रात्रौ । तदुक्तं भावचूडामणौ –

न मत्स्यभोजनं वापि न परद्रव्यलाभकृत् ।
सिन्धुवीरवने वापि पर्वते वा सुरालये ॥
बिल्वमूले विविक्ते च पुण्यक्षेत्रे सुशोभने ।
न शुश्रूदर्शनं कुर्यात् कौटिल्यं दूरतस्त्यजेत् ॥
देवताशुद्धभावेन ध्यातव्या सुसमाहितः ।
त्रिसन्ध्यं देवतापूजा त्रिसन्ध्यं जपमाचरेत् ॥
रात्रौ मालाञ्च यन्त्रं वै पृशेन्नैव कदाचन ।
न मन्त्रमुच्चरेद्[४३३]भोक्ता मौनी स्यात् सर्वकर्मसु ॥

४३० *अत एव- ख ।*
४३१ *तथा- ख ।।*
४३२ *मनुजनोलर्क्ष्य ये वदन्ति तदपास्तम् । कल्पद्वयेऽपि परस्परनिरपेक्षैकलक्ष्प्रतिपादकनानावचनविरोधेन अथ हैनं मन्त्रराजं नियमेन जानीय लक्ष्यमावर्तयति स पाप्मानं तरति ब्रह्महत्यां तरति इत्यादिवचनवन्नायरपिकल्पद्वयसूचकत्वपरतयोपपत्तेः । किञ्च एकस्मिन् कर्मणि नानाविरुद्धकर्मानिङ्गत्वादिति न्यायविरोधाच्च शुचिः पशुः वशीत्यपि पशुरेवापरं देवी इति तयोरर्थादिति भावः- ख ।*
४३३ *वापि- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

इति विस्तरतस्तु स्वाचारप्रतिपादकाद्[४३४] एवावगन्तव्यः, तथेति यथा येन स्वकल्पोक्तद्रव्यादिदानप्रकारेण देवतां पूजयित्वा पशुना दिवैव जपादिकं कार्यं तथा तेन प्रकारेण स्वकल्पोक्तद्रव्यादिदानेन देवतां पूजयित्वा वीरेण सज्जायामेव जपादिकं कार्यमिति वाक्यस्य उत्तरार्थः । अथ श्रववशीतिवाक्यं गतार्थः । अत एव कालिकाकल्पेत्याहुः ।.

स्वाचारनिरतो नित्यं दिवा लक्षं जपेत् पशुः ।
दिव्यो वाप्यथवा वीरो रात्रौ लक्षजपं चरेत् ॥
दशांशं होमयेदग्नौ तर्पयेत् स विचक्षणः ।
भोजयेच्च यथा विप्रान् निजभावमुपाचरन् ॥

इत्यादि इदं कल्पद्वयं तु कालीचारामुखीच्छिन्नादिसाधारणम् । तदुक्तं कालीतन्त्रादौ –
यथा काली तथा तारा यथा तारा तथोन्मुखी । इत्यादि कालीश्रुतौ च नान्यप्रकारेण सिद्धिर्भवति इहैव कालिकाया मनोर्वा तारकाया मनोर्वा सर्वस्या दुर्गाया मनोराद्यां शिवां तर्पयेदिति ।

तन्त्रराजादावपि–

कालिकामुखदेवानां भेदपूजनमात्रके ।
स्थापनेन विना शङ्खं घटस्य[४३५]कुलभैरवि ॥

अथ रहस्यपुरश्चरणविधिरुच्यते ।

तदुक्तं वीरतन्त्रादौ–

रुचिबन्धेन[४३६] वस्त्रं वै मूलेन परिधाय च ।
तद्बाह्यतः पुनर्वस्त्रं मूलेनाङ्गं विलेपनम्[४३७] ॥
कृतः श्लीषश्च मूलेन सिन्दूरेण त्रिपुण्ड्रकम् ।
इष्टदेवं गुरुं नत्वा यात्राप्रहरमात्रतः[४३८] ॥
कार्या च साधकैः सार्द्धं हृदि मन्त्रं परामृशन् ।
अक्षयः कृतभोज्यश्च[४३९] यदि स्याद् वीरसाधकः ॥
दिव्यो वा न पशुस्तत्र भुक्त्वा साधनमाचरेत् ।
अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि ॥
भौमवारे तिमिस्रायां साधयेत् सिद्धिमुत्तमाम् ।
उपचारं समादाय कुलामृतरसं तथा ॥

रुद्रयामलादौ च–

---

४३४ *विस्तरतस्तु पश्वाचारप्रतिपादक एव अवगन्तव्यः, तथेति यथा येन स्वकल्पोक्तद्रव्यादिदानप्रकारेण देवतां पूजयित्वा पशुना दिवौवजपादि कार्यमिति वाक्यस्योत्तरार्थः । अत एव शीत्यादिवाक्यं गतार्थः- ख, ग ।*

४३५ *घटस्थ- ख, ग ।*

४३६ *घटीं बाधन वस्त्रं- ख, ग ।*

४३७ *विलेपयेत्- ख, ग ।*

४३८ *मध्यतः- ख, ग ।*

४३९ *अक्षयकृतभोज्यस्तु- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

सत्ये क्रमाच्चतुर्वर्गैः क्षीराज्यमधुपिष्टकैः ।
CC-0. In Public Domain. Digitization by eGangotri
त्रेतायां पूजयेद्देवीं घृतेन सर्वजातिभिः ॥
मधुभिः सर्ववर्णैश्च पूजयेद् द्वापरे युगे ।
पूजनीयाः कलौ देवी केवलैरासवैश्च तैः ॥
अत एव
गुडार्द्रकरसेनैव सुरास्तु ब्राह्मणस्य च ।
गौडी या सा क्षत्रियेण मध्वा वैश्येन तत्र वै ॥
कदलीमधुसंमिश्रशालिपाक्यरसाः सुराः ।
सर्वशूद्रस्य वै प्रोक्तं यत्र वा तद्रुचिर्भवेत् ॥

गृहीत्वा दातव्यं स[४४०] तेनैवसंस्कृतादित्याद्यनुकल्पबोधकवाक्यानां युगचतुष्टयसाधारणतया योजनमपास्तं कलावनुकल्पबोधनाच्छ्रवणात् । न सह भिन्नवाक्यतापत्तिरिति । महाचीनं क्रमं सूचितम्, प्रकाशितम् ।

महाचीनं क्रमं देवि सूचितं न प्रकाशितम् ।
कथयस्व महादेवि सर्वसिद्धिप्रदं महत् ॥
श्रीभैरव उवाच
सर्वसिद्धिप्रदं साक्षात् सर्वदेवनमस्कृतम् ।
सर्वपापहरं देवि सर्वरोगविनाशनम् ॥
ब्रह्मविष्णुशिवादीनां दिक्पालानाञ्च भामिनि[४४१] ।
भैरवाणाञ्च सर्वेषां गन्धर्वाणाञ्च योगिनाम् ॥
सम्पत् सिद्धिप्रदं देवि सर्वेषामालयं महत् ।
नान्यसिद्धिप्रदं देवि वीरसाधनवर्जितम् ॥
महाबलो महाबुद्धिर्महासाहसिकः शुचिः ।
महास्वच्छो दयावाँश्च सर्वभूतहिते रतः ॥
सामिषान्नं गुडं छागं सुरापिष्टकमेव च ।
नानाफलञ्च नैवेद्यं स्वस्वकल्पोक्तसाधितम् ॥
चितास्थाने समानीय सुहृद्भिः शस्त्रपाणिभिः ।
समानगुणसम्पन्नैः साधको वीतभीः स्वयम् ॥
न वीक्षयेच्चतुर्दिक्षु देवताध्यानतत्परः ।
भीतश्चेत् साधकस्तत्र चतुर्दिक्षु च साधकः ॥
नो चेत् केवलोऽसौ भैरवः परिकीर्तितः ।
अक्षालितां चितां गत्वा भूमिं साधकसत्तमः ।

---

४४० च न तु संस्पृशेदित्यादि अनुकल्पबाधकवाक्यानां युगचतुष्टयसाधारणतया योजनमपास्तम् । कलावनुकल्पबोधनाश्रवणात् । पूज्या सर्वविधानेन सर्ववीरे कलौ युग इति । पूजनीय कलौ देवी केवलैरासवैरिति यामलादिवचनविघातापत्तेश्चेति । तस्मादनुकल्पो युगान्तरपरो बोद्धव्योऽन्यथा तेन सह भिन्नवाक्यतापत्तेरिति । अधिकपाठः गमातृकायाम् ।

४४१ भाविनी- ख,ग ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रक्षालितां यदि प्रायः कारयेदस्थिसञ्चयम् ॥
अस्त्रान्तमूलमन्त्रेण प्रोक्षणं यागभूमिषु ।
गुरुपादरजं ध्यात्वा गणेशं वटुकं तथा ॥
योगिनीं मातृकाञ्चैव वामपादे पुरःसरम् ।
ये चात्र संस्थिता देवा राक्षसाश्च भयानकाः ॥
पिशाचाः सिद्धयक्षाश्च गन्धर्वाप्सरसाङ्गणाः।
योगिन्यो मातरो भूत्वा सर्वाश्च खेचरास्त्रियः ॥
सिद्धिदास्ता भवन्त्वत्र यथा[४४२] च मम रक्षकाः ।
प्रणम्य मनुनानेन पुष्पाञ्जलित्रयं क्षिपेत् ॥
श्मशानाधिपतिं पश्चाद्भैरवं कालभैरवम् ।
महाकालं जपेत् पश्चात् पूर्वादिदिक्चतुष्टये[४४३]।
पाद्यादिभिश्च तत्त्वज्ञो बलिं पश्चात् निवेदयेत् ॥
कूर्चबीजन्ततः पश्चात् श्मशानाधिप तत्परम् ।
इति मन्त्रैः सामिषान्नं बलिं गृह्ण पदन्ततः ॥
गृह्ण गृह्णापययुग्मं विघ्ननिवारणं ततः ।
कुरु सिद्धियुतं भक्तं प्रयच्छ स्वाहयान्वितम् ॥
प्रणवाद्येन मनुना प्रथमाबलिरीरितः[४४४] ।
मायान्ते भैरवः[४४५] पश्चाद् भयानकपदन्ततः ॥
हुँमन्ते च महाकाल पश्चात् सर्व समुच्चरेत्[४४६] ॥
पूर्ववद् बलिमुद्धृत्य दक्षिणे बलिमाहरेत् ।
पश्चिमे कालदेवाय प्रणवाद्येन कल्पयेत् ॥
शब्दान्ते कालशब्दान्ते भैरवेति पदन्ततः ।
श्मशानाधिप इत्येवं पूर्ववच्चोत्तरे हरेत् ॥
चितामध्ये ततो दद्यात् बलित्रयमनुत्तमम् ।
कालरात्रि महाकालि कालिके घोरनिःस्वने ॥
गृहाणेमं बलिं मातर्देहि सिद्धिमनुत्तमाम् ।
हुँ कालिकायै स्वाहेति बलिं[४४७] भूतनाथाय दापयेत् ॥
शब्दान्ते भूतशब्दान्ते श्मशानाधिप इत्यपि ।
प्रणवाद्येन मन्त्रेण दापयेद् बलिमुत्तमम् ॥

४४२ *तथा- ख, ग।*
४४३ *पूर्वादिदिक्चतुष्टये- ख, ग।*
४४४ *बलिरीरितः- ख, ग।*
४४५ *भैरवात्- ख, ग।*
४४६ *हुमन्ते च महाकालात् पश्चात् सर्वमुद्धरेत्- ख, ग।*
४४७ *दत्त्वा- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

हुँ सर्वगणनाथान्ते अधिपदं तथा पुनः।
CC-0. In Public Domain. Digitization by eGangotri
श्मशानमस्तके दत्त्वा पूर्ववच्च समुद्धरेत्॥
ताराद्येनं बलि दत्त्वा पञ्चगव्येन सुन्दरि।
अस्थिसंप्रोक्षणं कृत्वा पीठमन्त्रं न्यसेत् पुनः॥
भूर्जे वा वटपत्रे वा तत्र पीठमनुन्यसेत्।
पीठमास्तीर्य तस्मिन्वै बहुवीरासनं ततः॥
वीरार्दनेन देवेशि लोष्टान् दिक्षु विनिक्षिपेत्।
कूर्चयुग्मं तथा देवि मायायुग्मं ततः परम्॥
कालिके घोरदंष्ट्रे च प्रचण्डे चण्डनायिके।
दानवान्दारयेत्युक्त्वाहनेति द्वितयन्ततः॥
परवीरं महाविघ्नं छेदयेद् द्वितयन्ततः।
द्विष्ठान्ते च सशस्त्रान्तो[४४८] वीरार्दन मनुः स्मृतः॥
अनेनाभिमन्त्रितं लोष्ठं दशदिक्षु विनिक्षिपेत्।
तन्मध्ये भैरवो विघ्नैर्न परिभूयते तथा॥
यदि प्रमादाद्देवेशि साधको भयविह्वलः।
तैस्तैःसर्वैः सुहृद्भिश्च रक्षितो नाभिभूयते॥
अर्केन्दुसित वा ध्यानतुलैर्निर्मितवर्तिकां।
प्रदीपं तत्र संस्थाप्य अस्त्रं तत्र प्रपूजयेत्॥
हते[४४९] तस्मिन् महादीपे विघ्नैश्च परिभूयते।
तदधश्चास्त्रमन्त्रेण निखनेत्[४५०] कुलदीपिकाम्॥
तत्र कल्पविधानेन भूतशुद्ध्यादिकञ्चरेत्।
षोढां वा तारकां वापि विन्यस्य पूजयेत्ततः॥ देवतामिति शेषः।
अत एव यामलादौ–
तत पञ्चोपचारेण पुरतो देवतां यजेत्।
निमील्य चक्षुषी पश्चाद्देवं ध्यात्वा मनुं जपेत्॥
एकाक्षरो यदि भवेद्दिक्सहस्रं ततो जपेत्।
द्व्यक्षरे चाष्टसाहस्रं त्र्यक्षरेऽप्ययुतार्द्धकम्॥
ततः परन्तु मन्त्रज्ञो गजान्तकसहस्रकम्।
निशायां वा समावाह्य उदयान्तं समाचरेत्॥
यद्यसाध्यं भयं कर्म नेत्रे वस्त्रेण बन्धयेत्।

---

४४८ वर्मशस्त्रान्तः- ख, ग।
४४९ गत- ख।
४५० निषेवेत्- ख।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

ततोऽर्द्धरात्रिपर्यन्तं यदि किञ्चिन्न दृश्यते।।
CC-0. In Public Domain. Digitization by eGangotri
जयदुर्गामनुनार्घ्यं तेनैव शर्षपान् क्षिपेत् ॥
ॐतिलोसि सोमदैवत्यो गोसवस्तृप्तिकारकः ।
पितृणां स्वर्गदातृत्वं भूतानां मम रक्षकः ॥
भूतप्रेतपिशाचानां विघ्नेषु शान्तिकारकः ।
इति क्षिप्त्वा तिलास्तत्र चतुर्भागेति चोदितः[४५१] ॥
ततः सप्तपदं दत्त्वा पुनस्तत्रैव संविशेत् ।
देवं तत्रापि संपूज्य पूजयेन्मनुमुत्तमम् ॥
निर्भयं पूजयेत्[४५२] तावत् यावत् सिद्धिः प्रजायते ।
भयन्तु स्वप्नवज्ज्ञेयं परेऽह्नि शेषमारचेत् ॥
इति चितासाधनम् ।
अथ शवसाधनविधिरुच्यते –
पूर्वोक्तमुपहारादिं समादायोक्तः[४५३]साधकः ।
साधयेत् सुहितां सिद्धिं साधनस्थानमाश्रयेत्[४५४]॥
गुरुध्यानादिकं सर्वं पूर्वोक्तमतमाचरेत् ।
वीरादीनाङ्क्तितो माया मोहने विद्यते[४५५]तथा ॥
ये चात्रेत्यादिमन्त्रेण शिखाबन्धनमाचरेत् ।
सुदर्शनेन वा रक्षमुभाभ्यां वा प्रकल्पयेत्[४५६] ॥
मायास्फुरद्वयं भूय प्रस्फुरञ्च द्वयं पुनः ।
अघोरघोरतरेभ्यो तेन रूपपदन्ततः ॥
चटयुग्मतरान्तञ्च प्रचटं द्वितयं ततः ।
हनयुग्मं वनद्वन्द्वं[४५७]ततो बन्धद्वयं ततः ॥
घातयेद्वितयं वर्म फडन्तः समुदाहृतः ।

---

४५१ *शिवादितः- ग।*
४५२ *प्रजपेत्- ख।*
४५३ *समादायस्तु- ख, ग।*
४५४ *स्वहितां साधकस्थानमाश्रयेत्- ख, ग।*
४५५ *भूमौ माया मोहो न विद्यते- ख, ग।*
४५६ *समाचरेत्- ख, ग।*
४५७ *रमद्वन्द्वं बन्धयुग्मं- ख ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

एकपञ्चाशद्वर्णोऽयमघोरास्त्रमर्नुभवेत्[४५८] ।।
हलाहलं समुद्धृत्य सहस्रारे स्वरूपकम् ।
स्वरूप वर्मास्त्रान्तं महामन्त्रं सुदर्शनस्य कीर्तितम् ।।
भूतशुद्धिन्ततः कृत्वा न्यासजालं प्रविन्यसेत् ।
जयदुर्गाख्यमन्त्रेण सर्षपान् दिक्षु निक्षिपेत् ।।
तिलोऽसीति च मन्त्रेण तिलानपि विनिक्षिपेत् ।
यष्टिविद्धं शूलविद्धं खड्गघातेन चामृतम् ।।
वज्रबन्धं सर्पद्रष्टं चाण्डालं वा विभूतकम् ।
तरुणं सुन्दरं शूरं रणे नष्टं समुज्ज्वलम् ।।
पलायनविशुन्यन्तु सन्मुखे रणवर्तिनम् ।
स्वेच्छामृतं द्विवर्षञ्च वृद्धं स्त्रीद्वितयं तथा ।।
अन्नाभावमृतं कुष्टं सप्तवर्षाधकं तथा ।
एवं चाष्टविधिं त्यक्त्वा पूर्वोक्तान्यतमं शवम् ।।
गृहीत्वा मूलमन्त्रेण पूजास्थानं समानयेत् ।
चाण्डालं चैवभिहितं शीघ्रं सिद्धिफलप्रदम् ।।
प्रणवाद्यष्टमन्त्रेण शवस्य प्रोक्षणं चरेत् ।
प्रणवं कूर्चबीजं च मृतकाय नमोऽस्त्र फट् ।।
पुष्पाञ्जलित्रयं दत्त्वा प्रणमन् स्पर्शपूर्वकम् ।
र वीर परमानन्द शवानन्दकुलेश्वर ।।
आनन्दभैरवाकार देवीपर्यङ्कशङ्कर ।
वीरोऽहं त्वां प्रपद्यामि उत्तिष्ठ चण्डिकार्चने ।।
प्रणम्यानेन मन्त्रेण क्षालयेत् तदनन्तरम् ।
तालशब्दं मृतकाय नमोऽन्तं मन्त्रमुच्चरेत् ।।
शवस्नापनमन्त्रोऽयं सर्वतन्त्रेषु दर्शितः ।
धूपेन धूपितं कृत्वा गन्धादिना प्रलिप्य च ।।
रक्ताक्तो यदि देवेशि भक्षयेत् कुलसाधकम् ।
गत्वा शवस्य सान्निध्यं धारयेत् कटिदेशतः ।।
यद्युपद्रवेत अस्य दद्यान्निष्ठीवनं शवम्[४५९]।
पुनः प्रक्षालनं कृत्वा जपस्थाने समानयेत् ।।

---

४५८ अघोरास्त्रमयो मनुः- ग ।
४५९ शवे- ख, ग ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

कुशशय्यां परिष्कृत्य तत्र संस्थापयेत् शवम् ।
Public Domain. Digitization by eGangotri
एलालवङ्गकर्पूरजातिखदिरसारकैः ॥
ताम्बूलं तन्मुखे दत्त्वा शवं कुर्याद् अधोमुखम् ।
स्थापयित्वा तस्य पीठं चन्दनेन विलेपयेत् ॥
बाहुमूलादिकराद्यन्तं चतुरस्रं विभाव्य च ।
मध्यपद्मं चतुर्द्वारं दलाष्टकसमन्वितम् ॥
तत्र चैलेयमजिनं कम्बलान्तरितं न्यसेत् ।
द्वादशाङ्गुलमानानि यज्ञसूत्राणि दिक्षु च ॥
संस्थाप्य पूजयेत् तत्र इन्द्रादिदशदेवताः ।
बलिमिन्द्राय संलिख्य सुराधिपतये ततः[४६०] ॥
विघ्ननिवारणं कृत्वा सिद्धिं प्रयच्छ च द्वयम् ।
मनुनानेन पूर्ववद् बलिं दद्याच्च सामिषम् ॥
स्वस्वनामादिकं कृत्वा पूर्ववद् बलिमाहरेत् ।
सर्वेषां लोकपालानां ततः साधकसत्तमः ॥
शवाधिष्ठातृदेवेभ्यो बलिं दद्यात् सुरया सह ।
चतुःषष्टियोगिनीभ्यः शाकिनीभ्यो[४६१] बलिर्दिशेत् ॥
पूजाद्रव्यं सन्निधौ च दूरे चोत्तरसाधकम् ।
संस्थाप्यासनमभ्यर्च्य स्वमन्त्रान्ते त्रपां ततः ॥
फडित्यनेन मन्त्रेण तत्र स्वारोहणं चरेत्[४६२] ।
कुशान् पादतले दत्त्वा शवकेशान् प्रसाध्य[४६३] च ॥
दृढां निबद्धजूटिकां कृतसङ्कल्पसाधकः ।
शवोपरि समारूह्य प्राणायामं विधाय च ॥
वीरार्दनेन सम्मन्त्र्य दिक्षुः लोष्ठानि निःक्षिपेत् ।
ततो देवञ्च सम्पूज्य उपचारैः सुविस्तरैः ॥
शवास्य विधिना देवि देवतास्थापनं चरेत् ।
उत्थाय सम्मुखे स्थित्वा पठेद् भक्तिपरायणः ॥
ॐ वशो मे भव देवेश ममामुकपदं ततः ।
सिद्धिं देहि महाभागे कृताश्रमपदाम्बर ॥
मूलं समुच्चरेन्मन्त्री शवपादद्वयं ततः ।
पट्टसूत्रेण बध्नीयाद् यथोत्थातुं न शक्यते ॥

---

४६० *इमं बलिं गृह्ण द्वन्द्वं गृह्णापय युगं ततः- अधिकपाठः गमातृकायाम् ।*
४६१ *डाकिनीभ्योऽपि विनिर्दिशेत्- ख, ग ।*
४६२ *विशेत्- ख, ग ।*
४६३ *प्रमार्ज्य च- ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

ॐ भीमभीरुभयाभावो भव्यलोचनभावुकः ।
त्राहि मां देव देवेश शवानामधिपाधिप ॥
इति पादतले तस्य त्रिकोणं चक्रमालिखेत् ।
तदा स्थातुं न शक्नोति शवोऽपि निश्चलो भवेत् ॥
उपविश्य पुनस्तस्य बाहू निःसार्य पार्श्वयोः ।
हस्तयोः कुशमास्तीर्य पादौ तत्र निधापयेत् ॥
अष्टौ च संपुटीकृत्य स्थिरचित्तः स्थिरेन्द्रियः ।
सदा देवीं हृदि ध्यात्वा मौनी च जपमाचरेत् ॥
श्मशानोक्तं संख्याभिः जपं कुर्यात् कुलेश्वरि ।
अथवारम्भकालात्तु यावदुदयते रविः ॥
यद्यर्धरात्रिपर्यन्तं जप्त्वा किञ्चिन्न दृश्यते ।
तदा पूर्ववदर्घ्यादि[४६४]सप्तपादगतानि च ॥
कृत्वोपविश्य तत्रैव जपं कुर्यादनन्यधीः ।
चलाचलद्भयं नास्ति भये जाते वदेत् ततः ॥
यत् प्रार्थयसि देवेश दातव्यं कुञ्जरादिकम् ।
दिनान्तरे दास्यामि स्वनाम कथयस्व मे ॥
इत्युक्त्वा संस्कृतेनैव निर्भयस्तु पुनर्जपेत् ।
पुनश्चेन्मधुरं वक्ति वक्तव्यं मधुरं ततः॥
तदा सत्यञ्च संस्कार्य वरञ्च प्रार्थयेत् ततः ।
यदि सत्यं न कुर्याच्च वरं वा न प्रयच्छति ॥
तदा पुनर्जपेत् धीमान् एकाग्रमानसञ्जपन्[४६५] ।
तावद्रूपं[४६६] चिता तत्र देवोऽपि नोपसर्पति ॥
यत्नतस्तेन बोद्धव्यं नरो वा देवयोनयः ।
माता वा तत्सुता वापि मातुलानी तथापि वा ॥
आगत्य विघ्नञ्चरते मायया साध्यनिग्रहम् ।
उत्तिष्ठ वत्स ते कार्यं सर्वं जातं न संशयः ॥

---

४६४ *अर्घ्यादिभिः- ख, ग ।*
४६५ *भजन्- ख, ग ।*
४६६ *नररूप- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्रभातसमयो जातः कुपिताः केऽपि ते गृहे[४६७]।
प्रायशो मत्सरा लोका राजानो दण्डधारिणः।
कदाचित् केनापि दृष्टः तदा किं ते करिष्यति।
इत्यादि विविधैर्वाक्यं न च जापं परित्यजेत्॥
मृताः पितृगणास्तत्र दूरदेशनिवासिनः।
बान्धवास्तत्र आयान्ति देवरूपधरास्ततः॥
स्त्रीपुत्रसेवकादींश्च गृहीत्वानीयते परैः।
रुदन्ति पुत्रकास्तेऽपि भ्रातरोऽनुजशिष्यकाः॥
निजकान्ताङ्गं संस्पर्शं सुरस्त्रीभरणादिकम्।
गृहीत्वानीयते पत्तिः साधकैस्तद्रूपं[४६८] त्यजेत्॥
यदि न क्षुभ्यते तत्र तदा किं वा न लभ्यते।
स्त्रीरूपधारिणी देवि द्विजरूपधरः पुमान्॥
वरं गृह्णेति शब्दैर्वै त्रिवारं ते वरं लभेत्।
साधुना साधुना वापि योषिच्चेद्वरदायिनी॥
तदा वीरपदे[४६९]तस्य भूतेन किन्न सिद्ध्यति।
निष्पापपुरुषे चैव कुले चैवान्त संस्तुता[४७०]॥
असंस्कृतवरादेव पापयुक्ता न संशयः।
सन्मुखे सन्मुखे वापि संस्कृतं वक्ति चापलम्॥
सैव वीरो न सन्देहो देवस्य भैरवः स्वयम्।
न चेदेवं भवेच्चैव मायापुटितविग्रहः[४७१]॥
न वदेदुत्तरन्तत्र न किञ्चित्प्रवदेत् क्वचित्।
सर्वं संस्कृतमाख्यातिरुक्तिं[४७२] वक्तव्यमीदृशम्॥
न वदेत् स्वयं लौकिकोक्त्या[४७३] वरं ग्राह्यं निराकुलम्।
अथवा उत्कटं किञ्चिल्लभ्येऽथात्मनो हितम्॥
शब्दो वा जायते सम्यगमृतं वापि लभ्यते।
सर्वं तद्विचार्य गृहीतव्यं दिग्देवताकृतये[४७४]॥
देवान्तताया बहुधा नराकृतिश्च बह्व्यः।

---

४६७ तत्पिता क्रोशते गृहे- ख।
४६८ साधको तद्भयं त्यजेत्- ग।
४६९ वीरपते भूतल- ख।
४७० संस्कृताम्- ग।
४७१ विग्रहा- ख।
४७२ सचेत् संस्कृतमाख्याति वक्ति- ख।
४७३ नो चेत् स्वयं लौकिकोक्त्त्या- ग।
४७४ एव दिक् प्रकीर्तिताः-ख, ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
अवश्यं तत्र भेतव्यं न तत्र प्रत्ययः क्वचित् ॥
भैरवा वटुकाश्चैव कुलशास्त्रपरायणाः ।
एतच्छास्त्रप्रसङ्गेन दृश्यङ्कुटिलग्रहाः॥
पुत्रो भूत्वा हरेद्विद्यां नारी भूत्वा विमोहयेत् ।
तस्माद्यत्नपरो वीरो विचारस्त्वयमाचरेत्[४७५]॥
सत्यकृते वरं लब्ध्वा सन्त्यजेच्च जपादिकम् ।
लब्धं फलमिति ज्ञात्वा गुटिकां मोचयेत्ततः[४७६] ॥
एतच्च मार्जयित्वा तु पूजद्रव्यञ्जले क्षिपेत् ।
शवं जले च गर्ते वा निःक्षिप्य स्नानमाचरेत् ।
ततस्तु स्वगृहं गत्वा बलिं दद्याद्दिनान्तरे ॥
अग्रिमरात्रौ येषां देवानां यजमानोऽहं ते गृह्णन्तु मया दत्तं बलिमिमनुत्तमम् ।
अथ यैर्याचितः श्वानरकुञ्जरशूकरान् ।
दत्त्वा पिष्ठमयानेव कर्तव्यं समुपोषणम् ॥
तन्त्रान्तरेऽपि
यावत् क्षोदमयं वापि सालि क्षोदमयं च वा ।
चन्द्रहासेन विधिवत् तत्र मन्त्रेण घातयेत् ॥
परेऽह्नि नित्यमाचार्य पञ्चगव्यं ततो पिबेत्[४७७] ।
ब्राह्मणान् भोजयेत्तत्र पञ्चविंशतिसंख्यया ॥
पञ्च पञ्च विहीनं वा क्रमात्[४७८] चैवदशावधि ।
ततः स्नात्वा च भुक्त्वा च निवसेदुत्तमस्थले ॥
यदि न स्याद्विप्रभोज्यं तदा निर्धनतां व्रजेत् ।
तेन चेन्निर्धनत्वं स्यात्तदा देवी प्रकुप्यति ॥
त्रिरात्रं वाथ षड्रात्रं गोपयेत् कुलसाधकम् ।
शय्यायां यदि गच्छेद्वै तदा व्याधिर्विनिर्दिशेत् ॥
गीतं श्रुत्वा च वधिरो निश्चक्षुः नृत्यदर्शनात् ।
यदि वक्ति दीने वाक्यं स तदा मूकतां व्रजेत् ॥
पञ्चदशदिनान्ते वै देहे देवस्य संस्थितिः ।
प्रातर्नित्यक्रियान्ते तु बिल्वपत्रोदकं पिबेत् ॥
ततस्तु स्नायात् तीर्थादौ सम्प्राप्ते षोडशे दिने ।
स्वाहान्तमूलमुच्चार्य तर्पयामि नमः पदम् ॥

---

४७५ *विद्यात्रमाचरेत् स्वयम्- ख, ग ।*
४७६ *शवं प्रक्षाल्य संस्नाप्य बन्धनं मोचयेत् पदे । अधिकपाठः गमातृकायाम् ।*
४७७ *पिवेत् ततः- ख ।*
४७८ *पञ्च पञ्च विहीनाद् वा क्रमाच्चैव दशावधि- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

एवं तत्र यावदुक्तं देवतान् तर्पयेज्जलैः ।
गोब्राह्मणानां निन्दां च न कुर्याच्च कदाचन ॥
गोदेवब्राह्मणादींश्च प्रत्यहं संस्पृशेच्छुचिः ।
स्नानतर्पणशून्यस्य न स्याद्देवस्य तर्पणम् ॥ तृप्तिरित्यर्थः ॥
इत्यनेन विधानेन सिद्धिं प्राप्नोति निश्चितम् ।
इति भुक्त्वा नवान् भोगानन्ते याति हरेः पदम् ॥
सङ्गे वापि निसङ्गं वा निष्फलं सफलं च वा ।
कृत्वा साधनमेवेति शक्तेः प्रियतमो भवेत् ॥
शवाभावे श्मशाने वा कार्या वै वीरसाधनम्[४७९] **।**
यो भावो यस्य वै प्रोक्तस्तैर्भावे यदि नार्चयेत् ॥
दशाहक्रमयोगेन भ्रष्टो भवति साधकः ।
नोपदेव तत्र भावः पूजान्तत्र न सन्दिशेत् ।
कुलान्मन्त्रं गृहीत्वा तु यावच्छुद्धिः प्रजायते ॥

इति प्रमाणम् ।

अथ प्रयोगः

आदौ मूलमन्त्रेण **घटिबन्धेन वस्त्रं**[४८०] परिधाय तद्बाह्यवस्त्रेण[४८१] वेष्टयित्वा कृतोष्णीषः सन् मूलेन रक्तचन्दनादिना अङ्गं विलेपनं कृत्वा मूलमन्त्रेण सिन्दूरेणोर्ध्वपुण्ड्रकं कृत्वा हृदि देवीं मूर्ध्नि गुरुमाधाय[४८२] यथोक्त यथोक्तवेषकैः सार्द्धं अभुक्तो भुक्तभोज्यो वा विहितदिने यथासम्भवं बलिपूजोपहारादिकं गृहीत्वा हृदि मन्त्रं ध्यायन् प्रहराभ्यन्तरेण यात्रां कृत्वा प्रक्षालितं स्थानं नत्वा प्रक्षालनपक्षे अस्थिसञ्चयं कृत्वा उभयं यथापि अस्त्राय फडिति मूलमन्त्रेण च

यागस्थानं सम्प्रोक्ष्य गुरुं गणेशं वटुकम् ।
योगिनीं च नमस्कृत्य वामपादपुरःसराम् ॥
ये चात्र संस्थिता देवा राक्षसाश्च भयानकाः ।
पिशाचाः सिद्धयक्षाश्च गन्धर्वाप्सरसाङ्गणाः ॥
योगिन्यो मातरो भूताः सर्वांश्च खेचरस्त्रियः ।
सिद्धिदास्ते भवन्त्वत्र तथा च मम रक्षकाः ॥ इति द्वयं पठन् नमस्कृत्य पुष्पाञ्जलित्रयं क्षिपेत् । ततः सप्तपात्रे बलिं कृत्वा चतुर्दिक्षु चतुष्पात्राणि चितामध्ये पात्रत्रयं संस्थाप्य पूर्वदिशि पूर्ववदिति । ॐ हुँ श्मशानाधिपं इमं सामिषान्नं बलिं गृह्ण गृह्ण गृह्णापय गृह्णापय विघ्ननिवारणं कुरु कुरु स्वाहा इति मन्त्रेण पाद्यादिभिः सम्पूज्य बलिं दत्त्वा दक्षिणस्यां दिशि भैरवं भयानकं पाद्यादिभिः सम्पूज्य ॐ ह्रीं भैरवभयानके इमं सामिषान्नं बलिमित्यादिमन्त्रेण बलिन्दत्त्वा पश्चिमदिशि महाकालं पाद्यादिभिः सम्पूज्य ॐ हुँ महाकाल श्मशानाधिप इमं

---

४७९ साधना- ग ।
४८० मूलमन्त्रेण घटिवस्त्रबन्धवस्त्रेण- ख, ग ।
४८१ तावद्वस्त्रान्तरेण वेष्टयित्वा- ख ।
४८२ गुरून् नत्वा- ख, ग ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

बलिमित्यादिमन्त्रेण बलिं दत्त्वा,

उत्तरदिशि महाकालभैरवं पाद्यादिभिः सम्पूज्य ॐ हुँ महाकालभैरवश्मशानाधिप इममित्यादिमन्त्रेण बलिं दत्त्वा चितामध्ये प्रथमं श्मशानाधिपं[४८३] पाद्यादिभिः सम्पूज्य ।

ॐ कालरात्रि महाकालिके घोरनिःस्वने गृहाणेमं बलिं मातर्देहि सिद्धिमनुत्तमाम् । ॐ कालिकायै स्वाहेति मन्त्रेण बलिं दत्त्वा भूतनाथं पाद्यादिभिः सम्पूज्य । ॐ भूतनाथ श्मशानाधिप इमं बलिमित्यादि मन्त्रेण बलिं दत्त्वा सर्वगणनाथं पाद्यादिभिः सम्पूज्य सर्वगणनाथ इमं बलिमित्यादिक्रमेण बलिं दत्त्वा चितापश्चिमभागे किञ्चिदस्थि एकत्र कृत्वा ॐ ह्रीं आधारशक्तये नमः इति पञ्चगव्येन प्रोक्षणं कृत्वा भूर्जपत्रे वटपत्रे वा ह्सौरीति पीठमन्त्रं लिखित्वा तत्र धृत्वा तदुपरि कम्बलमासनमास्तीर्य ॐ आधारशक्तये नम इति मन्त्रेण सम्पूज्य तत्र वीराद्यासनेनोपविश्य हुँ ह्रीं[४८४] कालिके घोरद्रंष्टे प्रचण्डचण्डनायिके दानवान् दारय हन हन परवीरं महाविघ्नं छेदय छेदय स्वाहा हुँ फडिति वीरार्दनमन्त्रेण लोष्ठानि संमन्त्र्य चतुर्दिक्षु निःक्षिप्य अर्केन्दुसितवाद्यातूलकैर्वर्तिकां निर्माय अस्त्राय फडिति मन्त्रेण लोहाभ्यां धारं निषण्य तदुपरि रक्षार्थं प्रदीपं प्रज्वाल्य अस्त्राय फडिति मन्त्रेण सम्पूज्य स्वस्वकल्पोक्तविधिना भूतशुद्ध्यादिषोढान्तं विधाय यथासम्भवं देवीं सम्पूज्य यथोक्तसंख्यया आरम्भोदययर्पन्तं वा जपेदिति संख्यापूर्तिपर्यन्तं वा जप्त्वेति किञ्चिन्नोपलक्ष्यते । तदा ॐ दुर्गे दुर्गे रक्षिणि स्वाहा इति जयदुर्गमन्त्रेण देव्यै अर्घं दत्त्वा

ॐतिलोसि सोमदैवत्यो गोसवस्तृप्तिकारिका:[४८५] ।

पितृणां स्वर्गदाता त्वं मृतानां मम रक्षकः ।

भूतप्रेतपिशाचानां विघ्नेषु शान्तिकारका: ॥ इति मन्त्रेण चतुर्दिक्षु तिलान् निःक्षिप्य ॐ दुर्गे दुर्गे रक्षिणि स्वाहेति मन्त्रेण सर्षपाञ्चतुर्दिक्षु विकीर्य सप्तपदं गत्वा पुनस्तत्रोपविश्य देवीं सम्पूज्य निर्भयः सञ्जपेदिति ।

इति चितासाधनपद्धतिः ।

अथ शवसाधनविधिरुच्यते[४८६] ।

धौतेत्यादिपूर्वोक्तक्रमेण वेशादिकं विधाय बल्यर्थकं[४८७] पूजोपहारादिकं चादाय आवक्षकैः सार्द्धप्रहराभ्यन्तरे स्थानतत्त्वोक्तस्थानेष्वन्यतमं स्थानं गत्वा किञ्चित् स्थानं परिष्कृत्य सामान्यार्घं विधाय पूर्वमुखो भूत्वा मूलमन्त्रं फडिति चोच्चार्य तत्स्थानं सम्प्रोक्ष्य गुरुं गणेशं वटुकं योगिनीं नमस्कृत्य[४८८]सप्तपात्रे बलिं कृत्वा चतुःपात्रं चतुर्दिक्षु पात्रत्रयमध्ये संस्थाप्य पूर्वोक्तक्रमेण पाद्यादिभिः सम्पूज्य पूर्वोक्तक्रमेण श्मशानाधिपतिभ्यो बलिं दद्यात्[४८९] । अघोरमन्त्रेण शिखां बध्वा सुदर्शनमन्त्रेण आत्मनि रक्ष रक्षेति सहितेन रक्षां कृत्वा स्वस्वकल्पोक्तभूतशुद्ध्यादिकं कृत्वा[४९०] ।

ॐ दुर्गे दुर्गे रक्षिणि स्वाहा इति मन्त्रेण सर्षपान्तत्र विकीर्य तिलोऽसीत्यादिमन्त्रेण तिलान्विकीर्य विहितशवसमीपे

---

४८३ श्मशानकालिकां पाद्यादिना- ख, ग ।

४८४ हुँ, हुँ हुँ हुँ ह्रीं ह्रीं- ग ।

४८५ कारकः- ख, ग ।

४८६ शवसाधनपद्धतिः लिख्यते-ख, ग ।

४८७ वल्यर्थं-ख ,ग ।

४८८ पूर्वोक्तवीरार्दनमन्त्रं भूमौ विलिख्य ये चात्रेत्यादिमन्त्रेण पुष्पाञ्जलित्रयं दत्त्वा अधिकपाठः गमातृकायाम् ।

४८९ निवेद्य- ख, ग ।

४९० निष्पाद्य-ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
गत्वा अस्त्राय फडिति मन्त्रेण शवं संप्रोक्ष्य । ॐ हुँ मृतकाय नम इति मन्त्रेण शवोपरि पुष्पाञ्जलित्रयं दत्त्वा -
रे वीर परमानन्द शवानन्द कुलेश्वर ।
आनन्दभैरवाकार देवीपर्यङ्कशङ्करः ॥
वीरोऽहं त्वां प्रपद्यामि उत्तिष्ठ चण्डिकार्चने ॥
इत्यनेन मन्त्रेण स्पर्शपूर्वकं नमस्कृत्य हुँ मृतकाय नम इत्यनेन मन्त्रेण सुगन्धिजलेन प्रक्षाल्य वस्त्रेणाच्छाद्य धूपेन धूपयित्वा चन्दनेन लेपयित्वा कटिदेशं धृत्वा आनीय कुशशय्यां परिष्कृत्य तदुपरि संस्थाप्य एलालवङ्गादियुक्तं ताम्बूलं तन्मुखे दत्त्वा शवमधोमुखं संस्थाप्य तत्पृष्ठे चन्दनेन लेपयित्वा बाहुमूलादिकाद्यन्तं चतुरस्रं विलिख्य तन्मध्ये चतुर्द्वारात्मके भूपुरसहितं अष्टदलात्मकं पद्मं विलिख्य तत्र कम्वलाद्यासनमास्तीर्य द्वादशाङ्गुलमानानयय ज्ञकाष्ठकीलकाञ्चतुर्दिक्षु निःक्षिप्य दिक्पालान् तत्र पूजयेत् तद्यथा । मँ[४९१] इन्द्राय सुराधिपतये ऐरावतवाहनाय वज्रहस्ताय शक्तिपरिषदाय सपरिवाराय इदं पाद्यं नमः इत्यादिभि इति मन्त्रेण सम्पूज्य ॐ इँ इन्द्राय सुराधिपतये इमं बलिं **गृह्ण गृह्ण गृह्णापय गृह्णापय** विघ्ननिवारणं कुरु कुरु सिद्धिं प्रयच्छ स्वाहा इति पूर्वदिशि इन्द्राय बलिन्दत्त्वा ।
रँ बह्नये तेजोधिपतये मेषारूढाय शक्तिहस्ताय सपरिवाराय पाद्यन्नम इत्यादिभिः सम्पूज्य । ॐ यमाय प्रेताधिपतये इममित्यादिना बलिं दत्त्वा दक्षिणदिशि । नैर्ऋृताय रक्षोधिपतये अश्ववाहनाय खड्गहस्ताय इत्यादिपूर्ववत् सम्पूज्य ॐ नैर्ऋतरक्षाधिपतये इममिति पूर्ववद्बलिं दत्त्वा नैर्ऋतदिशि ।
वं वरुणाय जलाधिपतये मकरवाहनाय पाशहस्ताय इममिति पूर्ववत् सम्पूज्य पश्चिमदिशि बलिं दत्त्वा ।
यँ वायवे वाय्वाधिपतये इममिति पूर्ववद्वायुदिशि बलिं दत्त्वा । कँ कुबेराय यक्षराजाधिपतये इदमित्यादिना उत्तरदिशि सम्पूज्य कुँ कुबेराय यक्षाधिपतये इममिति बलिं दत्त्वा । हौँ ईशानाय भूताधिपतये वृषवाहनाय त्रिशूलहस्ताय इदमित्यादि सम्पूज्य हौ ईशानाय भूताधिपतये वृषवाहनाय त्रिशूलहस्ताय इममित्यादि बलिं दत्त्वा ऐशान्याम् ।
ह्रीँ ब्रह्मणे लोकाधिपतये हंसवाहनाय पद्महस्ताय इत्यादिपूर्ववत् सम्पूज्य इन्द्रेशानयोर्मध्ये ॐ ब्रह्मणे लोकाधिपतये इममित्यादिना बलिं दत्त्वा ।
निर्ऋृतिवरुणयोर्मध्ये । अँ अनन्ताय नागाधिपतये रथवाहनायेति पूर्ववत् सम्पूज्य ॐ अनन्ताय नागाधिपतये इममित्यादिना बलिं दत्त्वा कुलद्रव्येण सह शवाधिष्ठातृदेवताभ्यो बलिं निवेद्य चतुःषष्टियोगिनीभ्यो नम इति बलिं दत्त्वा पूजोपकरणं समीपे निधाय दूरे चोत्तरसाधकं संस्थाप्य मूलमन्त्रं ह्रीँ शवासनाय नम इत्यनेन आसनमभ्युक्ष्य मन्त्रं स्मरन् अश्वारोहणेन शवोपरि उपविश्य स्वपादतले कुशान्दत्त्वा शवकेशान् प्रमार्ज्य जूटिका[४९२] बद्ध्वा स्ववामे अर्घपात्रादिकं संस्थाप्य शवस्य कुलद्रव्येण त्रिः सकृद्वा सपरिवारदेवीं सन्तर्प्य अमुकमासे अमुकपक्षे अमुकगोत्रोऽमुकशर्मा अमुकमन्त्रस्य सिद्धिकामः शवारोहणपूर्वकं पुरश्चरणमह. करिष्ये । शवादुत्थाय तत्सन्मुखं गत्वा -

---

४९१ लं- ग ।
४९२ जूटिकायां पीठादिगुरुपङ्क्त्या देवीं सम्पूज्य पूर्वोक्तवीरार्दनमन्त्रेण लोष्ठकान्यभिमन्त्र्य चतुर्दिक्षु निःक्षिप्य शवास्ये कुलद्रव्येण त्रिःसकृद् वा सपरिवारां देवीं सन्तर्प्य- अधिकपाठः गमातृकायाम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ॐ वशो मे भवदो वशमामुक पदन्ततः ।

सिद्धिन्देहि महाभाग कृताश्रमपदाम्बरः ॥

इति मन्त्रं पठित्वा मूलं समुच्चरन् पट्टसूत्रेण तस्य पादद्वयं बद्ध्वा–

ॐ भीमभीरुभयाभावभव्यलोचनभावुकः ।

त्राहि मां देव देवेश शवानामधिपाधिप इति ॥

शवपादतले सिन्दूरादिना त्रिकोणं विलिख्य पुनः शवोपर्युपविश्य[४९३] मालामादाय पूर्वोक्तसंख्यया विधूदयपर्यन्तं वा जपेदिति[४९४] । शवस्य चलाचले न भेतव्यं वक्तव्यञ्च ।

यत्प्रार्थयसि देवेश दातव्यं कुञ्जरादिकम् ।

दिनान्तरे च दास्यामि स्वनाम कथयस्व मे ॥

इत्युक्त्वा निर्भयो जपेत्[४९५] । प्रत्यहं प्रत्ययं कुर्यादेवं बहुविधप्रकारैर्भूयो भूयोऽपि निश्चित्य सत्यं कारयित्वा वरं प्रयच्छति यदि सत्यं न करोति तदा वरं न प्रयच्छति तदा वरं गृहीत्वा जपं त्यजेत् । इत्युक्तशावजूटिकां मोचयित्वा शवादुत्थाय पादबन्धनं विमोच्य पादतलवर्तिचक्रं निर्माल्य शवं जलेन प्रक्षाल्य पूजोपकरणसहितं जले गर्ते वा निःक्षिप्य गृहं गत्वा यथासम्भवं बलिन्दत्त्वा अग्रिमदिने उपोष्य पिष्टकमयान् कुञ्जरान् वराहादीन् बलीन् कृत्वा बहिर्नीत्वा यैरस्मासु बलिर्याचित येषां वाहं यजमान इत्युक्त्वा स्वस्वोक्तबलिमन्त्रेण बलिमुत्सृज्य अर्धचन्द्राकृतिखड्गेन बलिं घातयेदिति ।

तदग्रिमदिने प्रातःकृत्यादिकं विधाय पञ्चगव्यं भुक्त्वा पञ्चदशविंशति ब्राह्मणान् भोजयित्वा गुरून् सन्तोष्य हविष्यं भुक्त्वा पवित्रस्थानं समाश्रयेदिति । एवं त्रिचतुष्पञ्चपर्यन्तं कुलसाधनं संगोप्य दशदिनपर्यन्तं स्त्रीवाद्यनृत्यादीनि वर्जयित्वा सत्यं वचः परो भूत्वा गोब्राह्मणदेवानां भक्तिं कुर्वन् षोडशदिने शतत्रयं देवतां विधिवत् सन्तर्प्य यथासुखं विहरेदिति ।

इति शवसाधनपद्धतिः ।

अथवान्यप्रकारेण पुरश्चरणमिष्यते-

शनौ वा कुजवारे वा नरमुण्डसमाहृतम् ।

पञ्चगव्येन मिलितं चन्दनाद्यैर्विशेषतः ॥

निःक्षिप्य भूमौ हस्तार्द्धमानतः कानने वने[४९६] ।

तत्र तद्दिवसे रात्रौ सहस्रपरिमाणतः[४९७] ।

एकाकी प्रजपेन्मन्त्रं स भवेत् कल्पपादपः ॥

---

४९३ *शवपार्श्वयोस्तद्धस्तौ निःसार्य हस्तयोरूपरि कुशान् दत्त्वा तत्र स्वपादौ विधायाङ्गुष्ठौ संपुटौ कृत्वा रहस्यमालामादाय पूर्वोक्तसंख्यया आरभ्य विधूदयपर्यन्तं अधिकपाठः ।*

४९४ *संख्या पूर्तौ अर्धरात्रिपर्यन्तं वा जपेदिति । यदि यत्किञ्चिन्न लभ्यते तदा पूर्वोक्तदुर्गामन्त्रेण देवतायै अर्घ्यं दद्यात् । तेनैव सर्षपान् तिलोऽसीत्यादिना तिलान् चतुर्दिक्षु विकीर्य सप्तपदानि गत्वा पुनस्तत्रैवोपविशन् पाददेवतां संपूज्य सिद्धिपर्यन्तं जपेदिति । अधिकपाठः ।*

४९५ *पुनश्चेन्मधुरं वक्ति तदान्यैरपिप्रकारैः स्नात्वा देवतां निश्चित्य सत्यं कारयित्वा जपं त्यजेत् । सत्यं यदि न करोति वरं च न प्रयच्छति-ख । नानाविधमांसाय प्रत्याख्यति तदा पुनरपि जपेत् । प्रत्ययं न कुर्यात् अधिकपाठः ग ।*

४९६ *धने- ग ।*

४९७ *मानतः- ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथवा–

शवमानीय तद्द्वारे तेनैव परिसज्य च।
तद्दिनान्तदिनं यावत् तावदष्टोत्तरशतम्॥
स भवेत् सर्वसिद्धीशो नात्र कार्या विचारणा।
अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि॥
सूर्योदयात्समारभ्य यावत् सूर्योदयान्तरम्।
तावज्जप्त्वा निरातङ्कं सर्वसिद्धीश्वरो भवेत्॥

अथवा–

चन्द्रसूर्यग्रहे चैव ग्रासावधिविमुक्तितः।
यावत्संख्यं मनुं जप्त्वा तावद्धोमादिकमिति[४९८]॥
सूर्यग्रहणकालाच्च नान्यकालः[४९९] प्रशस्यते।
तत्र यद्यत्कृतं[५००] कर्म तदनन्तफलं भवेत्॥ तावदिति जपदशांशहोमादिकमित्यर्थः।

तन्त्रान्तरे च–

ग्रहणे चन्द्रसूर्यस्य शुचिपूर्वमुपोषितः।
नद्यां समुद्रगामिन्यां नाभिमात्रे जलेस्थितः॥
यद्वा शुद्धोदके स्नात्वा शुचौ देशे समाहितः।
स्पर्शाद्विमुक्तपर्यन्तं जपं कुर्यादनन्यधीः॥
अनन्तरं दशांशेन क्रमाद्धोमादिकञ्चरेत्।
तदन्ते महतीं पूजां कुर्याद् ब्राह्मणभोजनम्।
ततो मन्त्रस्य सिद्ध्यर्थं गुरुं सम्पूज्य तोषयेत्॥

अथवा कालीतन्त्रे–

शरत्काले चतुर्थ्यादिनवम्यन्तं विशेषतः।
भक्तितः पूजयित्वा तु रात्रौ तावत् सहस्रकम्॥
जपेदेकाकी विजने केवलं तिमिरालये।
अष्टम्यादिनवम्यन्तमुपवासपरो भवेत्।
स भवेत् सर्वसिद्धीशो नात्र कार्या विचारणा॥

तावदिति षट्सहस्रमित्यर्थः।

तदुक्तं मुण्डमालातन्त्रे–

शरत्काले महापूजा क्रियते या च वार्षिकी।
तस्मिन् पक्षे विशेषेण पुरश्चरणतत्परः॥
अष्टम्यादिनवम्यन्तं उपवासपरो भवेत्।

---

४९८ *तावद् होमादिकं चरेत्- ग।*
४९९ *अन्यकालः- ग।*
५०० *मुषितं कर्म- ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पूजयेद् भक्तितो रात्रौ नित्यं षट्सहस्रं जपेत्[५०१] ॥

अथवेत्यादि–

अन्यत्र गुरुमार्गस्य लङ्घनं नैव कारयेत् ।

अष्टमीसिद्धि[५०२]वेलायामष्टोत्तरलतागृहम्[५०३] ॥

प्रविश्य मन्त्री विधिवत् ताः समभ्यर्चयेत्ततः[५०४] ।

पूर्वोक्तकल्पमासाद्य पूजादिकं समाचरेत् ॥

केवलं कामदेवोऽसौ जपेदष्टोत्तरशतम् ।

किञ्चिज्जपं मनुं नीत्वा[५०५]उल्कां संग्राह्य[५०६] मस्तके ।

महासिद्धिर्भवेत् सद्यो लतादर्शनपूजनात् ॥

अथवेत्यादि–

कुलाकृष्टिलतागात्रे लिखित्वा मन्त्रमेव च ।

सम्पूज्य तत्र संस्कारं कृत्वा तस्यै निवेद्य च ॥

किञ्चज्जपं मनुं नीत्वा देवताभावतत्परः ।

तां विसृज्य नमस्कृत्य स्वयं जप्त्वा तु संयतः ।

प्रातः स्त्रीभ्यो बलिं दत्त्वा मन्त्रसिद्धि र्न संशयः ॥

अथवेत्यादि–

वस्त्रालङ्कारभूषाद्यैः सन्तोष्य गुरुमेव च ।

तत्सुतं तत्सुतां वापि तत्पत्नी च विशेषतः ।

पूजयित्वा सुसंजप्ता[५०७] सर्वसिद्धीश्वरो भवेत् ॥

इति राघवभट्टविरचिते कालीतत्त्वे पुरश्चरणप्रतिपादनन्नामाष्टमतत्त्वम् ॥

---

५०१ जपं चरेत्- ग।
५०२ सन्धि- ख, ग।
५०३ लतागृहे- ग।
५०४ समभ्यर्च्य प्रयत्नतः- ग।
५०५ तासां च यत्र मूलेन- ख।
५०६ संगृह्य मस्तके- ग।
५०७ मनुं जप्त्वा- ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नवमतत्त्वम्

अथ नैमित्तिकविधिरुच्यते

तदुक्तं स्वतन्त्रतन्त्रे–

नित्यं नैमित्तिकं काम्यं सापेक्षं पूर्वपूर्वतः ।
अन्यथा चेद् भवेद् व्यर्थं कुर्यादावश्यकं ततः ॥

कालीतन्त्रे च[५०८]–

नित्याचाररतो[५०९] मन्त्री कुर्यान्नैमित्तिकार्चने ।
नैमित्तिकार्चने सिद्धे कुर्यात् काम्यमखण्डितम् ॥

मत्स्यसूक्ते–

अष्टम्याञ्च चतुर्दश्यां पूजयेच्च प्रयत्नतः।
यद्यत् प्रार्थयते मन्त्री तत्तदाप्नोति नित्यशः ॥
लभते मञ्जुलां[५१०]वाणीं तथाष्टम्यां सदा यजेत्[५११] ।
अष्टम्यां पूजने देव्याः सर्वागमफलप्रदा ॥
रम्भापुष्पं बीजपूरं सुगन्ध[५१२] परिमिश्रितम् ।
मिश्रीकृत्य बलिं दद्यात् अष्टम्याञ्च विशेषतः ॥
ऊर्णमांसं महादेव्यै दद्याद् गन्धं विशेषतः ।
फलं क्षीरं तथा दद्यात् दाधितं शर्करान्वितम् ॥
तस्मात् सर्वप्रयत्नेन सर्वदा पूजयेच्छिवाम् ।
दानं चाक्षयसिद्ध्यर्थं दद्याद्देव्यै प्रयत्नतः ॥

तथा नीलतन्त्रे–

अष्टम्याञ्च चतुर्दश्यां पूजयेच्च यथाविधि ।
आज्ञासिद्धिमवाप्नोति जपापुष्पेण चार्चनात् ॥
चन्दनं चार्ककुसुमं दद्यात् श्वेतापराजिताम्[५१३] ।
अर्घ्यं दद्याद्विशेषेण नित्यपूजा स्युः[५१४] सर्वदा ॥
अष्टोत्तरशतं जाप्यं यावज्जीवितसंख्यया ।
यत्र[५१५] सम्पूजयेद्दुर्गां महाष्टम्यां प्रयत्नतः ॥

---

५०८ नीलतन्त्रे
५०९ परो- ख, ग ।
५१० चोज्वलां- ख, ग ।
५११ जपेत्- ख, ।
५१२ सुगन्धि- ख ।
५१३ दद्यात् श्वेतापराजिताम्- ख, ग ।
५१४ नित्यपूजासु- ख, ग ।
५१५ यत्तु- ख, ग ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

जन्मत्रयार्जितं पापं तत्क्षणादेव नश्यति[५१६]।
कुलवारे कुलाष्टम्यां चतुर्दश्यां विशेषतः॥
योगिनीपूजनं तत्र प्रधानं कुलपूजनम्।
यथा विष्णुतिथौ विष्णुः पूजितो वाञ्छितप्रदः।
तथा कुलतिथौ दुर्गा पूजिता वरदायिनी॥
अथ कुलवारादयो यथा रुद्रयामले –
रविश्चन्द्रो गुरुः शौरिश्चत्वारश्चाकुला मताः।
भौमशुक्रौ कुलाख्यौ[५१७] तु बुधवारः कुलाकुलाः॥
द्वितीयादशमीषष्ठीकुलाकुलमुदाहृतम्।
विषमाश्चाकुलाः सर्वे शेषाश्च तिथयः कुलाः॥
वारुणाद्रविजिन्मूलं कुलाकुलमुदाहृतम्।
कुलानि समधिष्ठानि शेषभान्यकुलानि तु॥
तिथिवारे च नक्षत्रे अकुले स्थायिनो जयः।
कुलक्षयायिनो[५१८]नित्यं सम्यक्[५१९]चैव कुलाकुले॥
इत्याद्युक्तं मत्स्यसूक्तेऽपि–
द्वादश्यां पूजयेद्विष्णुं चतुर्दश्यामुमापतिम्।
अष्टम्यां पूजयेच्छक्तिं सर्वसिद्धिमभीप्सुभिः॥

इति श्रीमद्राघवभट्टविरचिते कालीतत्त्वे नैमित्तिकप्रतिपादनन्नाम नवमतत्त्वम्।

---

५१६ नाशयेत्- ख, ग।
५१७ कुलौ ख्यातौ- ख, ग।
५१८ कुलाख्ये यायिनो नित्यं साम्यं चैव कुलाकुले- ख, ग।
५१९ साम्यं- ख, ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

दशमतत्त्वम्

अथ काम्यविधिरुच्यते

तदुक्तं कालीतन्त्रे–

अथ काम्यविधिं वक्ष्ये येन सर्वत्र सर्वगः।
साधकः साधयेत् सिद्धिं देवानामपि दुर्लभाम्॥
कुलागारं पुष्पितताया दृष्ट्वा यो जपते नरः।
अयुतैकप्रमाणेन साधकः स्थिरमासनः[५२०]॥
केवलं गुप्तभावेन स तु विद्यानिधिर्भवेत्।
संस्कृताः प्राकृताः शब्दा लौकिका वैदिकास्तथा॥
वशमायान्ति ते सर्वे साधकस्य न चान्यथा।
अथवा मुक्तकेशश्च हविष्यं[५२१]भक्षयेन्नरः॥
प्रजप्यादयुतं प्राज्ञ एतदेवफलं लभेत्॥
नग्नां परलतां पश्यन्नयुतं यस्तु साधकः।
प्रजपेत् स भवेत् सद्यो विद्याया वल्लभः स्वयम्॥
तस्य दर्शनमात्रेण वादिनः कुण्ठतां गताः।
गद्यपद्यमयीं वाणीं सभायां तस्य जायते॥
तन्नाम्ना सुधियः सर्वे प्रणमन्ति मुदान्विताः।
तस्य वाक्यपरिचयाज्जडो[५२२]भवति वाग्मितः॥
अथवा मुक्तकेशश्च हविष्यं भक्षयेन्नरः।
प्रजप्यादयुतं तस्य एषः प्रतिनिधिः स्मृतः॥
धनकामस्तु यो विद्वान् महदैश्वर्यकामुकः।
बृहस्पतिसमो यस्तु भवितुं वाञ्छते[५२३]नरः॥
अष्टोत्तरशतं जप्त्वा कुलमामन्त्र्य तत्त्ववित्।
मैथुनं यः प्रयात्येषः[५२४] स तु सर्वफलं लभेत्॥
लतारतेषु जप्तव्यं महापातकमुक्तये।
लता यदि न संसर्गे तदा मज्जां प्रयत्नतः॥
समुत्सार्य जपेन्मन्त्रं धर्मकामार्थसिद्धये।

कुलचूडामणावपि–

रजोवस्थां समालोक्य तन्मूले त्विष्टदेवताम्।

---

५२० *स्थिमानसः- ग।*
५२१ *हवि र्भुक्त्वा सुसंयुतः- ख, ग।*
५२२ *जडा भवन्ति वाग्मिनः- ख, ग।*
५२३ *कामयेन्नरः- ख।*
५२४ *करोत्येषः- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पूजयित्वा महारात्रौ त्रिदिनं प्रजपन्मनुम् ॥
लक्षपीठफलन्देव[५२५] लभते नात्र संशयः ।
वेतालपादुकासिद्धिं खड्गसिद्धिं च भैरव ॥
अञ्जनं तिलकं गुह्यं साधयेत् साधकोत्तमः ।
प्रजपेत् त्रिदिनमष्टोत्तरसहस्रमिति शेषः ॥
अत एव मन्त्रचूडामणावप्याह–
यत्र जप्ये च होमे च संख्या नोक्ता मनीषिभिः ।
तत्रेयं गणना प्रोक्ता गजान्तकसहस्रकम् ॥
प्रयोगान्तरमपि गन्धर्वाख्ये–
पृथ्वीमृतुमतीं वीक्ष्य सहस्रं यदि नित्यशः ।
तदा वादिस्वसिद्धान्त हस्तः क्षितितलं विशेत् ॥
पर्वते हस्तमालोक्य[५२६] निर्भयो यतमानसः ।
कवितां लभते सोऽपि अमृतत्त्वं च गच्छति ॥
पद्मं दृष्ट्वा तथाबिम्बं अञ्जनं शिखरे[५२७] तथा ।
चामरं रविबिम्बं च तिलपुष्पसरोवरम् ॥
त्रिसूत्रं[५२८] वीक्ष्य जप्त्वा तु शतशः शुद्धभावतः ।
मुखप्रसादसुवचा सुलोचनसुखास्पदम्[५२९]।
लभते च यथासंख्यं श्रृणु पार्वति सादरम् ॥
नित्यश इति रजोवस्थायामित्यादिवाक्यैकतया तद्वदिष्टदेवतां पूजयित्वा दिवसत्रयपर्यन्तं सहस्रं जपेदित्यर्थः। इदमुपलक्षणम् । पर्वत इत्याद्यपि तस्यैव[५३०] बोद्धव्यम् ।
महाचीनक्रमे देवीं ध्यात्वा तत्र प्रपूजयेत्[५३१] ।
उद्यानोद्भवपुष्पेण[५३२] पूजयेद् भक्तिभावतः ॥
स भवेत् कुलदेवश्च कुलद्रुमरतः शुचिः ।
ब्रह्मतरोर्महापद्मे देवीं ध्यात्वा यथाविधि ॥
तत्सुधारससारेण तर्पयेन्मातृकानने ।
महाचीनद्रुमलतावेष्टितः साधकोत्तमः ॥
रात्रौ यदि जपेन्मन्त्रं सैव कल्पलता भवेत् ।

---

५२५ *लक्षपीठफलादेव- ख, ग ।*
५२६ *हस्तमारोप्य- ख, ग ।*
५२७ *शिखरं तथा- ख, ग ।*
५२८ *त्रिशूलम्- ग ।*
५२९ *सुहास्यकम्- सुकेशं सुभगं गन्धं सुजनं मुखमेव च अधिकपाठः- ख ।*
५३० *तथैव- ख, ग ।*
५३१ *प्रपूज्य च- ख, ग ।*
५३२ *तद्गतोद्भवपुष्पेण पूजयेत् भक्तिभावतः- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

तिथिक्रमेण संख्याभिर्लताभिर्वेष्टितो यदि ॥
तदा मासेन सिद्धिः स्यात् सहस्रजपमानतः ।
अष्टम्याञ्च चतुर्दश्यां द्विगुणं यदि दृश्यते ।
तदेव महती सिद्धिर्देवानामपि दुर्लभाम् ॥
कुलचूडामणावप्याह[५३३]–
आनीय देवीं तद्गात्रे व्यापकं विन्यसेत् ततः ।
प्रथमं साधकश्रेष्ठो देवीकोटस्य[५३४]मस्तके ॥
विलिख्य यन्त्रं पूर्वोक्तं पूजयेत् कुलकर्मणा[५३५] ।
पीठदेवीन्तु प्रथमं पूजयेद् गन्धपुष्पकैः ॥
महाभागान्ततो मूलदेवीमावरणैः सह ।
लक्षैकं तत्र जप्त्वा तु उड्डीयाने[५३६]ततो विशेत् ॥
पीठे च योगनिद्राख्यां[५३७]पूजयित्वा ततो जपेत् ।
निजेष्टदेवतां तत्र जपेल्लक्षं समाहितः ॥
जप्त्वा लक्षं ततो रात्रौ कामाख्यं प्रथमं यजेत् ।
कामरूपे ततो गत्वा कात्यायनीं जपेत् ततः[५३८] ॥ कात्यायनीं कामाख्यामिति योज्यम् ।
ततो जालन्धरे गत्वा पूर्णेशीं प्रथमं यजेत् ॥
तत्रापि लक्षमानेन जप्त्वा मन्त्रं समाहितः ।
ततः पूर्णगिरौ[५३९] गत्वा यजेच्चण्डीं ततो जपेत् ॥
कामरूपान्तरे वत्स कामाख्यां प्रथमं यजेत् ।
ततः प्रोक्तां महादेवीं यजेद् द्विकरवासिनीम् ॥
एवं पीठे सुधीर्जप्त्वा पूजयित्वेष्टदेवताम् ।
सप्तपीठे सप्तलक्षं जपेद्रात्रौ समाहितः॥
संख्यापूर्णा[५४०]पुनः पृच्छेत् का त्वं देवि कुलोत्तमे ।
एवं कृते विस्मृता चेत् स्वनामगोत्रजन्मनि[५४१] ॥

---

५३३ *कुलचूडामणावपि- ख।*
५३४ *कुलस्य मस्तके- ग।*
५३५ *कुलवर्त्मना- ख, ग।*
५३६ *उड्डीयानं- ख, ग।*
५३७ *तत्पीठे योनिमुद्राख्याम्- ख, ग।*
५३८ *जप्त्वा लक्षं ततो रात्रौ कामाख्यं प्रथमं यजेत् ।*
कामरूपे ततो गत्वा कात्यायनीं जपेत् ततः ।
जप्त्वा लक्षं ततो रात्रौ कामाख्यं प्रथमं यजेत्- ख, ग।
५३९ *पूर्णगिरिं ततो गत्वा- ख, ग।*
५४० *पूर्तौ- ग।*
५४१ *स्वनाम्नि गोत्रजन्मनि- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तवेष्टदेवतां चाहं[५४२]वृणुष्व वरमुत्तमम्।
ततः प्रणम्य देवेशीं वृणुयाद्वरमात्मनः ॥
यद्येवं न वदेद्देवी पुनः पूर्वोक्तमाचरेत्।
अक्षोभिताकुलाचारः परिचर्यापरायणः ॥
अथवा सर्वपीठेषु यजेन्महिषमर्दिनीम्।
ततः प्रसन्ना भवति सा वै कुलवचः प्रिये।
ततो जप्त्वा मूलमन्त्रं सर्वसिद्धीश्वरो भवेत्॥
अन्यत्रापि-
पादोरुमध्यवक्षोजशिरोबिन्दुस्तदन्तिके॥
पूजयेच्छक्तिं देहे तु मत्प्रयोगस्य[५४३]सिद्धये।
तत्र तत्स्वेष्टदेवीं[५४४]तु पश्चाज्जप्त्वा तु साधकः॥
अथ देवतादर्शनार्थं प्रयोगान्तरम्

प्रदोषसमये शून्यगृहङ्गत्वा उत्तराभिमुखो भूत्वा भूतशुद्ध्यादिन्यासान्तं विधाय सिन्दूरेण नवकोणादिकम् अष्टदलवृत्तचतुरस्रचतुर्द्वारात्मकं यन्त्रं विलिख्य तन्मध्ये कुमार्याः शक्तिबीजं विलिख्य पुरतः संस्थाप्य तत्र पीठपूजां विधाय द्वादश प्राणायामं विधाय देवीं ध्यात्वा आवाह्य पूजयेत्।

तदुक्तं यथा-
नृकपालसमारूढां नरमालां विराजिताम्।
कृष्णाभ्रसंनिभां रक्तवासोपरि प्रदीपिताम्[५४५]॥
चतुर्बाहुधरानानां दिव्यालङ्कारभूषिताम्।
निशामुखं समावाह्य यावद् यामद्वयं भवेत्॥
तावत्कालं जपेन्मन्त्रं देवतादर्शनोत्सुकः।
चन्दनाङ्कितशिरः[५४६] शिरोपरि विराजितः॥
घृतप्रदीपमालाभिस्तथैव परिवेष्टितः।
मुण्डोपरि भवेन्मुण्डो भयमोहविवर्जितः॥
ऊर्ध्वास्यः प्रजपेन्मन्त्रो दीनलोकेन तत्परः।
मुण्डोपरि भवेन्मुण्डस्तद्दीपं सन्निधापयेत्॥
पूजयेन्मूलमन्त्रेण कुमार्या[५४७] वीरवन्दिते।
सिन्दूरमण्डलं कृत्वा नवकोणसमन्वितम्॥

---

५४२ *वाहं- ख।*
५४३ *सत्प्रयोगस्य- ख।*
५४४ *तत्र तत्रेष्टादेवीं तु- ख, ग।*
५४५ *वासोऽपि च प्रदीपताम्- ख, ग।*
५४६ *चन्दनावृत नृशिरः- ख, ग।*
५४७ *कुर्याद्दिव्या अवेक्षणम्- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

शक्तिबीजन्तु तन्मध्ये लिखित्वान्यः[५४८]समावृतः ।[५४९]
ततस्त्वष्टा जगद्धात्री कालिका परमेश्वरी[५५०] ।
सर्वसम्पत्प्रदा साक्षात्[५५१] साधकस्यानुकम्पया ॥
नेदं प्रकाशयेद्धीमान् प्राणैःकण्ठगतैरपि ।
न वदेद् भक्तिहीनाय भैरवेणेति भाषितम् ॥

अथ वेतालसिद्धिः[५५२]

तदुक्तं कुलचूडामणौ–

भैरव उवाच

वेतालादिमहासिद्धिः कथं भवति चण्डिके ।
तन्मे कथय देवेशि यदि स्नेहोऽस्ति मां प्रति ॥

देव्युवाच

निम्बवृक्षोद्भवं काष्ठं श्मशाने साधकोत्तमः।
भौमवारे मध्यरात्रौ गत्वा कुलयुगान्वितः ॥
तस्योपरि शवं धृत्वा पूजयित्वा यथाविधि ।
शवासनगतो वीरो जपेदष्टसहस्रकम् ॥
ततो मातृबलिं दत्त्वा काष्ठमामन्त्रयेत्ततः।
खनित्वा चाष्टलक्षं वै जपेन्महिषमर्दिनीम् ॥
तत्सहस्रं जपेद् वत्स तत्रैव पितृकानने ।
काष्ठमुद्धृत्य तस्मिन्वै दण्डं पादुकचिन्हितम् ॥
कृत्वा कृष्णाष्टमी[५५३]रात्रौ श्मशाने निःक्षिपेत्ततः ।
स्फँ स्फँ दण्डभमहाभागे योगिनीहृदयप्रिये ॥
मम हस्तस्थितो नाथ ममाज्ञां परिपालय ।
परमामन्त्र्य वेतालं यत्र यत्र प्रमुच्यते ॥
तं तं चूर्णं विधायाथ पुनरायाति कौलिकम् ।
गच्छ गच्छ महाभागे पादुके वरवर्णिनि ॥
मत्पादस्पर्शमात्रेण गच्छ त्वं शतयोजनम् ।
अष्टलोहं समासाद्य पञ्चाशदङ्गुलाकृतिम् ॥
भृङ्गं कृत्वा तत्र यन्त्रं लिखित्वा पूजयेन्मनुम् ।
तत्सहस्रं ततो हुत्वा महाशवकलेवरे ॥

५४८ *लिखित्वा तैः समावृतम्– ख, ग ।*
५४९ *बहिरष्टादलं पद्मं तेनैव कारयेद्बुधः । अत्रावाह्य जगद्धात्रीं कालिकापरमेश्वरीम् ॥ अधिकपाठः- ख, ग ।*
५५० *परमेश्वरि- ख ।*
५५१ *सर्वसम्पत्प्रसादेन- ख, ग ।*
५५२ *वेतालादिसिद्धिः- ख ।*
५५३ *दुर्गाष्टमीरात्रौ- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

खनित्वा जीववृक्षाग्रे बध्वा शुष्कन्तु भावयेत् ।
कुलाष्टम्या[५५४]मर्धरात्रौ चितामध्ये समाहितः ॥
प्रतिपूर्व समामन्त्र्य हुते पितृवने ततः ।
मधुरत्रयसंयुक्तं बिल्वपत्रेण संयुतम् ॥
पादादिमूर्ध्नि पर्यन्तं होमान्ते बलिमाहरेत् ।
बल्यन्ते परमा माया देवी महिषमर्दिनी ॥
आयाति बलिपूर्णास्या वरहस्ता महोन्मुखी ।
गृह्ण वत्सेति शब्दे वै खड्गमुत्पलधारयेत् ॥
घोरद्रंष्ट्रे महाकालि करबालस्वरूपिणि ।
फ्रीँ[५५५]हूँ उँ कीँ घ्रीँ कुरु कल्याणं विपक्षच्छेदविस्तरम् ॥
एवमामन्त्र्य खड्गं वै[५५६] यमुद्दिश्य क्षिपेन्नरः।
छित्वा छित्वा पुनः छित्वा गच्छत्यागच्छति पुनः॥
अथवा कृष्णमार्जारमेकधातेन घातयेत् ।
कूजे चतुष्पथे रात्रौ निखनेत् मन्त्रितं ततः ॥
तत्र मोचासमारोप्य यावद् यन्त्रं न जायते ।
तावद् भुक्त्वा हविष्यान्नं प्रतिरात्रं जपेत् सुधीः ॥
अष्टोत्तरसहस्रन्तु एकाकी दीपवर्जितः ।
उत्पन्नं पत्रमालोक्य छित्वा निच्छिद्रमानयेत् ॥
तत्र भुक्त्वा हविष्यान्नं तद्दिने तटिनीतटे ।
तमानीय सुहृत्सार्द्ध क्षालयेन्मन्त्रमुच्चरन् ॥
ततश्चाभिमुखे[५५७] वत्स यदस्ति प्रतिगच्छति ।
तदानीय यजेत्तत्र कालिकां घोरनिस्वनाम् ॥
अभिमन्त्र्य सहस्रन्तु कालीमन्त्रं प्रयत्नतः ।
सिद्धाञ्जनं भवेन्मन्त्री नात्र कार्या विचारणा ॥
चन्दनागुरुकस्तूरीमिश्रितं चास्थिघर्षितम् ।
कृत्वा तिलकमादाय सर्वं जयति साधकः ॥
कुलमीनं कुलान्नञ्च कुलमद्यं कुलेश्वर ।
कुलस्थाने समानीय दत्त्वा देव्यै प्रयत्नतः ॥
अष्टोत्तरसहस्रं तु जप्त्वा भूमितले स्थितः ।

---

५५४ कुलाष्टम्याम्- ख ।
५५५ क्रीं ईं ॐ घ्रां घ्रीं घुं- ख, ग ।
५५६ तु- ख ।
५५७ वत्सम्- ग ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

भूमौ फुत्कारमात्रेण विवरन् तत्र जायते ॥
शतयोजनदूरे वा यत्र साध्यस्थितिर्भवेत् ।
तत्रैव गमनं तस्य भूतलान्तः प्रसाधितः[५५८] ॥
एवं गवाक्षविवरे मध्ये च कुहरेऽपि वा ।
कायसंकोचमासाद्य गच्छत्यविकललोचनः[५५९] ॥
दुर्गामन्त्रं विना वत्स कालीमन्त्रस्तथैव च ।
सिद्धयः कुलनाथेश जपान्ते न कथञ्चनः[५६०]॥
कालीतन्त्रेऽपि—
अथोच्यते दक्षिणायाः सामान्यं साधनं प्रिये[५६१] ।
कृते नयेन विधिवत् पलायन्ते महापदः ॥
शिवाबलिश्च दातव्यः सर्वसिद्धिमभीप्सुभिः ।
महोत्पाते महारोगे महादोषे महाग्रहे ॥
महापदि महायुद्धे महानिग्रह[५६२]संकुले ।
महादारिद्र्यद्रसमये महादुःस्वाप्नदर्शने ॥
महाशान्तौ महारण्ये महास्वस्त्ययने तथा ।
घोराभिचारशमने घोरोपद्रवनाशने ॥
कूटयुद्धादिशमने कूटशत्रुनिवारणे ॥
वात्यादिभयशान्त्यर्थं राजक्रोधोपशान्तये ॥
न ददाति बलिं यस्तु शिवायाः शिवताप्तये ।
स पापिष्ठः स लक्षेत कुलदेव्याः प्रपूजने ॥
कुलीनं नावमन्येत कुलज्ञं परिपूजयेत् ।
कुलाङ्गेषु[५६३]प्रयत्नेषु कालिकासन्निधिर्भवेत् ॥
अहो धन्यरता[५६४]लोके जानाति कुलदर्शनम् ।
तेषां मध्ये च यः कोऽपि कुलदेवीं समर्चयेत् ॥
कुलाचारविहीनो यः पूजयेत् कालिकां नरः ।
विभवः स्वर्गभोगी[५६५]च सत्यं सत्यं न संशयः ॥
आयुरारोग्यमैश्वर्य बलं पुष्टिमहद्यशः ।

---

५५८ *प्रसर्पितः- ख, ग ।*
५५९ *गच्छत्यविकलो जनः- ख, ग ।*
५६० *सिद्धयः कुलनाथेश जायते न कथञ्चन- ख, ग ।*
५६१ *मया- ख, ग ।*
५६२ *विग्रह- ख, ग ।*
५६३ *कुलज्ञेषु- ख, ग ।*
५६४ *धन्यवताम्- ख, ग ।*
५६५ *सः स्वर्गमोक्षभोगी च न स्यात् सत्यं न संशयः- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
कवितां भुक्तिमुक्तिं च कालिकापदपूजनात् ॥
इति अन्ये प्रयोगाः कालिकातन्त्रे द्रष्टव्याः । शिवाबलिप्रकारस्तु आचारतत्त्वेऽनुसन्धेयः इति ।

इति श्रीमद्राघवभट्टविरचिते श्रीकालीतत्त्वे प्रयोगोपचारणन्नाम दशमतत्त्वम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

एकादशतत्त्वम्

अथ आचारविधिरुच्यते

तदुक्तं यामलादौ–

अथाचारविधिं वक्ष्ये यत्कृतेऽमृतमश्नुते।
सर्वभूतहिते युक्तः समयाचारपालकः॥
अनित्यकर्म सन्त्यागी नित्यानुष्ठानतत्परः।
मन्त्राराधनमात्रेण शिवभावेन तत्परः॥
पर्वण्यां देवतायान्तु सर्वकर्मनिवेदकः॥
अन्यमन्त्रार्चने श्रद्धा अन्यमन्त्रस्य पूजनम्।
कुलस्त्रीवीरनिन्दां च तद्द्रव्यमपहारकः[५६६]॥
स्त्रीषु क्रोधं[५६७]प्रहारञ्च वर्जयेन्मतिमान् सदा।
स्त्रीमयञ्च जगत् सर्वं स्वयं तावत् तथा भवेत्॥
पेयं चर्व्यं तथा चोष्यं भक्ष्यं लेह्यं गृहं सुखम्।
सर्वत्र युवतीरूपं भावयेद्यतमानसः॥
कुलजां युवतीं वीक्ष्य नमस्कुर्याच्च साधकः[५६८]।
यदि भाग्यवशेनैव कुलवृष्टिस्तु[५६९]जायते॥
तदेव मानसीं पूजां तत्र तासां प्रकल्पयेत्।
बालां वा यौवनोन्मत्तां वृद्धां वा सुन्दरीं तथा॥
कुत्सितां वा महादुष्टां नमस्कृत्य विभावयेत्।
तासां प्रहारो निन्दा वा कौटिल्यमप्रियं तथा॥
सर्वथा नैव कर्तव्यमन्यथासिद्धिबोधकम्[५७०]।
स्त्रियो देवाः स्त्रियः प्राणास्त्रिय एव हि भूषणम्[५७१]॥
स्त्रीसङ्गिना सदा भाव्यं नान्यथा स्वस्त्रियामपि[५७२]।
विपरीतरताः तासु भाविता हृदयोपरि॥
तद्धस्तारचितं[५७३] पुष्पं तद्धस्तारचितञ्जलम्।
तद्धस्तारचितं भोज्यं देवताभ्यो निवेदयेत्॥
स्त्रीद्वेषो नैव कर्तव्यो विशेषात् पूजनं महत्।

---

५६६ *अयं श्लोकः गमातृकायां नास्ति।*
५६७ *त्रिषु रोषम्- ख, ग।*
५६८ *नमस्कुर्यात् समाहितः- ख, ग।*
५६९ *कुलदृष्टिस्तु- ख, ग।*
५७० *सिद्धिरोधकृत्- ख, ग।*
५७१ *एव विभूषणम्- ख, ग।*
५७२ *स्त्रीसङ्गिना सदा भाव्यमथवा स्वस्त्रिया अपि- ख, ग।*
५७३ *चरितं- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

जपस्थाने महाशङ्खं निवेश्यार्द्धं जपं चरेत् ॥
स्त्रियं गच्छन् स्पृशन्वापि विशेषात् कुलजां शुभाम् ।
भक्ष्यं ताम्बूलमन्याश्च भक्ष्यद्रव्यान्यथारुचि ॥
भक्त्याद्यशेषभक्ष्याणि भुक्त्वा भक्ष्यं चरेज्जपम् ।
दिक्कालनियमो नात्र स्थित्यादिनियमो नहि[५७४] ॥
न जपे कालनियमो नार्चादिषु[५७५] बलिष्वपि ।
स्वेच्छानियम उक्तोऽयं महामन्त्रस्य साधने ॥
वस्त्रासनं स्थानदेहस्नेहस्पर्शादिवारिणा ।
शुद्धिं न चार्चयेत्तत्र[५७६] निर्विकल्पमनश्चरेत् ॥
सुगन्धिश्वैतलौहित्यकुसुमैरर्चयेत् कुलैः ।
बिल्वमेरुवकाद्यैश्च तुलसीदलवर्जितैः[५७७] ॥
नाधर्मो विद्यते[५७८]सुभ्रुः कश्चिकमो महान् भवेत् ।
स्वेच्छाचारोऽवगदितः[५७९] प्रचरेद्धृष्टमानसः ॥
इज्याचारपरः श्रीमाञ्जपपूजापरायणः ।
पालकः परतत्त्वानां परतत्त्वे[५८०] प्रलीयते ॥

कौलतन्त्रेऽपि–

श्रृणु देवि प्रवक्ष्यामि कौलिकाचरणं यथा ।
पाने भ्रान्तिर्भवेद्यस्य घृणास्याद्रक्तचेतसाः[५८१] ॥
शुद्धौ चाशुद्धता भ्रान्ति पापशङ्का च मैथुने ।
सः भ्रष्टः पूजयेद्देवीं चण्डीं मन्त्रं कथं जपेत् ॥
रोगी दुःखी भवेद्देवी रौरवं नरकं[५८२]व्रजेत् ।
पञ्चामात्तु परं नास्ति शाक्तानां सुखमोक्षयोः ॥
भगरूपा च या देवी रेतः प्रीता[५८३] सदानघे ।
रेतसा तर्पणन्तस्या मद्यैर्मांसैः समं प्रिये ॥
केवलैः पञ्चमैर्देवि सिद्धो भवति साधकः ।

---

५७४ *न च- ख, ग।*
५७५ *नार्चादिषु- ख, ग।*
५७६ *शुचिमनर्चयेदत्र- ख, ग।*
५७७ *बिल्वै मेरुबलाद्यैश्च- ख, ग।*
५७८ *जायते- ख, ग।*
५७९ *स्वेच्छाचारोऽत्र गदितः- ख, ग।*
५८० *परे तत्त्वे प्रलीयते- ख, ग।*
५८१ *रक्तरेतसोः- ख, ग।*
५८२ *रौरवे नरके व्रजेत्- ख, ग।*
५८३ *चेतः प्रीता यदानघे- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
ध्यात्वा कुण्डलिनीं शक्तिं रमन्रेतो विमुञ्चयन् ॥
अमन्त्रा च यदा नारी वलाद्यत्नात्तु लभ्यते ।
आत्मदेहस्वरूपेण तत्कर्णे मन्त्रमुच्चरेत् ॥
ततः सा शक्तिरूपा स्याद् भुक्तिमुक्तिप्रदायिनी ।
रम्भा च उर्वशीमुख्या बाला च गगने भुवि[५८४] ॥
पाताले वा स्थिता या च तस्या नाथस्तु कौलिकः ।
तस्यापि वर्ज्या या नार्यस्तस्य श्रृणु विधिं प्रिये ॥
गुरुरेव शिवः साक्षात् तत्पत्नी तत्स्वरूपिणी ।
मनसा कर्मणा वाचा रमणन्तत्र वर्जयेत् ॥
तस्या एव पदे भक्तः शक्तिं प्राप्य परा भवेत्[५८५] ।
गुरोष्नुषा स्वपुत्री च तथा च मन्त्रपुत्रिका ॥
एतस्या रमणं वर्ज्य ब्रह्मघ्नमानसेन च ।
कौलिकस्य च पत्नी च सा साक्षादीश्वरी शिवे ॥
तस्या रमणमात्रेण कौलिको नारकी भवेत् ।
मातापि गौरवाद्वन्द्या अन्या या विहिता स्त्रियः[५८६] ॥
दूतीयागे च कर्त्तव्यो विचारो मन्त्रवित्तमैः ।
अन्यस्थाने विचारे च देवीशापः प्रजायते ॥
शिवहीना च या नारी[५८७] दूरतस्तां परित्यजेत् ।
अभिषेकाद् भवेच्छुद्धिः मन्त्रस्योच्चारणाच्छ्रुतौ ॥
मपञ्चमेन देवेशि सर्वपापैः प्रमुच्यते ।
केवलेनाद्ययोगेन साधको भैरवो भवेत् ॥
द्वितीयेन महेशानि पूजको ब्रह्मरूपभाक् ।
केवलेन तृतीयेन महाभैरवतां व्रजेत् ॥
चतुर्थेन च तत्त्वेन भुवि पूजक नायकः ।
पञ्चमे परतां याति मम तुल्यः परेश्वरि ॥
पञ्चमेन भवेद्योगी सर्वसिद्धिपरायणः ॥
इतीदं कथितन्देवि सुगोप्यमतियत्नतः ।
न देयं पशवे देवि कुलनिन्दापराय च ॥
कुलार्णवे च –
कुलाचारगृहं गत्वा भक्त्या पापविशुद्धये ।

---

५८४ *या नारी गगने भुवि- ख, ग ।*
५८५ *परां भजेत्- ख, ग ।*
५८६ *मातापि गौरवां वर्ज्य अन्या या विहिता : स्त्रियः- ख, ग ।*
५८७ *शक्तिः- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

याचयेदमृतं ज्ञानं तदभावे जलं पिबेत् ॥
कुलाचार्येण यच्छक्त्या अन्नं पानं तु भक्तितः ।
नमस्कृत्य तु गृह्णीयादन्यथा नरकं व्रजेत् ॥
अन्यत्रापि–
वृथाकालं न गमयेद् द्यूतक्रीडादिना सुधीः ।
गमयेद्देवतापूजाजपध्यानस्तवादिना[५८८] ॥
गुरोः कृपालापयुतैः[५८९] स्तोत्रागमविलोकनैः ।
गमयेदनिशं कालं न वदेत् परदूषणम् ॥
प्रत्यक्षे वा परोक्षे वा प्रत्यहं प्रणमेत् गुरुम् ।
गुरोरग्रे पृथक्पूजामद्वैतञ्च परित्यजेत् ॥
दीक्षां व्याख्यां प्रभुत्वञ्च गुरोरग्रे न कारयेत् ।
गुरुशय्यासनं यानं[५९०] पादुकोपानहौ तथा ॥
स्नानोदकं तथाच्छायां लङ्घयेन्न कदाचन ।
श्रीगुरुकुलशास्त्राणि पूजास्थानानि यानि च ॥
भक्त्या श्रीपूर्वकं देवि प्रणम्य परिकीर्तितम्[५९१] ।
गुरुं नाम्ना न भाषेत जपकालादृते प्रिये ॥
श्रीनाथदेवस्वामीति विवादे साधने वदेत् ।
उत्पादको ब्रह्मदात्रो गरीयान् ब्रह्मदः पिताः ॥
तस्मान् मन्येत सततं पितुरप्यधिकं गुरुम् ।
कुलाचारं गुरुं देवं मनसापि न निन्दयेत् ॥
कुलस्त्री वीरनिन्दां च वर्जयेन्मतिमान् सदा ।
अन्तः शाक्ता बहिः शैवाः सभायां वैष्णवा मताः ॥
नानारूपधराः कौलाः विचरन्ति महीतले ॥
लिङ्गागमे च–
गुरुणालोकितः शिष्य उत्तिष्ठेदासनं त्यजेत् ॥
गुरुणा सदसद्वापि यदुक्तं तन्न लङ्घयेत् ॥
रभसं मैथुनं मिथ्या यो वदेद् गुरुमन्दिरे ।
स याति नरकं घोरं भैरवेणेति भाषितम् ।
सङ्क्रान्तिर्नवमीपूर्णा चाष्टमी च चतुर्दशी ॥
एकादशीव्यतिपाते कर्मलोपं न कारयेत् ।

---

५८८ स्तवादिभिः- ख, ग।
५८९ गुरोकृपालापकथा- ख, ग।
५९० पीठं- ख, ग।
५९१ परिकीर्तयेत्- ख, ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
तत्त्वहीनकृतं कर्म जपकर्मच निष्फलम् ॥
शाम्भवी कुप्यते तेभ्यो ब्रह्महत्या दिने दिने ।
तदुक्तं भावचूडामणौ–
एकाकी निर्जने देशे श्मशाने निर्जने वने ।
शून्यागारे नदीतीरे निःसङ्को विरहेन्मुदा ॥
वीराणां जपकालस्तु सर्वकालः प्रशस्यते ।
सर्वदेशे सर्वपीठे कर्त्तव्यं नात्र संशयः ॥
अन्यदुक्तं तत्रैव–
स्वकुलान्ते पुरश्चर्या कार्या रात्रौ न चान्यथा ।
वेदहीनो द्विजो देवो यथा न श्रुतिसंस्क्रिया ॥
विष्णुभक्तिं विना देव[५९२] भक्तिर्न च भवेद्यथा ।
शाक्तं ज्ञानं विना मुक्तिर्यथा हास्याय कल्पते ॥
गुरुं विना तथा तन्त्रे नाधिकारः कथञ्चन ।
पतिहीना यथा नारी सर्वकर्मविवर्जिता ॥
कुलं विना यथा दिव्यो वीरो वा मम साधकः ।
नाधिकारस्तथा कौले तस्माद्यत्नपरो भवेत् ॥
अविनीतं कुलं यस्य स कथं मम पूजकः ।
तस्माद्यत्नात्तथा कार्यं यथास्याद्विनयान्वितः ॥
तन्त्रचूडामणौ-
विष्णुभक्तो यदा देव कुलदीक्षापरो भवेत् ।
पुत्रदारकुलं तस्य नाशयामि न संशयः ॥
कुलदेवं द्विजं हित्वा वैष्णवं देशिकं यदि ।
करोति कुलशिष्योऽसौ भ्रष्टो भवति निश्चितम् ॥
हविरारोप्यमात्रेण वह्निदीप्तो यथा भवेत् ।
कुलदेवस्तथा तद्वत्तथा दीप्ता भवाम्यहम् ॥
वीक्षणात् पूजनाद्धोमात्तथा दृष्ट्यावलोकनात् ।
यत्किञ्चिज्ज्ञानमात्रेण पशुना निन्दिता स्त्रियः ॥
साधकस्य महाशापं दत्त्वा तस्य हराम्यहम् ।
पशो विद्यां समादाय यदि पूजापरो भवेत् ॥
तस्य वक्त्रं समालोक्य कुलवक्त्रं विलोकयेत् ।
पशूपदिष्टं यत्किञ्चित् क्रियते साधकोत्तमैः[५९३]॥
तत्तत्कर्म महादेव अभिचाराय कल्प्यते ।

५९२ देवी- ख, ग ।
५९३ कुलसाधकैः- ख, ग ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
यदि दैवात् पशोर्विद्या लभ्यते कुलजैर्नरैः ॥
द्विजस्य कौलिकीं प्रार्थ्य पुनर्विद्यामुपालभेत् ।
अज्ञानाद्यत्कृतं कर्म नालोक्यं कुलकौलिकि ॥
क्षमस्व मातस्तत्पापं हर देवि कृपां कुरु ।
एवं प्रार्थ्य पुनर्दीक्षां कुर्यात् साधकसत्तमः ॥
अन्यदुक्तं तत्रैव–
मनसा वचसा एव कुलाकुलगुरुं यदि ।
निन्दां करोति शापो मे तस्योपरि विजायते ॥
एतच्छास्त्रप्रसङ्गोऽपि एतत्पुस्तकदर्शनम् ।
पशोरग्रे न कर्तव्यं प्राणान्तेऽपि कदाचन ॥
कृत्वा सूर्यमुखं दृष्ट्वा स्मर्तव्यः कुलनायकः ।
पशुनाथः सदालापः सहाशय्या सहासनम्[५९४] ॥
संसर्गश्चैवमेवात्र कुलीनस्य महात्मनः ।
पातकं नैव चैतेषां संक्षये पुण्यराशयः ॥
प्रभवन्ति न तीर्थानि न गङ्गा न च काशिका ।
महाविद्याजपादेव चत्वारि पातकानि च ॥
नश्यन्ति न च संसर्गः क्षयं याति कदाचन ।
अज्ञानात् पशुसंसर्गे यदि दैवात् प्रजायते ॥
तदा द्वादशवर्षाख्यं व्रतार्थं[५९५] यत्नमाचरेत् ।
कुलीनायाः समीपस्थः कुलसेवापरायणः ॥
उच्छिष्टभोजनं तस्यै प्रयच्छेन्निजमन्त्रकम् ।
तदन्ते तां समभ्यर्च्य रत्नैश्च परितोष्य च ॥
शुचिर्भूत्वा पुनर्विद्यां गृहीत्वा शुद्धिमाप्नुयात् ।
व्रताशक्तो यदि भवेत् सुवर्णां कुलतोषकृत् ॥
दद्यात् कुलाय यो धीमान् न चास्य दर्शनं चरेत् ।[५९६]
मम शास्त्रं कथां चात्र प्रयत्नेन विवर्जयेत् ॥
कर्मणा मनसा वाचा पशुशास्त्रोक्तपूजनम् ।
प्रकुर्वन्ति महापापास्त्याज्या वै कुलपांशुना ॥

५९४ *सहासनः– ख ।*
५९५ *जपार्थं यत्नमाचरेत्– ग ।*
५९६ *दद्यात् कुलाय पापानां क्षयार्थं कुलसाधकः ।*
ज्ञानान्संसर्गसामान्यं शुद्धिमाप्नोति नैव च ॥
पञ्चत्वे भासकाकादियोनिमासाद्य साधकः ।
नानाक्लेशसमायुक्तो नरकानि प्रपद्यते ।
न चैनं दीक्षयेद् धीमान् न चास्य दर्शनं चरेत् ॥ अधिकपाठः– ख, गमातृकायाम् ।

Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

निःसारे काष्ठलोहे वा शर्करायां दृशेऽपि वा।
सर्वत्र चिन्तिता चाहं न पशोर्मन्त्रविग्रहे॥
चेतनाधिष्ठितं सर्वं सुखं दुःखं प्रकल्पितम्[५९७]।
तत्रैव चेतनाभावनियमो नास्ति तादृशः।
प्रसन्ना तेन गोप्तव्या कुलीनैः सिद्धिहेतवे॥

अन्यदुक्तं तत्रैव–

दीक्षायां कुलपूजायां शिष्यत्वे यदि वा गुरौ।
लज्जापरं कुलं तत्र नित्यापि नित्यनिद्रिता॥
अधस्तात् दृष्टिपातेन तस्य विद्या ह्यधोमुखी।
निमीलनात् मृतविद्या रोदनान्मारयेद् ध्रुवम्॥
पार्श्वावलोकनेनैव व्याधिदारिद्र्यपीडिता।
चतुर्दिशावलोकेन[५९८] उच्चाटनगतो भवेत्॥
एतादृशं कुलं देव यदि कुर्यात् कथञ्चनः।
तदा कुलगुरुं प्रार्थ्य कारयेद्वीक्षणं ततः॥
उपदेष्टा यदा देव तदा पुत्री च कन्यका।
पूजार्हा च तदा देवी तदा माता न संशयः॥
सर्वथा पितृपुत्रीभ्यां मूलयोगो न दृश्यते॥
तत्कृते पापबुद्ध्या वै उभौ नरकगामिनौ।
चुम्बुके अन्यशास्त्रज्ञे पशुश्रमे च भैरव॥
न वक्तव्यं न कर्तव्यं न च वाच्यं कथञ्चन।
एवंकृते गुरौ शिष्ये समपापो भविष्यति॥

चुम्बुक इति नानामन्त्राग्राहिणि साधकाभिमानिनीत्यर्थः[५९९]।

उक्तमन्यत्रापि[६००]-

नानातन्त्रं[६०१]न द्रष्टव्यं चित्तभ्रान्तिर्भवेद्यतः।
गुरुपदिष्टमादाय तत्त्वेन परिपालयेत्॥ इति॥ एवं कृत इति सुदीक्षितकुलमित्यर्थः[६०२]।

शिवागमे च–

शक्त्युच्छिष्टमविचार्य पिबेच्चक्रेश्वरो यदि।
घोरञ्च नरकं याति कुलमार्गात् पतेद्ध्रुवम्॥
तस्माद्विचार्य यत्नेन शक्त्युच्छिष्टं पिबेत् सुधीः।

५९७ प्रकीर्त्तितम्- ख, ग।
५९८ चतुर्दिगवलोकेन- ख, ग।
५९९ चुम्बक इति नानामन्त्रग्राही साधकाभिमानीत्यर्थः- ख।
६०० पूर्वमन्त्रपरित्यागादन्यमन्त्रपरिग्रहः यः। करोति च कौलेयः सः किं मम तु साधकः। अधिकपाठः गमातृकायाम्।
६०१ शास्त्रम्- ख, ग।
६०२ सुदीक्षितकुलगामीत्यर्थः- ख, ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

आनन्दं कारयेद्वीरः सर्वं निर्भ्रान्तितश्चरेत् ॥
शक्तिः शिवः शिवशक्तिः शक्तिब्रह्मा सनातनः ।
शक्तिरिन्द्रो रविः शक्तिः शक्तिश्चद्रो ग्रहाः ध्रुवम् ।
शक्तिरूपं जगत्सर्वं यो न जानाति नारकी ॥
वीरतन्त्रेऽपि–
स्नानादिमानसं शौचं मानसप्रवरो जपः ।
पूजनं मानसं दिव्यं मानसं तर्पणादिकम् ॥
सर्व एव शुभः कालो नाशुभो विद्यते क्वचिद् ।
पशोः सम्भवनाद्देवि मन्त्रसिद्धिर्न जायते ॥
पशुस्तु द्विविधो देव[६०३] अदीक्षितो भवेत् पशुः ।
दीक्षितः कुलजाचारनिन्दको द्विविधः पशुः ॥
गोलोकेन सहालापात् स्पर्शात् स्वभावसंस्कृतात् ।
न सिद्धयति महेशानि सत्यं सत्यं वदाम्यहम् ॥
विकल्पे नैव सिद्धयन्ति जाड्या सिद्धयन्ति नैव च[६०४] ।
तस्माद्यत्नात्[६०५] परित्यज्य सिद्धः स्यात् केवलाज्जपात् ॥
वीरहत्या वृथापानं वीरजायानिषेवनम् ।
महापातकमित्याहुः कौलिकानां कुलेश्वरि ॥
अर्थाद्वा कामुकाद्वापि लौल्यादपि च यो नरः ।
लिङ्गयोनिरतो मन्त्री रौरवं नरकं व्रजेत् ॥
तदुक्तं कुलचूडामणौ–
बिल्वमूले प्रातरेव श्मशाने वापि साधकः ।
मांसं प्रधानं नैवेद्यं सन्ध्याकाले निवेदयेत् ॥
कालिकालीति वक्तव्या तत्रापि[६०६] शिवरूपिणी ।
पशुपाश[६०७]समायाति परिवारगणैः सह ॥
भुक्त्वा रौति यदैशान्यां मुखमुक्तोल्पसुस्वरम् ।
तदैव मङ्गलं तस्य नान्यथा कुलभूषणम् ॥
अवश्यमन्नदानेन नियतं तोषयेच्छिवाम् ।
नित्यैः सार्द्धं यथा सन्ध्यावन्दनं पितृतर्पणम् ॥
तथैव कुलसेव्यानां नित्यता कुलपूजनम्[६०८] ।

६०३ *देवी- ख, ग ।*
६०४ *विकल्पिता न सिद्धयन्ति जाप्या सिद्धन्ति नो कदा- ख, ग ।*
६०५ *तस्मादेतत्- ख ।*
६०६ *तत्रोमा- ख, ग ।*
६०७ *पशुरूपा समायाति- ख,ग ।*
६०८ *नित्यता कुलपूजने- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
पशुरूपां शिवां देवीं यो नार्चयति निर्जने ॥
शिवारवेण तस्याशु सर्वं नश्यति निश्चितम् ।
जपपूजाविधानानि यत्किञ्चित् सुकृतानि च ॥
गृहीत्वा शापमादाय शिवा रोदति निर्जने ।
एकया भुज्यते यत्र शिवया देव भैरव ॥
पूजनाद्विगुणङ्कर्म सगुणं साधयेद्यतः ।
तेन सर्वप्रयत्नेन कर्तव्यं पूजनं महत् ॥
राजादिभयमापन्ने देशान्तर गजादिके ।
शुभाशुभानि कर्माणि विचिन्त्य बलिमाहरेत् ॥
गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि ।
शुभाशुभफलं व्यक्तं ब्रूहि गृह्ण बलिं तव ॥
एवमुच्चार्य दातव्यो बलिः कुलजनैः प्रिये ।
यदि न गृह्यते देवि तदा नैव शुभं भवेत् ॥
शुभं यदि भवेत्तत्र भुज्यते तदशेषतः ।
एवं ज्ञात्वा महादेवि शान्तिं स्वस्त्ययनं चरेत् ॥
कुलाचारं दक्षिणाख्यां कथितं तव सुव्रते ।
न कस्मैचित् प्रवक्तव्यं यदीच्छेच्छुभमात्मनः ॥
निर्जने चैव कर्तव्यन्न चैवं जनसन्निधौ ।
न पितुः सन्निधौ नैव न मातुःसुतसन्निधौ ॥
किं वा पक्षिपतङ्गादिदर्शनं नैव कारयेत् ।
पातालमण्डले वापि गह्वरे वा सुयन्त्रिते ॥
न छिद्रमण्डपे वापि कर्तव्यं न च सन्निधौ ।
कुलपुष्पं कुलद्रव्यं कुलपूजा कुलं जपम् ॥
गुरुकुलपतिं चापि कुलमालां कुलाकुलम् ।
कुलचक्रं कुलध्यानं सर्वथा न प्रकाशयेत् ॥
प्रकाशात् सिद्धिहानिस्यात् प्रकाशाद् बन्धनादिकम् ।
प्रकाशान्मन्त्रनाशःस्यात् प्रकाशाद्देवहिंसनम् ॥
प्रकाशान्मृत्युलाभः स्यान्न प्रकाश्यं कदाचन ।
पूजाकाले च देवेशि यदि कोऽप्यत्र गच्छति ॥
दर्शयेद्वैष्णवीमुद्रां विष्णुन्यासं तथास्तवम् ।
प्रकाशाद्यदि गुप्तिस्यात्तत्प्रकाश्यं न दूषणम्[६०९] ।
वरं पूजा न कर्तव्या न च गुप्तिः कदाचन ॥

६०९ *गोपनाद्यदि व्यक्तिस्यान्न गुप्तिः सा विधीयते ॥*
कदाचिदङ्गहानिस्तु न च व्यक्तिं कदाचन । अधिकपाठ गमातृकायम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ समयाचारेऽप्युक्तम्–

श्रृणु पुत्र रहस्यं मे समयाचारसम्भवम् ।
येन हीना न सिद्ध्यन्ति कल्पकोटिशतैरपि[६१०] ॥
मानवः कुलशास्त्राणां कुलचर्यानुसारिणाम् ।
उदारचित्तः सर्वत्र वैष्णवाचारतत्परः ॥
परनिन्दासहिष्णुः स्यादुपकाररतः सदा ।
पर्वते विपिने वापि निर्जने शून्यमण्डपे ॥
चतुष्पथे कलामध्ये[६११] यदि दैवस्थितिर्भवेत् ।
क्षणं ध्यात्वा मनुं जप्त्वा नत्वा गच्छेद्यथासुखम् ॥
गृध्रं वीक्ष्य महाकालीं नमस्कुर्यादलक्षितः ।
क्षेमङ्करीं तथा वीक्ष्य जम्बुकीं यमदूतिकाम् ॥
कुरभस्येभभूकाकं कृष्णामार्जारमेव च ।
कृशोदरी महामुण्डमुक्तकेशी बलिप्रिये ॥
कुलाचारप्रसन्नास्ये नमस्ते शङ्करप्रिये ।
श्मशानञ्च शवं दृष्ट्वा प्रदक्षिणमनुव्रजेत् ॥
प्रणम्यानेन मन्त्रेण मन्त्री सुखमवाप्नुयात् ।
घोरदंष्ट्रे कठोराक्षि किटिशब्दनिनादिनि[६१२] ॥
घुरुघोररवास्फाले नमस्ते चितिवासिनि ।
रक्तवस्त्रं तथा पुष्पं विलोक्य त्रिपुराम्बिकाम् ॥
प्रणमेद्दण्डवद्भूमाविमं मन्त्रं पठेन्नरः।
बन्धूकपुष्पसंकाशत्रिपुरे भयनाशिनि ॥
भाग्योदये समुत्पन्ने नमस्ते वरवर्णिनि ।
कृष्णवस्त्रं तथा पुष्पं राजानं राजपुत्रकम् ॥
हस्त्यश्वरथशस्त्राणि फलकान् वीरपुरुषान् ।
महिषं कुलदेवञ्च दृष्ट्वा महिषमर्दिनीम् ॥
प्रणम्य जयदुर्गाद्यां सर्वविघ्नैर्न लुप्यते ।
जय देवि जगद्धात्रि त्रिपुराख्ये त्रिदैवते ॥
भक्तेभ्यो वरदे देवि महिषघ्नि नमोऽस्तु ते ।
मद्यभाण्डं समालोक्य मत्स्यमांसं वरस्त्रियम् ॥
दृष्ट्वा च भैरवीं देवीं प्रणम्य विमृशेन्मनुम् ।

---

६१० जन्मकोटिशतैरपि- ख, ग।
६११ कलाशून्ये- ख, ग।
६१२ प्रनादिनी- ख, ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

घोरविघ्नविनाशाय कुलाचारसमृद्धये[613] ॥
नमामि वरदे देवि मुण्डमालाविभूषिते ।
रक्तधारासमाकीर्णवदने[614] त्वां नमाम्यहम् ॥
सर्वविघ्नहरे देवि नमस्ते हरवल्लभे ।
एतेषां दर्शने चैव यदि नैवं प्रकुर्वते ॥
शक्तिमन्त्रं पुरस्कृत्य तस्य सिद्धिर्न जायते ।
एतेषां मारणोच्चाटं हिंसनं लगुडादिभिः ॥
करोति यदि पापात्मा मद्भक्तो सः कथं भवेत् ।
प्रधानामङ्गसंभूता एते कुलजनप्रियाः ॥
शाकिन्यश्च[615] तथा सर्वा मदंशाः श्रृणु भैरव ।
न च सिद्धिसमायोगात् डाकिनी हिंसनं यदि ॥
अथवा दानवानाञ्च मद्भक्तानां विशेषतः ।
वटुकानां भैरवाणां तस्य सिद्धिर्न जायते ॥
नित्या नैमित्तिकी काम्या दिवारात्र्युभयक्रमात् ।
कर्तव्या कुलशास्त्रज्ञैः पूजा वैभवविस्तरैः ॥

इति श्रीमद्राघवभट्टविरचिते कालीतत्त्वे आचारप्रतिपादनन्नाम एकादशतत्त्वम् ।

---

६१३ *समुच्चये- ख, ग ।*
६१४ *वरदे- ख, ग ।*
६१५ *डाकिन्यश्च- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ स्थानादिनियमः

तदुक्तं फेत्कारिणीये–

एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे।

तत्रस्थः साधयेद्योगी विद्यां त्रिभुवनेश्वरीम् ॥ एकलिङ्गक्रोशान्तरे यत्र लिङ्गान्तरं नास्तीत्यर्थः।

तदुक्तं तत्रैव–

पञ्चक्रोशान्तरं यत्र लिङ्गान्तरं न वीक्ष्यते[६१६]।

तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा ॥

अन्यच्च–

उज्जटे पर्वते वापि निर्जने वा चतुष्पथे।

देवागारे देवशून्ये निर्जनैकान्तवेश्मनि ॥

तदुक्तं नीलतन्त्रे[६१७]–

शून्यागारे श्मशाने यदि जपति जडोऽप्येकलिङ्गे तडागे।

गङ्गागर्भे गिरौ वा शुचिविमलमतिः सर्वदा मन्त्रराजम्।

ध्यात्वैवं देवदेवीहृदयसरसिजे चीनदेशोद्भवासौ ।

विद्यासौन्दर्यराजं[६१८] हतरिपुनिचयं नित्यमृद्धं प्रयच्छेत्।

अथासनविधिः

तदुक्तं मत्स्यसूक्ते–

मृदुचूडकमासीनं स्वान्येषु कोमलेषु च।

विष्टरेषु समासीनः साधयेत् सिद्धिमुत्तमाम् ॥

मृदुमिति षड्मासाभ्यन्तरे गर्भच्युतमित्यर्थः।

तदुक्तम्–

अर्वाक् षड्मासतो गर्भच्युतमाहु मृर्दुं बुधाः। अचूडकमिति चूडाकरणाभ्यन्तरे मृतमित्यर्थ॥

तदुक्तम्–

चूडोपनयनैर्हीनं मृतमचूडकं विदुः।

निवृत्तचूडको बालो हीनोपयनः पुमान्।

योऽमृतः पञ्चमे वर्षे तमेव कोमलं विदुः।

स्वतन्त्रतन्त्रेऽपि–

कम्बले लोहिते वापि कृष्णे वा व्याघ्रचर्मणि।[६१९]

तदुक्तं मत्स्यसूक्ते–

---

६१६ न दृश्यते- ख, ग।

६१७ वीरतन्त्रे- ख, ग।

६१८ राज्यम्- ख, ग।

६१९ संन्यासी ब्रह्मचारी तु विशेषकृष्णचर्मणि। अधिकपाठः खगमातृकायाम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
कृष्णसारं द्वीपिचर्म अचूडकम्बलं तथा।
पीतवस्त्रं शुभं कृत्वा आसनाय प्रकल्पयेत् ॥
वीराणान्तु वीरासनमावश्यकमेव। तदुक्तं कालीतन्त्रे–
मृतासनं विना देवि यो जपेत् कालिकां नरः।
तावत् स नारकी ज्ञेयो यावदाहूतसंप्लवम् ॥
स्वातन्त्रादौ कम्बलासनविधानं न स्वातन्त्र्येण किन्तु वीरासनावगुण्ठनेन इति।
तदुक्तं–
मृतभावे शवं रूपं विष्टरञ्च प्रकल्पयेत्।
तथा च शवाकारेण कुशासनमासनं परिकल्प्य कम्बलासनाद्यासनेन अवगुण्ठ्य उपविशेदित्यर्थः।
मुण्डमालायामपि–
व्याघ्राजिनं सर्वसिद्ध्यै ज्ञानसिद्ध्यै मृगाजिनम्।
वस्त्रासनं रोगहरं वेत्रजं प्रीतिवर्धनम् ॥
कौशेयं सिद्धिदं प्रोक्तं कम्बलं सर्वसिद्धिदम्।
शुक्लं वा यदि वा कृष्णं विशेषादुक्तकम्बलम् ॥
मृदुकोमलमास्तीर्णं संग्रामपतितं हि यत्।
जन्तुव्यापादितं वापि मृतं वा नववयस्कम् ॥
गर्भच्युतत्त्वचं वापि नारीणां योनिजत्वचम्।[६२०]
त्वचं वापि गजानाञ्च कुर्याद्वीरो मृतासनम् ॥
श्मशानकाष्ठघटितं पीठं वा यन्त्रदारुजम्।
न दीक्षितो वेशजस्तु कृष्णस्य चाजिने गृही ॥
एकहस्तं द्विहस्तं वा चतुरङ्गुलमुद्धृतम्।
विशुद्धे चासने कुर्यात् संस्कारं पूजनं बुधः ॥ इति ।
अथ पुष्पविधिः
तदुक्तं मत्स्यसूक्ते–
सुगन्धिश्वेतलोहित्यैः कुसुमैरचर्येत् कुलैः[६२१]**।**
बिल्वैर्मरुबकाद्यैश्च तुलसीवर्जितैः शुभैः ॥
अभ्रपुष्पैर्विशेषेण वज्रपुष्पेण मिश्रितम्।
सर्वं पुष्पं प्रदद्याच्च भक्तियुक्तेन चेतसा ॥
शारदायाञ्च–
सर्वैः पुष्पैः सदा पूजा विहिताविहितैरपि।
कर्तव्या सर्वदेवानां भक्तियोगो हि कारणम् ॥
तन्त्रान्तरेऽपि–

६२० *सर्वसिद्धिप्रदं सर्वभोगसमृद्धिदम्- अधिकपाठ- ख, गमातृकायाम्।*
६२१ *दलैः- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

देवीपूजा सदा कार्या जलजैः स्थलजैरपि ।
विहितैर्वा निषिद्धैर्वा भक्तियुक्तेन चेतसा ॥
कालीतन्त्रेऽपि
नानोपहारबलिभिर्नानापुष्पैर्मनोहरैः ।
अपामार्गदलैर्भृङ्गैस्तुलसीवर्जितैः शुभैः ।
पूजनीया सदा भक्त्या नृणां शीघ्रफलप्रदा ॥
अथ वज्रपुष्पम् । तदुक्तं मुण्डमालायाम्–
आषोडशादनुष्ठा या उत्तमा सर्वसिद्धिदा ।
बलात्कारेण तूढा या मध्यमा भोगवर्द्धिनी ॥
रजोयोगवशादन्या अधमा सुखदायिनी ।
स्वयम्भूकुसुमं देवि त्रिविधं भुवि जायते ॥
अन्यत्रापि–
स्वेच्छा ऋतुमती शक्तिः साक्षाद्देवि सुरेश्वरि ।
तस्याः पुष्पं स्वयं यत्नादीक्षणीयं प्रयत्नतः ॥
वस्त्रालङ्कारपुष्पेण शक्तिं च पूजयेत् सदा ।
यथाकाले यथापुष्पं स्वयं यज्ज्ञापयेत् सुकृत् ॥
गृहीत्वा तत्प्रयत्नेन स्वयम्भूः कुसुमं चरेत् ।
स्वयम्भूपुष्पयोगेन साक्षात्तेन समचर्येत् ॥
विद्यां स्वप्नवतीं जप्त्वा क्षिप्रमाकर्षणादिकम् ।
देवताश्च महाभागा राक्षसा दानवाश्च ये ।
राजानश्च स्त्रियः सर्वा नित्यं वश्या भवन्ति हि ॥
मन्त्रचूडामणौ च–
श्रृणु वत्स कुलद्रव्यमाहात्म्यं परमं शुभम् ।
यत्प्राप्य कुलदेवेन लभ्यते वाञ्छितं महत् ॥
अमावास्यातिथौ देवि सुषुम्नामध्यवर्तिनी ।
अमृतं वर्षते गात्रं त्रिदिनं धरणीतले ॥
तस्यां तिथौ कुलदेवं यदि विद्यां समुच्चरेत् ।
पूर्वमेव भवत्यत्र प्रत्युच्चारणमेव हि ॥
तस्मात् सर्वप्रयत्नेन कुलं वीक्ष्य जपं कुरु ।
दृष्ट्वा तदमृतं देव्या गलितं परिगृह्य च ।
साधनं साधयेत् सर्वं कुलाचारस्य सिद्धये ॥
अन्यत्रापि–
शिवहीना यदा शक्तिः सर्गादौ वर्षते हि तत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
तदेव कुसुमं द्रव्यं स्वयम्भूः कुसुमाख्यकम् ॥
स्वयम्भूकुसुमं द्रव्यं त्रैलोक्ये चापि दुर्लभम् ।
क्वचिद् गन्धर्वराजेन लभ्यते वा न वा विभो ॥
यदि तल्लभ्यते देव लाक्षारससमन्वितम् ।
कस्तुरीकुङ्कुमाक्तं च वर्टीं कृत्वा तु गोपयेत् ॥
यन्त्रराजं समालिख्य पूजयेद्यदि साधकः ।
एतेनाक्षतयोगेन महतीं सिद्धिमालभेत् ॥
सुप्तादिदोषदुष्टा ये मन्त्रविद्याश्च कीर्तिताः ।
प्रबुद्धास्तत्प्रयोगेण यावत् सा पुनरागता ॥
ततः प्रयोगो विद्यानां मन्त्रादीनाञ्च कारयेत् ।
एवं प्रबुद्धा भवति नैव तादृक् कथञ्चन[६२२] ।
एतत्त्रयाणां मध्ये तु स्वयम्भूकुसुमं महत् ॥
श्रीक्रमेऽपि–
कस्तूरीकुङ्कुमं तत्र चन्दनागुरुकादिकम् ।
नानासुगन्धिकं दत्त्वा एकीकृत्वा तु साधकः ॥
एतेनाक्षतयोगेन पूजयेत् परमेश्वरीम् ।
स्वयम्भूकुसुमैः पूजां प्रत्यहं यः समाचरेत् ।
तस्य मधुमती सिद्धिरधुना देवि जायते ॥
मुण्डमालायामपि–
पुष्पाण्यपि सदा दद्याद्रक्तकृष्णसितानि च ।
श्वेतं रक्तं जपापुष्पं करवीरं तथा प्रिये ॥
तगरं मल्लिकाजातीमालतीयूथिका तथा ।
धत्तूराशोकवकुलश्वेतकृष्णा पराजिता ॥
वकपुष्पं बिल्वपत्रं चन्द्रकं नागकेशरम् ।
रङ्गिकाञ्चीटीकाकाञ्चीरक्तं यत्परिकीर्तितम् ॥
अर्कपुष्पं जपापुष्पं सर्वं तच्च प्रियं वदेत् ।
अष्टम्याञ्च विधानेन सन्तुष्टा तस्य पार्वति[६२३] ॥
पद्मपुष्पेण रक्तेन सन्तुष्टाः सर्वदेवताः ।
कृष्णं वा यदि वा शुक्लं कालिका वरदा भवेत् ॥
श्मशानधत्तूरपुष्पेण तुष्टा धूमावती परा ।
श्मशानजातपुष्पेण सन्तुष्टा कालिका परा ॥
रक्तपुष्पैश्च विविधैः सन्तुष्टा पार्वती शिवा ।

६२२ *सा कदाचन- ख।*
६२३ *सन्तुष्टा तस्य पार्वती- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
अम्लानस्य तु पत्रेण तुष्टा पुष्पेण पार्वती ॥
अष्टम्याञ्च चतुर्दश्यां नानापुष्पैः समर्चयेत् ।
श्मशाने रात्रिशेषे वा शनिभौमदिने निशि ॥
अथ पुष्पदानविधिः
तदुक्तं शारदाटीकायाम् ।
पुष्पं वा यदि वा पत्रं फलं नेष्टमधोमुखम् ।
दुःखदं तत्समाख्यातं यथोत्पन्नस्तथार्पणम् ।
अधोमुखफलं नेष्टं पुष्पाञ्जलिविधौ न तु ॥

इति श्रीराघवभट्टविचिते कालीतत्त्वे स्थानपुष्पप्रतिपादनं नाम द्वादशतत्त्वम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

त्रयोदशतत्त्वम्

अथ बलिविधिरुच्यते

देव्युवाच
केवलं बलिदानेन तुष्टा भवति चण्डिका।
कथितं पूर्वमस्मभ्यं प्रकाशं कुरु शङ्कर॥
ईश्वर उवाच
अत्यन्तगुह्यं देवेशि विधानं बलिपूजने।
कथयामि वरारोहे सुस्थिरं[६२४] भव सांप्रतम्॥
दधि क्षीरं गुडं चान्नं पायसं शर्करान्वितम्।
पायसं क्षुद्रमांसञ्च[६२५] नारिकेलं समोदकम्॥
शशकं मेषखण्डञ्च सार्द्रकं सहशक्करम्।
रम्भाफलं लड्डुकञ्च भर्जितान्नञ्च पिष्टकम्॥
शालमत्स्यञ्च पाठीनं सकुलं द्वित्रिकं तथा।
गौरवञ्चेन्निषद्द्यात् मांसं महिषमेव च॥
पक्षिमांसं वरारोहे डिम्भन्नानासमुद्भवम्।
कृष्णच्छागं महामांसं गोधिकां हरिणीन्तथा॥
जलजैर्मत्स्यमांसैश्च गोधकीमांसमेव च।
नानाव्यञ्जनगोदुग्धव्यञ्जनानि मधूनि च॥
ईषद्दुग्धं घृतेनाक्तं निशायां दिवसेऽपि वा।
बलिं दद्यात् विशेषेण कृष्णपक्षे शुभे दिने॥
छागे दत्ते भवेद्वाग्मी मत्स्ये दत्ते कविर्भवेत्।
महिषे धनवृद्धिः स्यान्मृगभोगफलं लभेत्॥
दत्ते पक्षिणि महर्द्धिः स्याद् गोधिकायां महाफलम्।
नरे दत्ते समृद्धिः स्यादष्टसिद्धिरनुत्तमा॥
ललाटहस्तवक्षःस्थशिरोभ्रूमध्यदेशतः।
स्वदेहरुधिरो दत्ते रुद्रदेह इवापरः॥
चाण्डालबलिदानेन महासिद्धिः प्रजायते।
सुधादानेन देवेशि महायोगीश्वरो भवेत्।
सुधा तु त्रिविधा देवि स्फाटिकी शौण्डिकी तथा॥
पैष्टिकी स्फाटिकीदाने धनवृद्धिरनुत्तमा।
तालकीदानमात्रेण सर्ववश्या भवेद्ध्रुवम्॥
काष्णिकी सुरया देवि योऽर्चयेत् परमेश्वरीम्।

६२४ *सुस्थिरा- ख, ग।*
६२५ *क्षौद्रमांसम्- ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

गुटिकाञ्जनस्तम्भादिमारणोच्चाटनादिभिः ॥
महासिद्धीश्वरो भूत्वा वसेत् कल्पयुतं दिवि ।
कुमारीकल्पेऽपि–
ताम्बूलञ्च सकर्पूरं नारिकेलं सशर्करम् ॥
पायसं सघृतञ्चैव आर्द्रकं सगुडं तथा ॥
सतण्डुलं तिलञ्चैव दधि चैव सशर्करम् ।
जम्बीरं पनसं चैव आम्रातकफलं तथा ॥
कदली तिन्तिडी चैव श्रीफलं फलमुत्तमम् ।
करञ्जं वकुलञ्चैव तालखर्जुरमेव च ॥
अन्यानि च सुगन्धीनि स्वादूनि च फलानि च ।
नराः छागस्तथा मेषा महिषा शशकास्तथा ॥
एतेषां चैव रक्तानि देयानि परमेश्वरि ॥ इति ।
नरबलिविधानन्तु राज्ञामेव ।
तदुक्तं यामले–
राजा नरबलिं दद्यान्नान्योऽपि परमेश्वरि ।
सिंहव्याघ्रनरान्दत्त्वा ब्राह्मणो नरकं व्रजेत् ॥
नैवेद्यपात्रं यामले–
तैजसेषु च पात्रेषु सौवर्णे राजतेऽथवा ।
ताम्रे वा राजते वापि पद्मपत्रेऽथवा ततः ॥
यज्ञदारुमये वापि नैवेद्यं कल्पयेद् बुधः ।
सर्वाभावे तु माहेया स्वहस्तघटिते यदि ॥
यद्योगमर्घपात्रे तु तन्निधाय निवेदयेत् ।
अन्यतो यैर्यदुच्छिष्टमर्घपात्रे स्थिते नु वै ॥
न गृह्णन्ति महादेवि दत्तं विधिशतैरपि ।

इति श्रीराघवभट्टविरचिते कालीतत्त्वे बलिविधानन्नाम त्रयोदशतत्त्वम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चतुर्दशतत्त्वम्

अथ प्रायश्चित्तविधिरुच्यते

तदुक्तं लिङ्गागमे–

श्रृणु देवि प्रवक्ष्यामि प्रायश्चित्तमनुत्तमम्।
तद्विशुद्धिविधिश्चैव भैरवेणेति भाषितम्॥
गुरुत्यागकरः शिष्यः प्रायश्चित्ती भवेद्ध्रुवम्।
लक्षं श्रीपादुकां जप्त्वा तस्मात् पापाद्विशुध्यति॥
मन्त्रत्यागकरः शिष्यस्तत्सङ्गं नैव कारयेत्।
लक्षमेकं जपेन्मन्त्रं होमतर्पणतः शुचिः॥ एतत्तु दिव्यगुरुत्यागे न तु पशुगुरुत्यागे। अत एव यामलेऽप्युक्तम्–
मधुलोभाद्यथा भृङ्गः पुष्पात् पुष्पान्तरं व्रजेत्।
गुरुलुब्धस्तथा[६२६] शिष्यो गुरोः गुरुतरं व्रजेत्॥
इति।

गुरोरिति पशुगुरोरित्यर्थः। तदुक्तमन्यत्रापि–

यदि दैवात् पशोर्विद्या लभ्यते कुलजैर्जनैः।
द्विजस्य कौलिकं प्रार्थ्य पुनर्विद्यामुपाचरेत्॥
अज्ञातसुकृतं कर्म नालोच्यं कुलकौलिकि।
क्षमस्व मातस्तत्पापं हर देवि कृपां कुरु।
एवं प्रार्थ्य पुनर्दीक्षां कुर्यात् साधकसत्तमः॥

इति गुरुमन्त्रादिकमुपलक्षणम्। रिपुमन्त्रादिकं परित्यज्य मन्त्रमन्यं प्रागृह्णीयादिति। अत एव क्वचित्पुस्तके मन्त्रात् मन्त्रान्तरमित्यपि सङ्गच्छते। अत एव यामलादौ –

सकलो बीजहीनश्च संदिग्धो निद्रितस्तथा।
मनवस्ते न सिद्ध्यन्ति गुरुः स्यात् ब्रह्मघातकः॥
तदा तं सहसा ज्ञात्वा मन्त्रदेवं गुरुं त्यजेत्।
बहुज्ञोऽपि गुरुस्त्याज्योऽज्ञातसारो वरानने।
अल्पज्ञोऽपि गुरुः पूज्यो यो जानाति कुलाकुलम्॥
एकत्र गुरुणा सार्द्धं स्वापत्युपविशेच्च यः॥
स याति नरकं घोरं यावदिन्द्राश्चतुर्दश।
गुरोः वाक्यहतं कृत्वा आत्मवाक्यन्तु रोपयेत्।
गुरुं जेतुं मनो यस्य स याति नरकार्णवे॥
अनेकधा पशोरन्नं भुञ्जते ये च कौलिकाः।
तेभ्यः प्रकुप्यते देवि तत्संसर्गं न कारयेत्॥
लक्षत्रयञ्जपेल्लोपां लक्षं वाप्यजपां जपेत्।
होमयेद्द्रविषान्नेन निष्पापः स्यात्तदा ध्रुवम्।

६२६ *गुरुलोभात्- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal.

CC-0.In Public Domain. Digitization by eGangotri

कौलिकः पशुगामी च परशक्तिं रमेद्बलात् ॥
गोष्ठीमध्ये प्रयत्नेन स्पर्शं तस्य न कारयेत् ।
एकपात्रं पिबेद्द्रव्यं वीरो माहेश्वरो यदि ॥
श्वानोच्छिष्टं भवेत् पानं प्रायश्चित्ती सः कौलिकः ।
गायत्रीभिः सहस्रेण उपवासत्रयेण च ॥
सम्यक्शोधितचित्तन्तु[६२७] सुवर्णं गुरवे ददेत् ।
चक्रं कृत्वा तु देवेशि पूजयेत् तर्पणं विना ॥
चत्वारि तस्य नश्यन्ति आयुः प्रज्ञायशोधनम्[६२८] ।
अभिषेकं विना भूते आचार्यत्वं करोति यः ॥
योनिकोटिशतं याति रौरवं नरकं व्रजेत् ।
मातृरूपं परित्यज्य स्त्रीरूपां शक्तिमाचरेत् ॥
स याति नरकं घोरं जन्मकोटिशतैरपि[६२९] ।
परां लक्षत्रयं जप्त्वा अजपां लक्षमेव च ॥
तुर्यबीजञ्जपं लक्षं ततः शुद्धिः प्रजायते ।
मन्त्रं मातरं पुत्रीञ्च भगिनीञ्च कुलाङ्गनाम् ॥
न रमेत् कौलिको नित्यमेताः सम्यक्समर्चयेत् ।
श्रीपात्रग्रहणं कृत्वा चक्रमुत्थापयेद्यदि ।
पशुपानं भवेत्तस्य प्रायश्चित्तं तु जायते ॥

मन्त्रमातृगमने तु प्राणान्तं[६३०] प्रायश्चित्तम् । तदुक्तं तन्त्रान्तरे–

बलाद्वा स्वेच्छया वापि यो रमेत् मन्त्रमातरम् ।
दशलक्षं मनुं जप्त्वा भूषानलं समाचरेत् ॥

पुत्रीकुलाङ्गनाभगिनीगमने मूलमन्त्रं लक्षं जप्त्वा शुद्धिः । तदुक्तं तत्रैव–

मन्त्रपुत्रीं प्रपुत्रीञ्च भगिनीञ्च कुलाङ्गनाम् ।
रमणाल्लक्षजापेन पूतो भवति साधकः[६३१] ॥

तथा तन्त्रान्तरे–

पर्वण्यपूज्या देवेशि[६३२] गुरुमगिनं च शक्तितः ।
प्रदद्याच्च बलिं तत्र मूलमष्टशतञ्जपेत् ॥
पत्रं पुष्पं फलं मूलमन्नपानादि चौषधम् ।

---

६२७ *वित्तं तु- ख, ग ।*
६२८ *आयुप्रज्ञायशोधनम्- ख, ग ।*
६२९ *जन्मकोटिशतानि च- ख ।*
६३० *प्राणान्तिकं प्रायश्चित्तम्- ख ।*
६३१ *कौलिकः- ख ।*
६३२ *देवेशी- ख ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
अनिवेद्यं न भुञ्जीत दुरिताय प्रकल्पितम्[६३३] ॥
अनिवेद्यं तु भुञ्जानो प्रायश्चित्ती भवेन्नरः ।
देव्याश्चाष्टशतं मन्त्रं जप्त्वा पूतो भवेद्ध्रुवम् ॥
अनस्थिप्राणिसंघातं हत्वा तु नरकं व्रजेत् ।
हत्वा च पक्षिणः सर्वान् त्रियञ्चैकादशञ्जपेत् ॥
सर्पमार्जारनकुलं श्वानमुष्ट्रखरं हयम् ।
गजादींश्च मृगान् सर्वान् हत्वा चाष्टशतं जपेत् ॥
जपेदष्टसहस्रन्तु क्षुद्रजन्तुवधे कृते ।
हत्वा शूद्रं स्त्रियं बालं मन्त्रं पञ्चशतञ्जपेत् ॥
जपेदष्टसहस्रन्तु सच्छूद्रविनिपातने ।
त्रयोदशसहस्रन्तु दिव्यवीरबधे कृते ॥
वीरस्त्रीगमने वापि वृथापाने तथैव च ।
गुरोः स्नुषामन्त्रपुत्रीगमनेन च कौलिकः ॥

इदं त्वज्ञानकृते बोद्धव्यं इदमुपलक्षणं एवं सर्वपक्षिण इत्यत्रापि बलिदानव्यतिरेकहिंसाकृते तत्र विहितप्रायश्चित्तं विधेयम् ।

तदुक्तं ब्रह्मयामले–

कृत्वा वीरवधं मन्त्री वृथापानं गुरोः स्नुषाम् ।
वीरपत्नीं मन्त्रपुत्रीं रमित्वा लक्षमाजपेत् ॥

अन्यत्रापि–

बलिदानं विना देवि यो घातयेद् द्विजादिकान् ।
प्रायश्चित्तं तस्य प्रोक्तं तत्तत्तन्त्रनिदेशतः ।

तदुक्तं कालीतन्त्रे–

बलिदानैर्विना देवि हिंसा सर्वत्र वर्जयेदिति ।
वीरद्रव्यापहारी च दिव्यस्त्री निन्दकस्तथा ॥
कौलतन्त्रमनूनाञ्च साधकानां तथा पुनः ।
कौलिको निन्दको यस्तु प्रायश्चित्तं समाचरेत् ॥

कर्मलोपजातपापक्षयार्थं धर्मप्राप्त्यर्थञ्च दिव्यवीरयोरर्चनं कुर्यात् । इदमुपलक्षणम् । तद्विशेषविहितप्रायश्चित्तानुकल्पगङ्गास्नानादिवत् । कौलिकानामर्चनमेव प्रायश्चित्तं बोद्धव्यम् । तदुक्तं सर्वतन्त्रेऽपि–

माहेश्वरं समालोक्य पूजयेद्विधिपूर्वकम् ।
यथा विभवरूपेण पञ्चतत्त्वं निवेद्य च ॥
तदा तुष्टा भवेद्देवि सर्वकामान् लभेद्ध्रुवम् ।
अन्यथा नैव सिद्धिः स्यात् क्रुद्धा भवति योगिनी ॥
मेदिनीं यस्तु सम्पूर्णां ब्राह्मणे वेदपारगे ।

६३३ *प्रकल्प्यते- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

दत्त्वा यत्फलमाप्नोति तत्फलं कौलिकार्चने ॥
अश्वमेधसहस्राणि वाजपेयशतानि च ।
कृत्वा यत्फलमाप्नोति तत्फलं कौलिकार्चने ॥
मेरुतुल्यं सुवर्णन्तु ब्राह्मणे वेदपारगे ।
दत्त्वा यत्फलमाप्नोति तत्फलं कौलिकार्चने ॥
वापीकूपतडागानि कृत्वा यत्फलमाप्नुयात् ।
तत्फलाल्लक्षगुणितं कौलिकानां प्रपूजने ॥
कपिलाश्वगजान्दत्त्वा यत्फलं लभते नरः ।
तत्फलं कोटिगुणितं कौलिकानां प्रपूजने ॥
कौलिकं निन्दयेद्यस्तु कुलशास्त्रपरायणः ।
स याति नरके घोरे सद्य एव न संशयः ॥ यावदाहुतसंप्लवं वा ।
प्रायश्चित्तविहीनानामशक्तानां कुलेश्वरि ।
दिव्यवीरार्चनान्तेषां प्रायश्चित्ताय कल्पते ॥

इति श्रीमद्राघवभट्टविरचिते कालीतत्त्वे प्रायश्चित्तविधौ चतुर्दशतत्त्वम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ भावाः[६३४]

भावनावश..... यत्सूचितं तद्विविच्य कथ्यते। तदुक्तं भावचूडामणौ–

ईश्वर उवाच[६३५]

समयाचारसंकेतं भावसंकेतमेव च।
सूचितं तु महादेवि कथयस्वानुकम्पया॥
सर्वमन्त्रेषु विद्यासु भावसंकेतमेव हि।
तथापि शक्तितन्त्रेषु विशेषात् सर्वसिद्धिदम्।
न रहस्यं हि मन्त्राणां यदि भावो न विद्यते॥

श्रीदेव्युवाच

भावस्तु त्रिविधो देव दिव्यवीरपशुक्रमात्।
गुरवश्च त्रिधा चात्र तथैव मन्त्रदेवताः॥
यथा वै शक्तितन्त्रेषु विशेषात् सर्वसिद्धिदम्।
आद्यभावो महादेव श्रूयताम् सर्वसमृद्धिदः॥
द्वितीयो मध्यमश्चैव तृतीयः सर्वनिन्दितः।
......कायकृशादिविस्तरैः।
न भावेन विना देव तन्त्रमन्त्राः फलप्रदाः॥
किं वीर साधनैर्लक्षैः किमाकृष्टिः कुलाकुलैः।
किं पीठपूजनेनैव किं कन्याभोजनादिभिः॥
स्वयोषित्प्रीतिदानेन किं परेषां तथैव च।
किं जितेन्द्रियभावेन किं कुलाचारवर्त्मना॥
यदि भावविशुद्धात्मा न स्यात् कुलपरायणः।
भावेन लभते मुक्तिं भावेन कुलवर्धनम्॥
भावेन गोत्रवृद्धिः स्याद् भावेन कुलशोभनम्।
किं न्यासविस्तरेणैव किं भूतशुद्धिविस्तरैः॥
किं तथा पूजनेनैव यदि भावो न जायते।
केन नो युज्यते विद्या अपि केन न जप्यते॥
फलाभावश्च देवेश भावाभावात् प्रजायते।
एतद्रहस्य कथनं... ... ...।
त्रिलोकी... ... ... सर्वत्र तत्समागमः॥
नो वीक्ष्य निर्जनं देव कथं तत् कथयाम्यहम्।

भैरव उवाच

६३४ *भावनिर्णयः- ख।*

६३५ *ईश्वर उवाचेत्याद्यारभ्य तेजोमयजगत्सर्वपर्यन्तं अधिकपाठः खमातृकायामेव।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

त्वत्प्रसादान्महादेवी विद्यास्वाप्नविबोधिनी ।
सर्वमायाप्रपञ्चानां दीक्षादक्षा महेश्वरी ॥
विद्यते देवि सर्वेषां भूतानां स्वापकारिणाम् ।
नमामि कथय त्वं मां यदि पुत्रत्वमागतम् ॥
श्रीदेव्युवाच
प्रथमं दिव्यभावस्तु कथ्यते श्रृणु सादरम् ।
यद्वर्णदेवता यत्र तत्तेजः पुञ्जपूरितम् ॥
तेजोमयञ्जगत् सर्व विभाव्य मूर्तिकल्पनम् ।
तत्तन्मन्त्रमयैर्मन्त्रैः स्वेन स्वेनैव[६३६] वा पुनः ॥
आत्मानं तन्मयं ध्यात्वा सर्वभावं तथैव च ।
तत्सर्व योषितं ध्यात्वा चिन्तयेद्यतमानसः ॥
अशेषकुलसम्पन्ना नानाजातिसमुद्भवा ।
नानादेशोद्भवा वापि गुणलावण्यसंयुताः ॥
द्वितीयवत्सरादूर्ध्वं यावत् स्यादष्टमाब्दिकम् ।
तावत् कुमारी विज्ञेया यन्त्रमन्त्रफलप्रदा ॥
कुमारीपूजनाच्चैव कुमारीभोजनादपि ।
एकद्वित्र्यादिबीजानां फलदा नात्र संशयः ॥
ताभ्यः पुष्पं फलं वापि अनुलेपादिकन्तथा ।
बालप्रियञ्च नैवेद्यं दत्त्वा तद्भावरूपितः[६३७] ॥
दत्त्वा तदात्मनात्मानं बालभावविचेष्टितः ।
ताभिः प्रियकथालापक्रीडाकौतूहलादिकम् ॥
यथा तथा तत्प्रियकृत्[६३८] कृत्वा सिद्धीश्वरो भवेत् ।
तस्मात् षोडशपर्यन्तं युवतीति प्रचक्षते ॥
तत्र भावप्रकाशश्चेत् स भाव परमो मतः ।
रक्षितव्या प्रयत्नेन अक्षतास्नानं कारयेत् ॥
स्वयं कामेश्वरो नाम्ना भूत्वा कामपरायणः ।
भावशुद्धिं विधायैव मूलयोगं न चाचरेत् ॥
मूलयोगे कृते तत्र सप्ताहान्मण्डलं व्रजेत् ॥
न ब्रह्मा न हरिः शक्रो न देवी नापि षोडशी ।
न च मृत्युञ्जयो वापि न न्यासो नापि भावना ॥

---

६३६ *येन येनैव वा पुनः- ख, ग ।*
६३७ *पूरितः- ख, ग ।*
६३८ *यथायथं तत्प्रियं च- ख ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

तस्य मृत्युञ्जयो[६३९] देव प्रभवन्ति न देवताः।
शस्त्रेण शूलयोगेन नागदंष्ट्रविशेन वा॥
रौद्रेणातिज्वरेणैव महाव्याधिवशादपि।
म्रियन्ते तेन पापेन पुनश्च पशुतां व्रजेत्[६४०]॥
तस्य पाण्डित्यवैदग्धं विचित्रपदजल्पना।
देवतात्रापि लज्जन्ते किं पुनर्मानवादयः॥
अपि चेत् त्वत्समा नारी मत्समः पुरुषोऽस्ति चेत्।
अनिरुद्धसरस्वत्याः समो मन्त्रोऽस्ति वै तदा॥
अस्या जपो ब्रह्मजपो ज्ञानमस्यात्मचिन्तनम्।
योगसन्धारणात् सम्यग्ध्यानमस्य न संशयः॥
महापदि महापापे महाग्रहनिवारणे।
महाभये महोत्पाते महाशोके महोत्सवे॥
महामोहे महासौख्यमहादारिद्र्यसङ्कटे।
महारण्ये महाशून्ये महाज्ञाने महावने॥
दूराध्वनि पुरावासे दुर्भिक्षे दुर्निमित्तके।
समस्तक्लेशसंपाते स्मरणादेव नाशयेत्॥
अस्या ज्ञानं ध्यानमस्या अस्या स्यादात्मदर्शनम्।
तस्मादस्याः समा विद्या नास्ति तन्त्रे न संशयः॥
श्मशानशयने वीर कुलस्त्रीभिर्विकारवान्।
कृलामृतं निषेवी च कालीतत्त्वाक्षको विदुः॥
ब्रह्मादिभुवने तस्य समं नास्ति किमु चापरः।
स एव सुकृती लोके स एव कुलभूषणः॥
धन्या च जननी तस्य येन देवी समर्चिता।
वक्त्रे सरस्वती तस्य लक्ष्मीः तस्य सदा गृहे॥
तीर्थानि देहे संशन्ति येन देवी समर्चिता।
गानेन तुम्बुरुः साक्षद्दाने कर्णसमः पदे॥
दत्तात्रेयसमो ज्ञानी येन देवी समर्चिता ।
वह्निरिव रिपोर्हन्ता गङ्गेव मलनाशकः॥
शुचौ शुचिसमः साक्षादिन्दोरिव मुखप्रदः।
पितृदेवसमस्त्राण कालस्येव दुरासदः॥
वारीश इव गम्भीरो निर्घाते इव दुर्धरः।
बृहस्पतिसमो वक्ता धरणीसदृशः क्षमी॥

६३९ *मृत्युक्षयो- ख, ग।*
६४० *देव्युवाच आदि पाठ विद्यारहस्यमा छ- ख।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कन्दर्पसदृशः स्त्रीषु येन देवी समर्चिता ।
अहो भाग्यमहो लोके कुलज्ञानी परापरः ॥
तेषां मध्ये च यः कोऽपि कालीसाधनतत्परः
त्यजसि त्वं परश्चैव पुमांसं परमं तथा ॥
मादृशञ्च क्वचित्काले त्यजसि त्वं जगन्मये ।
कालीज्ञानिसमासाद्य न त्यजन्ति कदाचन ॥
न हि कालीसमं ज्ञानी न हि कालीसमं तपः ।
न हि काली समं ज्ञानं न हि कालीसमं फलम् ॥
ये गुणाः परमेशस्य पञ्चकृत्वा विधानतः ।
ते गुणाः सर्वयज्ञेषु कालीतत्त्वस्य नान्यथा ॥
कालिकाहृदये ज्ञानी लतासाधनतत्परः ।
देववन्मानवो भूत्वा लभेन्मुक्तिं चतुर्विधम् ॥
इति ते कथितं सर्वं कालिकातत्त्वमुत्तम् ।
अनेन ... . सर्वकर्म लभेदिति ॥
देव्युवाच
प्रसीद भगवन् देव सर्वप्राणहिते रत ।
येन वश्या भवेत् सिद्धिरुपायं वद शङ्कर ॥
ईश्वर उवाच
श्रृणु देवि परं तत्त्वं सर्वज्ञानोत्तमोत्तमम् ।
येन विज्ञानमात्रेण सर्वमन्त्र उपासकः ॥
नास्मात् परतरो देवो न जनो न जनिष्यति ।
अनेकरूपतत्त्वज्ञ[६४१] सर्वेषां प्रियकारकः ॥
युक्तदुर्गन्धमत्स्यादि सद्यो देवी बलिप्रियः ।
नानासुगन्धियुक्तः स्यान्मत्स्यादिभोजनं चरेत् ॥
सुगन्धामलतैलाद्यैर्नानालङ्कारविस्तरैः ।
स्नानं कार्यं चातिशुद्धं सूक्ष्मवासोऽभिधारयेत् ॥
सुगन्धिपुष्पमालभिर्माल्यालङ्कारभूषितम्[६४२] ।
स्निग्धं सुमधुरं देहं समरूपं मनोहरम् ॥
कृतार्थमङ्गलं देहं मृदुभाषणतत्परः[६४३] ।
नाम्ना मधुमती तत्र जायते नात्र संशयः ॥
मधुमत्योः फलं देव कथयामि श्रृणुस्व मे ।

---

६४१ *एक अनेकतत्त्वज्ञः- ग ।*
६४२ *स्वर्णलङ्कारभूषितैः- ख ।*
६४३ *शुद्धभाषणतत्परः- ख ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
सुधाधारे धरावाणी वक्त्रा तस्य प्रजायते ॥
सर्वज्ञः सर्वशास्त्राणामधिपः कुलनायकः ।
चन्द्रसूर्यावधि पृथ्व्यां भुनक्ति वसुधासुखम् ॥
चिरकालं शुचिः स्थित्वा चान्ते मोक्षमवाप्नुयात् ।
ब्रह्माण्डभाण्डसंभेदात्तेन जीवेत् समन्त्रयुक् ॥
य एषः कथितो देवि दिव्यभावः सुखावहः ।
न देयो यस्य कस्यापि पशौ गोप्यः प्रयत्नतः ॥
वीरभावो महादेव कथ्यते कुलभैरव ।
निर्द्वन्द्वमानसो भूत्वा हृदाक्षकमलातनुः ।
यद्वर्ण विद्यते वीरः तच्चापि कुलभैरवः ॥
इदं देवीकुलं देव देववन्द्यं मनोहरम्[६४४] ।
न च मारीभयं तत्र न च राजभयादिकम् ॥
सुमङ्गलं सदा तत्र धनपुत्रविवर्धनम् ।
लक्ष्मीस्तत्र महादेव सुस्थिरा च सदा भवेत् ॥
मन्त्रस्य च प्रबोधिन्या अवश्यं वृक्षमूलके ।
योजनीयं प्रयत्नेन न च विघ्नः प्रजायते[६४५] ॥
योगिनीभिर्न लुप्तं तन्न च पापेन युज्यते[६४६] ।
यत्र तत्र कुजे वारे श्मशाने गमने[६४७] कृते ॥
पूजाफलं भवेत् तत्र सप्तवासरसम्मितम् ।
चतुर्दश्यां गते तत्र पक्षपूजाफलं लभेत् ॥
नागते नार्चिते स्थाने पशुरेव न संशयः ।
नास्त्यस्मादधिको देव इति चिन्तापरायणः ॥
मोदकं द्रव्यभुक्त्वा तु भवेत् कुलपरायणः ।
साधकक्षोभमापन्नो मम क्षोभः प्रजायते[६४८] ॥
तस्माद्यत्नाद् भोगयुक्ते भवेद्वीरः सदा सुखी ।
भोगेन मोक्षमाप्नोति भोगेन कुलसाधनम् ॥
यद्यद्ददाति निद्राति यत्करोति यदर्चति ।
तत्सर्व कुलरूपं तु ध्यात्वा च विहरेत् सुधीः[६४९] ॥
एकाकी निर्जने देशे श्मशाने पर्वतेऽपि वा ।

६४४ *निर्द्वन्द्व इत्यारभ्य मनोहरं पर्यन्तपाठः कमातृकायां नास्ति ।*
६४५ *अयं श्लोकः कगमातृकायां नास्ति ।*
६४६ *लिप्यते- ख ।*
६४७ *पूजने कृते- ग ।*
६४८ *साधके क्षोभमापन्ने भवेत् क्षोभ ममाप्यहो- ख ।*
६४९ *सुखी- ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

शून्यगेहे नदी तीरे निःशङ्को विहरेन्मुदा ॥
वीराणाञ्जपकालस्तु सर्व एव प्रशस्यते ।
सर्वदेशे सर्वपीठे कर्तव्यञ्च न संशयः ॥
यदि विप्रो भवेत् श्रेष्ठः कुलद्रव्यपरायणः ।
तद्ध्यानेन विधानेन कर्तव्यं कुलतोषणम् ॥
दत्ते चैक जपपुष्पे पट्टवस्त्रफलं लभेत् ।
ब्रह्महत्यादिकं पापं क्षणान्नश्यन्ति निश्चितम् ॥
अपरायास्तु माहात्म्यं वक्तुं नैव महेश्वर ।
वीरसाधन कार्यन्तु कर्तव्यं वीरपुरूषैः ॥
दिव्यैरपि च कर्तव्यं पशुभिर्न तु पामरैः ।
वरं पामरकार्यं तन्न पशोरिति निश्चितम् ॥
यद्यत्परपसंकेतं तत्तत्मन्त्रप्रसाधनम् ।
अञ्जनं गुटिकादींश्च कुर्याद्वीरो महाबलः॥
दिव्यो वीरो न भेदोऽस्ति यद्भेदः कथ्यते श्रृणु ।
शान्तो विनीतो मधुरः कलालावण्यसंयुतः ॥
दिव्यस्तु देववत्पूज्यो वीरश्चोद्धतमानसः ।
विभूतिर्भूषणैर्वापि चन्दनैर्वा विलेपितः ॥
आकारगोपनो वापि व्यक्तो वा कुलभैरवः ।
रक्तचन्दनदिव्याङ्गो वैष्णवो वाप्यवैष्णवः ॥
असंस्कृतकेशजालैः संस्कृतो वा कुलेश्वरः ।
अपमाने च पूजायां हृष्टस्तुष्टः सदा भवेत् ॥
देवनिन्दापरो वापि तत्पूजादिपरोऽपि वा ।
पूजारतस्तद्रहितः कुलालापमते स्थितः ॥
निजभावसमायुक्तो देववद्विहरेत् क्षितौ ।
स्वकुलान्ते पुरश्चर्या कार्या रात्रौ न चान्यथा ॥
वेदहीनो द्विजो देव यथा मन्त्रेण सत्क्रियाम् ।
विष्णुभक्तिं विना देव भक्तिर्नैव भवेद्यथा ॥
शाक्तं ज्ञानं विना मुक्तिर्यथा हास्याय कल्पते ।
गुरुं विना तथा शास्त्रे नाधिकारः कथञ्चनः ॥
पतिहीना यथा नारी सर्वकर्मविवर्जिता ।
कुलं विना तथा दिव्यो वीरो वा मम पूजकः ॥
नाधिकारी भवेद्यस्मात् तस्माद्भावपरो भवेत् ।
अविनीतं कुलं यस्य स कथं मम पूजकः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

तस्माद्यत्नात् सदा कार्यं यथा स्याद्विनयान्वितम्।
CC-0. In Public Domain. Digitization by eGangotri
भावाभावात् कुले शास्त्रे नाधिकारः कथञ्चन॥
तेन भावविशुद्धस्तु साधकः कौलिको भवेत्॥
देव्युवाच
पशुभाव प्रवक्ष्यामि श्रृणु त्वं मम भैरव।
यथाविधि पशुविद्यां गृहीत्वा भावतत्परः॥
प्रथमं पूर्वसेवार्थं यत्नतः शुद्धिमाप्नुयात्।
न मत्स्यभोजनं वापि न स्त्रियं मनसा स्मरेत्।
न परद्रव्यलोभः स्यात् न भोगी मानसं भवेत्॥
सिन्धुतीरे कानने वा पर्वते वा सुरालये।
बिल्वमूले विविक्ते च पुण्यक्षेत्रे सुशोभने॥
न शूद्रदर्शनं कुर्यात् कौटिल्यं दूरतस्त्यजेत्।
देवताशुद्धभावेन ध्यातव्या सुसमाहितैः॥
त्रिसन्ध्यं देवतापूजां[६५०] त्रिसन्ध्यञ्जपमाचरेत्।
रात्रौ मालाञ्च यन्त्रञ्च स्पृशेन्नैव कदाचन॥
न मन्त्रमुच्चरेद् भुक्त्वा मौनी स्यात् सर्वकर्मसु।
पर्वकाले स्त्रियं नैव गच्छेत् साधकसत्तमः[६५१]॥
पुष्पगधन्जलञ्चैव स्वयमानीय पूजयेत्।
धातुकालं विना गच्छेत् न तु स्वस्त्रियमादरात्॥
पुराणश्रवणे श्रद्धा वेदवादार्थतत्परः।
न रात्रौ भोजयेद्विद्वान् ताम्बूलं परमेश्वरः॥
गुरुणा यद्यदादिष्टं तत्सर्वं यत्नतश्चरेत्।
अपि तत्कुसुमञ्चैव हेतुद्रव्यञ्च भैरव॥
स्पृष्ट्वा स्त्रियं त्रिरात्रेण पञ्चगव्येन शुद्ध्यति।
रक्तवस्त्रं न गृह्णीयाद् देवीभक्तिपरायणः॥
विष्णुतन्त्रोक्तपूजादि तदनुष्ठानमेव च।
कार्यं न कुकथालापं न कुर्याद्देवनिन्दनम्॥
नित्यश्राद्धं गवाग्रासं त्रिसन्ध्यं वैश्वदेवकम्।
तीर्थस्नानं पीठदेशगमनं धर्मतत्परः॥
पशुस्तु द्विविधो देव पूर्वेण सह भैरव।
अस्याधिकारपूजायां न गुरुत्वे कथञ्चन॥

---

६५० त्रिसन्ध्यं देवपूजा स्यात्- ख, ग।
६५१ साधकोत्तमः- ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पूर्वस्य नाधिकारोऽस्ति पूजादेशगतागतम्[६५२] ।
पूर्वतस्तु कौलिकैर्यैर्बहिस्कार्यः स्वदेशतः[६५३] ॥
पूर्वदर्शनमात्रेण कुलदर्शनमाचरेत्[६५४] ।
ब्रह्महत्यादिकं पापं वरं शक्यं न च प्रभो ॥
पूर्वदर्शनमात्रेण स च दास्य न संशयः ।
ममात्मा सोऽपि देवेश[६५५] विभुरित्यपि स प्रभो ॥
कुलशास्त्रे त्वन्यदेव[६५६]गरिष्ठः कुलनायकः ।
स्वकुले महती निन्दा परयोगे परेश्वरे ॥
तस्मादपि च तत्पापं पशुसंज्ञा प्रजायते ।
सर्वथा तत्र भावौ द्वौ न प्रकाश्यौ कथञ्चन ॥
सभावश्च विभावश्च पशवः कीर्तिता द्विधा ।
सभावः पशुभावेन जगत्त्रयविभावनात्[६५७] ॥
वीरभावो भवेद्देव दिव्यभावश्च[६५८]जायते ।
वीरात् प्रजायते दिव्यो दिव्याद्वीरः प्रजायते[६५९] ॥
दिव्यवीरे न भेदोऽस्ति साम्यमत्र विधीयते ।
भावस्तु मनसो धर्मः शब्दः[६६०] सो हि कथं भवेत् ॥
तस्माद् भावो हि कर्तव्यो दिङ्मात्रं समुदाहृतम् ॥
यथेक्षुगुडमाधुर्य रसना ध्रियते प्रभो ।
तथा भावविभावस्तु मनसा परिभाव्यते ।
एक एव महादेवो नानात्वं भजते प्रभुः ॥
उपाधिभावभेदेन भावो भेदेन दृश्यते ।
आनन्दघनसन्दोहः प्रभुप्रकृतिरूपधृक् ॥
रसरूप स एवात्मा स प्रभो परमो मतः ।
श्रोतव्यः स च मन्तव्यो निदिध्यातव्य एव सः ॥
साक्षात्कार्यः स एवात्मा आगमैर्विविधैः प्रभोः ।
श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यो मनसादिभिः॥

---

६५२ *गतागते- ख ।*
६५३ *पूर्वस्तुः सर्वकाले यो कार्यं स्वदेशतः- ख, ग ।*
६५४ *सत्यं सत्यं वदाम्यहम्- ख, ग ।*
६५५ *ममात्मा सोऽपि देवेश- ख, ग ।*
६५६ *कुलशास्त्रे त्वयं पापो- ख, ग ।*
६५७ *जन्मत्रयविभावनात्- ख, ग ।*
६५८ *ततो देवं प्रजायते- ख ।*
६५९ *दैवाच्च जायते वीरो वीराच्च देवसम्भवः- ख ।*
६६० *शाक्तः सो हि- ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
सोपपत्तिभिरेवायं ध्यातव्यो गुरुदेशिकैः।
तदा स एव सर्वात्मा प्रत्यक्षो भवति क्षणात्॥
तस्मिन्देहे तु देवेश प्रत्यक्षे परमेश्वरः।
भवैर्बहुविधैर्देव भवैस्त्रातापि नीयते
भुक्त्वा बहुविधैः ... गविचैः को यथा रसः॥
दुग्धाज्यरसयोगेन नानात्वं लभते प्रभोः॥
तृणो न जायते देव स तस्मिन्नपरो रसः।
तस्माद्दधि ततो हव्यं तस्मादपि रसोदयः॥
स एव कारणात्तत्र तस्मात्सर्वं च लभ्यते।
दृश्यते च महादेवो न कार्यं नापि कारणम् ॥
तथैवायं स एवात्मा नानाविग्रहयोनियुक्।
जायते जनिष्यते जातः कलाभेदाद्विभज्यते[६६१]॥
स जातः स मृतो बद्धः स मुक्तः स सुखी पुमान्।
स स्त्री स नपुंसकः स्यात् स विद्वान् स ईश्वरः॥
नानाध्यानसमायोगात् नानात्वं भजते प्रभो।
एक एव स एवात्मा सर्वरूपी सनातनः॥
अव्यक्तं[६६२] स च व्यक्तं स्यात् प्रकृत्या जायते क्रमात्।
तस्मात् प्रकृतियोगेन ज्ञायते नान्यथा क्वचित्॥
विना घटत्वयोगेन प्रत्यक्षोऽपि यथा घटः।
इतराद् भिद्यमानोऽपि न भेदमुपगच्छति॥
मां विना देवपुरुषो न च याति कथञ्चन।
न प्रयोगेन तु ज्ञानेन श्रुत्या न च गुरुक्रमात्॥
प्रकृत्या ज्ञायते ह्यस्मिन् प्रकृत्या लुप्यते पुमान्।
प्रकृत्यधिष्ठितं सर्वं प्रकृत्यावस्थितं जगत्॥
प्रकृत्या भेदमाप्नोति प्रकृत्या भेदमाप्नुयात्।
नरस्तु प्रकृतिश्चैव न पुमान् परमेश्वर॥
तयोः समरसं ज्ञानं वस्तुतस्त्वं महेश्वर।
उभयो समवायस्तु वस्तुतत्त्वं परं पदम्॥
ज्ञाने तस्मिन्[६६३] स्वयं प्राज्ञश्चित्स्वरूपः पुमानसौ।
निराकारं सर्वदेव प्रमाणगोचरः पुमान्॥
व्यक्तो भवति देवेश स्वयमात्मसमुद्भवः।

---

६६१ *एक एव श्लोकादारभ्य स जातपर्यन्तपाठः गमातृकायां नास्ति।*

६६२ *अव्यक्तमित्यारभ्य गुरुक्रमाद् पर्यन्तपाठः गमातृकायां नास्ति।*

६६३ *प्रकृतेऽस्मिन्- ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
उपायाः सन्ति बहुधा ज्ञातुं ब्रह्मसनातनम् ॥
तथापि प्रकृतेर्योगात् क्षिप्रं प्रत्ययतां व्रजेत् ।
सा मातृकाज्ञानसेतुः यथा नावं प्रगृह्य
नानादेशसमुत्तीर्य समुद्रं रमते[६६४] चिरात् ।
तत्तटे नावमास्थाय क्षणाद्याति यथा प्रभो ॥
विष्णुत्वं चैव शैवत्वं ब्रह्मत्वं चैव भैरव ।
वैजात्यं जाति[६६५] चेत्तत्र कथं च तद्विकारणम् ॥
तस्मात् परंपरा याता ते हि कारणतां गतः ।
न कारणादृते वस्तु साक्षाच्च प्रतिकारणम् ॥
स्त्रीभावः प्रकृतिर्ज्ञेया पुंभावः पुरुषोत्तमः।
ज्ञप्तिर्ज्ञेयविभागेन ज्ञायतां भैरवेश्वरः ॥
घटप्रत्यक्षतां यान्तु आलोको व्यञ्जको यथा ।
चक्षुरादितरत किञ्चिदधिकं निर्विकल्पनम्[६६६] ॥
घटत्वं पुनरेतस्य भेदकारणमेव हि ।
यथा[६६७]ज्ञप्तिविभागेन यथा व्यञ्जनतां गतः ॥
साक्षात् कारणमेवैतत् प्रकृत्या चैव भैरवः ।
दिव्यभावो वीरभावो यस्य चित्ते व्यवस्थितः ॥
जीवन्मुक्तः स एवात्मा भोगार्थ नटते[६६८]महीम् ।
देवीपुत्र स एवात्मा भैरवः परिकीर्तितः ॥
भावत्रयाणां मध्ये तु भावौ तौ परिकीर्तितौ[६६९].
न वक्तव्यं महादेव कुलसारं कुलोत्तमैरिति ॥

इति श्रीमद्राघवभट्टविरचिते कालीतत्त्वे भावनिर्णयो नाम पञ्चदशतत्त्वम् ।

६६४ *विशते- ख।*
६६५ *याति- ख, ग।*
६६६ *चक्षुरादि न तद्किञ्चिदधिकं निर्विकल्पनम्- ख।*
६६७ *तथा- ख।*
६६८ *रमते- ख।*
६६९ *द्वौ सुप्रतिष्ठितौ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ कुमारीपूजनविधिरुच्यते

तदुक्तं यामलादौ[६७०]–

एकवर्षा भवेत् सन्ध्या द्विवर्षा च सरस्वती।
त्रिवर्षा च त्रिधा मूर्तिश्चतुर्वर्षा च कालिका॥
सुभगा पञ्चवर्षा स्याद् षड्वर्षा च भवेदुमा।
सप्तभिर्मालिनी साक्षादष्टवर्षा च कुब्जिका॥
नवभिः कालसङ्कर्षा दशभिश्चापराजिता।
एकादशाब्दैः[६७१]रुद्राणी द्वादशाब्दैश्च भैरवी।
त्रयोदशैर्महालक्ष्मीः द्विसप्ता कुलनायिका।
क्षेत्रज्ञा पञ्चदशभिः षोडशे चर्चिका मता॥
एवं क्रमेण पूज्येत यावत्पुष्पन्न विद्यते।
प्रतिपदादिपूर्णान्तं वृद्धिभेदेन पूजयेत्॥
महापर्वसु सर्वेषु विशेषाञ्च पवित्रके।
महानवम्यां देवेशि कुमारींश्च प्रपूजयेत्॥
कुमारीः पूजयेद्यस्तु षोडशैव च भक्तितः।
पूजयित्वा च भक्त्या च सर्वसम्पत्तिमान् भवेत्॥
पूजयेत् कुलविद्यानामेकाम्बा नव भैरवी[६७२]।
एवं[६७३] प्रणवयोगेन चैतन्यमर्चयेत्तनुम्॥
ऐँकारेण जलं देयं ह्रीँकारेण पदसेचनम्।
श्रीँकारेणार्घं दद्यात् कूर्चबीजेन चन्दनम्॥
शक्तिबीजेन पुष्पाणि धूपं षष्ठेन दापयेत्।
अर्चयेद्वै षडङ्गानि कामैश्वर्यादिनामतः॥
वाग्भवेन पुरःक्षोभं मायाबीजेन गुणाष्टकम्।
श्रियो बीजेन श्रियो नाथ स्त्रीबीजेनाधिसंशयः॥
भैरवस्य तु बीजेन षडत्वमुपजायते।
कुमारी काम्यहं नाथ सदा त्वं च कुमारिका॥
अष्टोत्तरशतं वापि एकां कन्यां प्रपूजयेत्।

---

६७० *जामलादौ- ख।*
६७१ *एकादशैश्च रुद्राणी- ख, ग।*
६७२ *भैरवी- ख।*
६७३ *पञ्च- ख।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पूजिताः प्रतिपूज्यन्ते निर्दहत्यपमानिता ॥[६७४]
भूर्भुवो मूर्तिस्स्यादेका कुमारी रुद्रपूजिता ।
असुरा दुर्धरानामा एते दुष्टग्रहा अपि ॥
भूतवेतालगन्धर्वडाकिनीयक्षराक्षसाः ।
तदीयदेवताः सर्वा भूर्भुवश्चैव भैरवः ॥
पृथिव्यादीनि सर्वाणि ब्रह्माण्डं सचराचरम् ।
ब्रह्मविष्णुहरश्चैव ईश्वरश्च सदाशिवः ॥
भेरुण्डा सर्वदुष्टाश्च यस्तु कन्यां प्रपूजयेत् ।
कालाग्निशिवपर्यन्तं तथा कार्यादिसंहरिः ॥
सप्तद्वीपाः समुद्राश्च भुवनानि चतुर्दश ।
विधिवद्युक्तकौमारीं भोजयेच्चैव भैरवीम् ॥
पाद्यमर्घ्यं तथा धूपं कुङ्कुमं चन्दनं शुभम् ।
भक्तिभावेन सम्पूज्य निवेदयेत् सुसाधकः ॥
प्रदक्षिणात्रयं कुर्यादादिमध्ये शुभं भवेत् ।
पश्चाच्च दक्षिणा देया रजतं स्वर्णमौक्तिकम् ॥
विवाहयेत् स्वयं कन्यां ब्रह्महत्या विनश्यति ।
गोहत्या वा स्त्रीहत्या च सर्वपापं प्रणश्यति ॥
माता च पितरश्चैव भ्रातरश्चैव सर्वथा ।
ये च ये च पुनः सर्वे कन्यादानं प्रकुर्वते ॥
भुक्तिमुक्तिफलं तेषां सर्वसौभाग्यसम्पदः ।
रुद्रलोके वसेन्नित्यं त्रिनेत्रो भगवान् हरिः॥
षष्टिकोटिसहस्राणि अश्वमेधफलं लभेत् ।
तत्फलं लभते सद्यः कन्यां यस्तु विभावयेत् ॥
वालुकासागरे यावत्तावदङ्ग[६७५]नरेश्वरः ।
एकैकं कुलमुद्धृत्य स्वर्गलोके गतेऽपि च ॥
तावत् स भुञ्जते भोगं यावद् भूवि दिवौकसः ।
कन्यादानं महादानं सर्वदानेषु चोत्तमम् ॥
दौर्भाग्यं नश्यति क्षिप्रं सौभाग्यञ्च प्रवर्तते ।
राजद्वारे भवेत् पूजां मानञ्चैव कुलेश्वरः ॥
सर्वथैव कुमारींश्च पूजयेच्च प्रयत्नतः ।

---

६७४ *कुमारी योगीनी साक्षात् कुमारी सर्वदेवता । अधिकपाठः- ख, ग मातृकायाम् ।*
६७५ *वालुकासागरे यावन्तः तावद्दृष्टं नरेश्वरः- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

महाभयसमुत्पन्ने[६७६] कन्यकाश्च[६७७] प्रपूजयेत् ।
अन्ते च लभते मोक्षं सत्यं सत्यन्तु भैरव ॥

अथ पद्धतिः–प्रतिपदि सन्ध्यानाम्नीं कुमारीमानीय गन्धोदकेन संस्नाप्य चन्दनादिना संलिप्य कामरूपपीठे नवकोणञ्चक्रं निर्माय पुष्पसङ्कीर्णे पुरोवर्तिनि पीठे संवेश्य प्रथमत्रिकोणे ऐँ ह्रीँ श्रीँ स्त्रीँ हूँ सैँ कुलवागीश्वर्यै नमः । ऐँ ५ वज्रश्वर्यै नमः , ऐँ ५ भगमालिन्यै नमः , ततः षट्कोणे अं अङ्गकुमार्यः[६७८] शक्तीः पूजयेद्यथा । ऐँ ५कुलकुमारिके हृदयाय नमः । ऐँ ५ नायिके[६७९]शिरसे स्वाहा । ऐँ ५कुलभैरवि शिखायै वौषट् । ऐँ ५ कुलवागीश्वरि कवचाय हुँ । ऐँ ५कुलपालिके अस्त्राय फट् । ऐँ ५ सिद्धिजापे[६८०] पूर्ववक्त्राय नमः । ऐँ ५ जये उत्तरवक्त्राय नमः । ऐँ ५ कुब्जिके पश्चिमवक्त्राय नमः । ऐँ ५ कान्तिके दक्षिणवक्त्राय नमः इत्यङ्गानि सम्पूज्य ऐँ ५ सन्ध्यायै कुलकुमारिकायै[६८१] इदमाचमनीयम् । ऐँ ह्रीँ सन्ध्यायै कुलकुमारिकायै पाद्यं नमः । श्रीँ सन्ध्यायै कुलकुमारिकायै अर्घ्यं नमः । स्त्रीँ सध्यायै कुलकुमारिकायै चन्दनं नमः । हुँ सन्ध्यायै कुलकुमारिकायै पुष्पं नमः । सैँ[६८२] सन्ध्यायै कुलकुमारिकायै इदं वस्त्रं नमः ।

एवं क्रमेण षोडशोपचारैर्दशोपचारैः पञ्चोपचारैर्वा कुमारीं पूजयित्वा लिखितचक्रे सपरिवारां मूलदेवतां सम्पूज्य प्रदक्षिणीकृत्य दण्डवत्प्रणम्य यथासम्भवं स्वर्णादिदक्षिणां दत्त्वा विसृज्य कुमारिके मातः क्षमस्वेति विसर्जयेदिति ।

एवं द्वितीयदिने सरस्वतीकुमारिके[६८३] सम्पूजयेदिति । तृतीयदिने[६८४] त्रिमूर्तिकुमारिकां पूजयेदेवं चतुर्थदिने कालिकां कुलकुमारिकां पूजयेदेवं पञ्चमी षष्ठी सप्तमी अष्टमी नवमी एकादशी द्वादशी त्रयोदशी चतुर्दशी पौर्णमासीक्रमेण यथासंख्यं सुभगा-उमा-मणिकुब्जिका-कामसंकर्षणी[६८५] अपराजिता-रुद्राणी-भैरवी-महालक्ष्मीपीठनायिकाक्षेत्रज्ञाचर्चिकाकुलकुमारिकाः[६८६] पूजयेत् ।

यदि चैकस्मिन्दिवसे नानावश्यकाः कुमारीः पूजयेत् तदापि च वयोऽनुसारेण सन्ध्यादिनामसंज्ञका कार्या बहुतराभावे एकतरापि वयोऽनुसारेण संज्ञा कृत्वा पुष्पोदयपर्यन्तं पूजयेदिति । स्थिरचित्तश्च स्वयं भवेदिति ।

तदुक्तं मुण्डमालायाम्–

कुमारीपूजनाशक्तो नारीं स्वप्नेऽपि न स्मरेदिति । अन्यत्रापि प्रत्यक्षता स्नानं कारयेदिति । तथा कृतेऽनिष्ठस्यापि श्रवणात् । तदुक्तं भावचूडामणौ–

---

६७६ महद्भयसमुत्पन्ने- ख ।
६७७ कन्यकाश्चैव पूजयेत्- ख ।
६७८ अनङ्गकुसुमाद्या- ख, ग ।
६७९ मायिके- ख, ग ।
६८० सिद्धिजाये- ख, ग ।
६८१ सन्ध्ये कुलकुमारीके- ख, ग ।
६८२ सैँ- ख ।
६८३ सरस्वतीं कुलकुमारीकाम्- ख, ग ।
६८४ दिवसे- ख, ग ।
६८५ कालसंकर्ष ख, ग ।
६८६ कुलकुमारीः- ग ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

न रविस्तु हरिश्शम्भुर्न देवी नापि षोडशी ।
न वा मृत्युञ्जयो वापि न न्यासो न च भावना ॥
तस्य मृत्युक्षये[६८७] देव प्रभवन्ति न देवताः ॥ इत्यादि[६८८]

इति श्रीमद्राघवभट्टविरचिते कालीतत्त्वे कुमारीपूजनविधौ षोडशतत्त्वम् ।

६८७ मृत्युञ्जयो- ख ।
६८८ अधिक पाठः:- ख, ग मातृकायाम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ मालाविधिः[६८९]

तदुक्तं कालीतन्त्रे–

दन्ताक्षमालया चैव राजदन्तेन मेरुणा। जपेदिति शेषः। तत्रैव–

दन्तेन कालिकायास्तु पूर्वोक्ता तु विदुर्लभा[६९०]।

यामले[६९१]–

नरे भाशूरमुण्डानां[६९२] छिन्नानां रणसंकुले।

मालां वै कारयेद् गुह्यां महाविद्यां सुसाधकः[६९३]॥

अन्यत्रापि–

गजवाजिनराणाञ्च मुण्डानामक्षमालया।

लक्षमावर्तयेन् मन्त्रं महाविद्यां सुसाधकः॥

विशुद्धेश्वरमहातन्त्रे–

मालाविधानं परमं पार्वति श्रृणु तत्त्वतः।

येन विज्ञानमात्रेण मन्त्राः सिद्ध्यन्ति तत्क्षणात्॥

अनुलोमविलोमेन मन्त्रमावर्तभेदतः[६९४]।

मन्त्रेणान्तरितान् वर्णान् वर्णेनान्तरितं मनुः॥

कुर्याद्वर्णमयीं मालां सर्वमन्त्रप्रदीपिनी।

क्षकारं मेरुरूपं तु लङ्घनं नैव कारयेत्।

एतत्परमरहस्यं[६९५] मयोक्तन्ते[६९६] यशस्विनि॥

त्वया गुप्तभवं[६९७] कार्यं नाख्येयं यस्य कस्यचित्।

यामलेऽपि[६९८]–

सबिन्दुं वर्णमुच्चार्य पश्चान्मन्त्रं जपेत् सुधीः।

सुमेरुं कं कल्पयित्वा जपेत्तु नाभिलङ्घयेत्[६९९]॥

अथ करमाला यथा बृहच्छीक्रमे–

---

६८९ *मालाविधिरुच्यते- ख।*

६९० *भुवि दुर्लभा- ख।*

६९१ *यामलेऽपि- ख।*

६९२ *नरे भाशूरमुण्डानाम्- ख।*

६९३ *मालाविधानं परमं श्रृणु पार्वीति तत्त्वतः। येन विज्ञानमात्रेण मन्त्राः सिद्ध्यन्ति तत्क्षणात्- अधिक पाठः:- ख, गमातृकायाम्।*

६९४ *मन्त्रमातुर्विभेदतः- ख।*

६९५ *एततरहस्यं परमम्- ख।*

६९६ *च- ख।*

६९७ *गुप्तरतं- ख, ग।*

६९८ *जामलेऽपि- ख।*

६९९ *क्षं मेरुकं कल्पयित्वा जपेन्नैवाभिलङ्घयेत्- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तर्जन्यग्रे तथा मध्ये यो जपेत् स तु पापकृत्।
अनामायास्त्रयं पर्व कनिष्ठायास्त्रयन्तथा ॥
मध्यमायास्त्रयं पर्व तर्जनीमूलपर्वणि। जपेदित्यर्थः।
हंसपारमेश्वरेऽपि–
पर्वद्वयमनामायाः परिवर्तेन वै क्रमात्।
पर्वत्रयं मध्यमायास्तर्जन्येकं समाहरेत्॥
शक्तिमाला समाख्याता सर्वमन्त्रप्रदीपिका।
नित्यञ्जाप्यं करे कुर्यात् न तु काम्यं कदाचनेति ॥
अथ मालासंस्कारः
तदुक्तं नीलतन्त्रे–
एकैकमालामादाय[७००] ब्रह्मग्रन्थिं विनिर्दिशेत्।
अनुलोमविलोमाभ्यां मातृकान्तरितं जपेत्।
तेन सर्वगुणोपेता जायते सर्वसिद्धिदाः॥

इति श्रीराघवभट्टविरचिते कालीतत्त्वे सप्तदशतत्त्वम्।

---

७०० एकमणिमादाय- ख, ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

इतोऽग्रे कवचस्तवसहस्रनामानि

ॐ नमः कालिकायै।

कैलासशिखरारूढं भैरवं चन्द्रशेखरम्।
वक्षःस्थलसमासीना भैरवी परिपृच्छति॥

भैरव्युवाच

देवेश परमेशान लोकानुग्रहकारक।
कवचं सूचितं पूर्वं किमर्थं न प्रकाशितम्॥
यदि मे महती प्रीतिस्तवास्ति कुलभैरव।
कवचं कालिकादेव्याः कथय स्वानुकम्पया॥

भैरव उवाच

अप्रकाश्यमिदं देवि नरलोके विशेषतः।
लक्षवारं बोधितापि स्त्रीस्वभावाद् पिपृच्छति॥

देव्युवाच

सेवकाः बहवो देव कुलधर्मपरायणाः।
यतस्ते त्यक्तजीवासौ शवोपरि चितोपरि॥
तेषां प्रयोगसिद्ध्यर्थं स्वरक्षार्थं विशेषतः।
पृच्छामि बहुशो देव कथय स्वाप्रसादतः॥

श्रीभैरव उवाच

कथयामि श्रृणु प्राज्ञे कालिकाकवचं परम्।
गोपनीयं पशोरग्रे स्वयोनिरपरे यथा॥

सर्वविद्या महावाग्मी कालिकादेवीकवचस्य भैरव ऋृषिरुष्णिक्छन्दोऽद्वैतरूपिणी कालिकादेवता हुँ बीजं ह्रीँ शक्तिः क्रीँ कीलकं सर्वार्थसाधनपुरःसरं मन्त्रसिद्धये जपे विनियोगः।

सहस्रारे महापद्मे कर्पूरधवलो गुरुः।
वामोरुस्थितशक्तिश्च सदा सर्वत्र रक्षतु॥
परमाख्यगुरुः पातु परापरगुरुस्तथा।
परमेष्ठिगुरुः पातु दिव्यसिद्धश्च मानवः॥
महादेवी सदा पातु महादेवस्तथावतु।
त्रिपुरो भैरवः पातु दिव्यरूपधरः सदा॥
ब्रह्मानन्दः सदा पातु पूर्णदेवस्तथावतु।
चलचित्तः सदा पातु चलाचलश्च पातु माम्॥
कुमारः क्रोधनश्चैव वरदस्वरदीपनः।
मया मायावती चैव सिद्धौघाः पान्तु सर्वदा॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

विमलः कुशलश्चैव भीमसेनः सुधाकरः ।
मीनो गोरक्षकश्चैव भोजदेवः प्रजापतिः ॥
शिरसः पादपर्यन्तं पातु मां घोरदक्षिणा ।
तथा शिरसि मां काली हृदि मूले च रक्षतु ॥
सम्पूर्णविद्यया देवी सदा सर्वत्र रक्षतु ।
क्रीँ क्रीँ क्रीँ वदने पातु हृदि ह्रीँ ह्रीँ सदावतु ॥
कूँ भूँ पातु सदाधारे कालिका दक्षिणा हृदि ।
क्लीँ पूर्वे हुँ हुँ दक्षे क्रीँ क्रौँ क्रीँ वामतोऽवतु ॥
पृष्ठे पातु सदा स्वाहा मूलं सर्वत्र रक्षतु ।
षडङ्गं युवती पातु षडङ्गेषु सदैव माम् ॥
यन्त्रराजः सदा पातु ऊर्ध्वोधो दिग्विदिक्स्थितः ।
चक्रराजस्थिताश्चापि देवता परिपान्तु माम् ॥
उग्रा उग्रप्रभा दीप्ता पान्तु पूर्वत्रिकोणके ।
नीलघनावलाका च तथा परत्रिकोणके ॥
मात्रामुद्रामिता चैव तथा मध्ये त्रिकोणके ।
काली कपालिनी कुल्ला कुरुकुल्लाविरोधिनी ॥
बहिः षट्कोणगाः पान्तु विप्रचित्ता तथा प्रिये ॥
सर्वाः श्यामाः खड्गधरा वामहस्तेन तर्जनाः ।
ब्राह्मी पूर्वदले पातु नारायणी तथाग्निके ॥
माहेश्वरी दक्षदले चामुण्डा रक्ष सेवतु ।
कौमारी पश्चिमे पातु वायव्ये चापराजिता ।
वाराही चोत्तरे पातु नारसिंही शिरेऽवतु ।
ऐँ ह्रीँ असिताङ्गः पूर्वे भैरवः परिरक्षतु ॥
ऐँ ह्रीँ रुरुस्याग्निकोणे ऐँ ह्रीँ चण्डश्च दक्षिणे ।
ऐँ ह्रीँ क्रोधो नैर्ऋते स्यादैं ह्रीँ ऊनमत्तकस्तथा ॥
पश्चिमे ऐँ ह्रीँ मां कपाली रक्षतु वायुकोणके ।
ऐँ ह्रीँ भीषणनामा च उत्तरेऽवतु सर्वदा ॥
ऐँ ह्रीँ संहार ऐशान्यां मातृणां सङ्गगाः शिवाः ।
ऐँ ह्रीं तु वटुकः पूर्वदले पातु सदैव माम् ॥
ऐँ त्रिपुरान्तकवटुक आग्नेय्यां सर्वदावतु ।
ऐँ वह्निवेतालोऽपि वटुको दक्षिणे मां सदावतु ॥
ऐँ अग्निजिह्वादुर्धराख्या नैर्ऋत्यां पश्चिमे तथा ।
ऐँकालवटुकः पातु ऐँ करालवटुस्तथा ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

वायव्यामैं एकपाद उत्तरे वटुकोऽवतु।
CC-0. In Public Domain. Digitization by eGangotri
ऐं भीमवटुकः पातु ऐंशान्यां दिशि मां सदा॥
ऐं ह्रीं क्लीं हुं फट् स्वाहाद्याश्चतुःषष्टिमातरः।
ऊर्ध्वाधोदक्षमामग्रे पृष्ठदेशेषु पान्तु माम्॥
ऐं हुं सिंहव्याघ्रमुखी पूर्वे मां परिरक्षतु।
ऐं कां कां सर्पात्ममुखा अग्निकोणे सदावतु॥
ऐं मां मां मृगमेषमुखी दक्षिणे मां सदावतु॥
ऐं चौं चैं गजवाजिमुखी नैर्ऋत्यां मां सदावतु।
ऐं मैं मैं विडालमुखी पश्चिमे पातु मां सदा॥
ऐं खौं खौं क्रोष्ट्वश्वमुखी दक्षिणे मां सदावतु।
ऐं हाँ हाँ ह्रस्वदीर्घमुखी लम्बोदरमहोदरी॥
पातु मामुत्तरे कोणे ऐं ह्रीं ह्रीं शिवकोणके।
ह्रस्वजङ्घतालजङ्घप्रलम्बोष्ठी सदावतु॥
एताः श्मशानवासिन्यो भीषणा विकृताननाः।
पातु मां सर्वदा देव्यः साधकाभीष्टपूरिकाः॥
इन्द्रो मां पूर्वतो रक्षेदाग्नेय्यामग्निरेव च।
दक्षे यमः सदा पातु नैर्ऋत्यां निर्ऋतिश्च माम्॥
वरुणोऽवतु मां पश्चाद्वायुर्मां पातु वायवे।
कुबेरश्चोत्तरे पायादीशान्यान्तु सदाशिवः॥
ऊर्ध्वं ब्रह्मा सदा पातु अधश्चानन्तदेवता।
पूर्वादिदिक् स्थिता पान्तु वज्राद्याश्च गणाश्च माम्॥
कालिका पातु शिरसि हृदये कालिकावतु।
दिक्षु मां कालिका पातु विदिक्षु कालिकावतु।
ऊर्ध्वं मे कालिका पातु अधश्च कालिकावतु॥
चर्मसृङ्मां समेदोस्थिमज्जाशुक्राणि मेऽवतु।
इन्द्रियाणि मनश्चैव देहं सिद्धिश्च मेऽवतु॥
आकेशात्पादपर्यन्तं कालिका मे सदावतु।
विशन्तं कालिका पातु पथि मां पातु कालिका।
शयने कालिका पातु दारान्मे पातु कालिका॥
पुत्रान्मे कालिका पातु धनन्मे कालिकावतु।
यत्र मे संशयविघ्नास्तान्नाशाय तु कालिका॥
इतीदं कवचं देवी ब्रह्मलोके हि दुर्लभम्।
तव प्रीत्या मयाख्यातं गोपनीयं स्वयोनिवत्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
तव स्मृते तु देवेशि सर्वयज्ञफलं लभेत्।
सर्वपापक्षयं याति वाञ्छा सर्वत्र विन्दति ॥
नाम्नः शतगुणं स्तोत्रं ध्यानं तस्माच्छतादिकम्।
शुचिः समाहितो भूत्वा भक्तिश्रद्धासमन्वितः ॥
संस्थाप्य वामभागे तु शक्तिमिमां परायणाम्।
रक्तवस्त्रसमासीनः शिवमन्त्रपरां शुभाम्।
या शक्तिः सा महादेवी शिवरूपस्तु साधकः ॥
अन्योन्यचिन्तनाद्देवी देवत्वमुपजायते।
शक्तियुक्तो जपेद्देवीं चक्रे वा मनसापि वा ॥
भावैश्च मधुपर्काद्यैस्ताम्बूलाद्यैः सुवासितैः।
ततस्तु कवचं दिव्यं पठेदेकमना प्रिये ॥
तस्य सर्वार्थसिद्धिः स्यान्नात्र कार्या विचारणा।
इदं रहस्यं परमं परं स्वस्त्ययनं महत् ॥
यः सकृत्तु पठेद्देवि श्रृणुयाद्वा समाहितः।
सर्वान् स लभते कामान् परे देवी पुरं व्रजेत् ॥
सकृद्यस्तु पठेद्देवि कवचं देवदुर्लभम्।
सर्वयज्ञफलं तस्य भवेदेवं न संशयः ॥
संग्रामेषु जयेच्छत्रुं मातङ्गान्निव केशरी।
अस्त्राणि तस्य शस्त्राणि शरीरे प्रभवन्ति हि ॥
तस्य व्याधिः कदाचिन्न दःुखं नास्ति कदाचन।
गतिस्तस्यैव सर्वत्र वयस्तुल्यो सदा भवेत् ॥
दीर्घायुः कामभोगीशो गुरुभक्तो भवेत् सदा।
अहो कवचमाहात्म्यं पठ्यमानस्य नित्यशः ॥
विनापि योगचर्येण योगिनां समतां व्रजेत्।
भूर्जत्वचि समालिख्य चक्रं तत्र विनिर्मितम् ॥
मध्यत्रिकोणमालिख्य साध्यसाधकयोर्लिपिम्।
उद्धरेन्मूलमन्त्रं च मातृकर्णेन वेष्टयेत् ॥
लघुमिश्रेण चन्द्रेण चन्दनाभ्याञ्च सुन्दरि।
एतद्यन्त्रं महेशानि सुरस्यैव तु दुर्लभम् ॥
गोरोचनकुङ्कुमेन तत् बाह्यकवचं लिखेत्।
श्वेतसूत्रेण संवेश्य यन्त्रोपरि च मण्डयेत् ॥
पञ्चामृतैः पञ्चगव्यैः स्नापयित्वा सुशोभने।
सम्पूज्य देवतां रूपां गुटिकां सर्वकामदाम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्राणप्रतिष्ठामन्त्रेण प्राणांस्तत्र नियोजयेत्।
अन्तर्योनिं ततो ध्यात्वा तत्र संस्थापयेद्बुधः।
एषां तु गुटिका देवि कश्चलग्नाखिलप्रदा॥
शीर्षे वश्यकरो देवि नाभौ स्तम्भनकारिणी।
बध्वा वामभुजे ह्येषा वैरिपक्षे क्षयङ्करी॥
दक्षिणे बाहुमूले वै यदि तिष्ठति सर्वदा।
तदा सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्तते॥
त्र्यहाह कवचस्यास्य पठनाद्धारणात् प्रिये।
सर्वान् कामानवाप्नोति तव स्नेहात् प्रकाशितम्॥
गुरोः पादप्रसादेन सद्विद्या यदि लभ्यते।
तथैव कवचं देवि त्रिषु लोकेषु दुर्लभम्॥
स च देवो हरः साक्षात् तत्पत्नी परमेश्वरी।
यस्य भक्तिर्गुरोर्नित्यं वर्तते देववत् प्रिये॥
तदा मन्त्रस्य यन्त्रस्य सिद्धिर्भवति नान्यथा।
कवचस्य तथा सिद्धिर्गुटिकायाश्च सुन्दरि ॥
अज्ञात्वा कवचं देवि विना यष्ट्वा गुरुपादुकाम्।
तत्फलं नैवाप्नोति परे च नरकं व्रजेत्।
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः॥
न शक्नोमि प्रभावन्तु कवचस्य तु वर्णितुम्।
यस्मै कस्मै न दातव्यं कवचेशं सुदुर्लभम्॥
न देयं परशिष्येभ्यः कृपणेभ्यश्च सुन्दरि।
शिष्याय भक्तिहीनाय चुम्बकाय तथैव च॥
गुरुभक्तिविहीनाय परदारपराय च।
निन्दकाय कुशीलाय दन्तिकाय च सुन्दरि॥
यो ददाति निषिद्धेभ्यः कवचं मन्मुखोद्गतम्।
देयं शिष्याय शान्ताय गुरुभक्तिपराय च॥
सर्वलक्षणयुक्ताय तत्तन्मन्त्रयुताय च॥

इत्युत्तरतन्त्रे कालीप्रस्तारे कालीभैरवसंवादे कालीकवचं समाप्तम्।

इत्यष्टादशतत्त्वम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

एकोनविंशतितत्त्वम्

अथ शान्तिः

चक्रमध्ये घटे भग्ने पात्रे च पतिते भुवि।
दीपनाशे च शान्त्यर्थं श्रीचक्रं कारयेद् बुधः ॥
क्रोधः स्याद् यदि वीराणां शक्तीनाञ्च कुलेश्वरि।
अन्येष्वपि च उत्पाते कुर्याच्छान्तिं सुसाधकः ॥

तदुक्तं मयूरपद्धतौ[७०१]–

कृत्वा मन्त्रतनुस्मरेद् गुरुपदन्देवीं कलाचिन्मयीं
पश्चात्पात्रवरं पलाशवधृतं दीपैर्युतं कज्जलैः ॥
पुष्पादिष्वभिमन्त्रितञ्च[७०२] निविडं सम्मोहकं ध्वंसकं।
ये सिञ्चन्ति पिबन्ति पान्ति खलु ते भुक्तिञ्च मुक्तिं पराम् ॥

तन्त्रान्तरे–

सिन्दूरतिलकं भाले पाणौ च मदिरासवम्।
कृत्वा पिबेद् गुरुध्यानं[७०३] तथा देवीञ्च चिन्मयीम् ॥

रुद्रयामलेऽपि–

साधकेभ्योऽथ शक्तिभ्यो दद्यान्निर्माल्यचन्दनम्।
सामयिकैः समं कुर्याद्देवि पानादिभक्षणम् ॥

अन्यत्रापि–

निवसेच्चक्रक्रमेण पङ्क्त्याकारेण वा यथा।
शक्तियुक्तो वसेद्वापि[७०४] युग्मायुग्मविधानतः[७०५]।
शिवशक्तिधिया सर्वं चक्रमध्ये समर्पयेत्[७०६] ॥

तन्त्रान्तरे–

ततः पुष्पं समादाय गुरोः पात्रे निवेदयेत्।
गुरवे च निवेद्याथ दूत्यै दत्त्वा स्वयं हरेत् ॥

भावचूडामणौ च–

साक्षाद्यदि गुरुं न स्यात्तदा तोये विनिःक्षिपेत्।

अथोत्तरतन्त्रे–

अनुज्ञां पुरतो[७०७] लब्ध्वा गृह्णामीति स्वयं वदेत्।

---

७०१ तदुक्तं उदयपद्धतौ- ख।
७०२ पुष्पादिश्चाभिमन्त्रितञ्च- ख, ग।
७०३ गुरुं ध्यायेत्- ख।
७०४ शक्तियुतो भवेद्वापि- ख।
७०५ पुष्पयुग्मविधानतः- ख, ग।
७०६ समर्चयेत्- ख, ग।
७०७ गुरुतो- ख।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
जुषस्वेत्यभ्यनुज्ञातो गुरुणा वा कुलीनकैः।
गृह्णीयाच्च स्वयंसिद्धो बद्धपद्मासनः सुधीः॥
कुलार्णवे च–
एकासने निविष्टो यो भुञ्जीत चैकभाजने।
एकपात्रे पिबेद्द्रव्यं ते यान्ति नरकाध्वनि[७०८]॥
विना मन्त्रेण या पूजा विना मांसेन तर्पणम्।
विना शक्त्या च यत्पानं तत्पानं[७०९] विफलं भवेत्॥
स्वशक्तिं वीरशक्तिं वा दीक्षितां गुरुमग्रणीम्।
पाययित्वा पिबेद्द्रव्यमिति शास्त्रस्य निर्णयः॥
न पद्भ्याञ्च स्पृशेत् पात्रं न बिन्दुं पातयेदधः।
नैकहस्तेन दातव्यं न मुद्रावर्जितं पुनः॥
नार्चयेद्[७१०] एकहस्तेन न पिबेदेकपाणिना।
अन्योन्यवदनं कृत्वा पिबेत्तदमृतं सुधीः॥
सव्येनोद्धृत्य पात्रं[७११] तु मुद्रां कृत्वापसव्यतः।
विना सङ्गेन योगेन न कुर्याद्द्रव्यसङ्गतिम्॥
साधारो[७१२] नोद्धरेत् पात्रमाधारेषु विनिक्षिपेत्।
पात्रं न चालयेत् स्थानात् न कुर्यात् पात्रसङ्करम्॥
सशब्दं न पिबेद्द्रव्यं तथैव न च पूजयेत्।
उच्छिष्टो न स्पृशेच्चक्रे कुलद्रव्याणि सुन्दरि[७१३]॥
बहिः प्रक्षाल्य च करौ[७१४] कुलद्रव्याणि दापयेत्।
निष्ठीवनमधो वायुं चक्रमध्ये विवर्जयेत्॥
स्वपात्रस्थितहेतुञ्च न दद्याद् भैरवाय च।
दत्ते च[७१५] सिद्धिहानिः स्यात् क्रुद्धा भवति योगिनी॥
परिहासं प्रलापं च वितण्डां बहुभाषणम्।
औदास्यञ्च भयं क्रोधं चक्रमध्ये विवर्जयेत्॥
नान्योन्यं ताडयेत् पात्रं न पात्रमानयेदधः।
गुरुशक्तिसुतानाञ्च गुरुज्येष्ठकनिष्ठयोः॥

---

७०८ *नरकालये- ख।*
७०९ *तत्सर्वम्- ख, ग।*
७१० *नार्पयेत्- ख, ग।*
७११ *तत्पात्रं- ख।*
७१२ *साधारं- ख।*
७१३ *सुन्दरी- ख।*
७१४ *चरणे- ख, ग।*
७१५ *वा- ख।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

उच्छिष्टं भक्षयेत् स्त्रीणां ताभ्यो नोच्छिष्टमर्पयेत्।
चक्रमध्ये च नियतं मन्मथो पतनं भवेत्॥
कनिष्ठानां स्वशिष्याणां दद्यादुच्छिष्टचर्वणम्।
दद्यात् स्नेहेन अन्येभ्यः स भवेदापदास्पदम्॥
अन्यत्रापि–
शक्त्युच्छिष्टं पिबेद्द्रव्यं वीरोच्छिष्टं तु चर्वणम्।
पीत्वा पीत्वा पुनः पीत्वा यावत्पतति भूतले॥
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते॥
ततः शान्तिस्तोत्रं पठेत्। तदुक्तं कुलचूडामणौ–
पीत्वा स्थायिजनैः[७१६] सार्द्धं शान्तिस्तोत्रं ततः पठेत्।
नश्यन्तु प्रेतकुष्माण्डो नश्यन्ति दूषकारकाः[७१७]॥
साधकानां शिवाः सन्तु आम्नाय परिपालिनाम्।
जयन्ति मातरः सर्वा जयन्ति योगिनीगणाः॥
जयन्ति सिद्धशाकिन्यो जयन्ति गुरुपङ्क्तयः।
जयन्तु[७१८] साधकाः सर्वे विशुद्धाः कौलिका नराः[७१९]॥
समयाचारसम्पन्नाः जयन्ति पूजका नराः ।
नन्दन्तु अणिमा सिद्धाः नन्दन्तु[७२०] कुलपालकाः।
इन्द्राद्या देवताः सन्तु तृप्यन्तु[७२१] वास्तुदेवताः॥
चन्द्रसूर्यादयो देवास्तुष्यन्तु मम शक्तितः[७२२]।
नक्षत्राणि ग्रहा योगाः करणवसवश्च ये॥
सर्वं[७२३] ते सुखिनो सर्पा[७२४] नरनद्यश्च पक्षिणः[७२५]।
पशवस्तुरगाश्चैव पर्वताः कन्दरागुहाः।
ऋषयो ब्राह्मणाः सर्वे कुर्वन्तु मे सदा शुभम्।
शुभा मे विदिताः[७२६] सन्तु मित्रास्तिष्ठन्तु पूजकाः॥

---

७१६ स्नायुजलैः- ख।
७१७ नश्यन्तु प्रेतकुष्माण्डा नश्यन्ति दूषका नराः–अधिकपाठः- ख, ग मातृकायाम् ।
७१८ जयन्ति- ख, ग।
७१९ कौलिकाश्च ये- ख।
७२० जयन्ति- ख।
७२१ नन्दन्तु- ख।
७२२ मम भक्तितः- ख, ग।
७२३ सर्वे- ख।
७२४ यान्तु- ख।
७२५ सर्पा नद्याश्च सर्वदा- ख।
७२६ सेविताः- ख।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ये ये पापधियः सुदूषणरता मन्निन्दकाः पूजकाः[७२७]।
सेवाचारविमर्दनष्टहृदयाः भ्रष्टाश्च ये साधकाः॥
दृष्ट्वा चक्रमपूर्वमर्चनविधौ ये कालिका दूषकाः
ते ते यान्तु विनाशमत्र समये श्रीभैरवस्याज्ञया॥
साधकानाञ्च द्वेष्टारः सदैवाम्नायदूषकाः।
डाकिनीनां मुखे यान्तु तृप्तास्तत्पिशितैः स्तुताः॥
शत्रवो नाशमायान्तु मम निन्दाकराश्च ये।
द्वेष्टारः साधकानाञ्च ते नश्यन्तु शिवाज्ञया॥

इति स्तुतिः।

देवताग्रे तु सम्भोगो देवताप्रीणनं भवेत्।
सम्भोगस्तु परं कृत्वा देवीं हृदि समानयेत्॥
कृतकृत्यो भवेन्मन्त्री नात्र कार्य विचारणा।
अभिवन्दनमाचार्य अर्घामृतं पिबेत्ततः॥
न्युब्जीकृत्य स्वाकं[७२८] पात्रं तत्र पुष्पं विनिक्षिपेत्।
प्रक्षाल्य गोपयेत् पात्रं तत्त्वचिन्तापरो भवेत्॥

ततस्तदमृतं स्निग्धं भूमौ मायाबीजं विलिख्य च कनिष्ठाङ्गुलिना
यं यं स्पृशति पादेन यं यं पश्यति चक्षुषा।
स एव देवतां याति यदि शक्रसमो भवेदिति॥ मन्त्रेण तिलकं कृत्वा स्वयं यथासुखेन[७२९] विभवेदिति[७३०]।
पात्रनिर्माणं यथा, तदुक्तं कुलसारे–

नयनाग्निबाणसंख्यात कर्षस्तु[७३१] परमेश्वरि।
हेतुपानं[७३२] प्रकर्तव्यमित्युक्तं[७३३] कुलशासने।
इतोऽप्यधिकपानं तु कर्तव्यञ्च साधकैः[७३४]॥

कर्ष लौकिकतोलमित्यर्थः। तदुक्तं कुलोड्डीशे–

गुञ्जाद्वादशमाष स्यात् तदष्टौ कर्ष उच्यते।

अथ पद्धतिः

विधिवदर्घपात्रादि संस्थाप्य तद्भैरवपात्रं संस्थाप्य हेतुना संपूर्य विधिवत् संशोध्य
ऐं क्लीं सौः ब्रह्माण्डरससम्भूतमशेषरससम्भवम्।

---

७२७ पूजने- ख।
७२८ स्वयं- ख।
७२९ यथासुखं- ख।
७३० विहरेदिति- ख।
७३१ कर्षस्तु- ख।
७३२ हेतुपात्रं- ख।
७३३ मित्येवं कुलशासने- ख।
७३४ इतोऽप्यधिकपात्रन्तु न कर्तव्यन्तु साधकैः- ख।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

आपूरितं महापात्रं पीयूषरसमावहम्[७३५] ॥

अखण्डैकरसानन्दकरेव वसुधात्मनि ।

स्वच्छन्दस्फुरणे मन्त्रनिधे ह्यकुलरूपिणि ॥

क्लीं अकुलस्थामृताकारे सिद्धिज्ञानकरे वरे ।

अमृतत्त्वं निधेह्यस्मिन् वस्तुनि क्लींस्वरूपिणि ॥

सौः तद्रूपेण करं न्यस्य कृत्वास्यैतत्स्वरूपिणि[७३६] ।

भूत्वा परामृताकारं मयि विस्फुरणङ्कुरु ॥

इति मन्त्रं पठित्वा तत्र पुष्पाणि क्षिपेत् । विधिवद्देवतां संपूज्य तत्पात्रञ्च आनन्दभैरवाय निवेद्य चक्राकारेण पङ्क्त्याकारेण वा भिन्नभिन्नासनेषु शक्तियोगपक्षे युग्मक्रमेण पद्मासनेन साधकानुपविश्य तेषां ललाटे चन्दनाक्षतं दत्त्वा शिवशक्तिबुद्ध्या पुष्पादिकं निवेद्य स्वगुरुचन्दनादिभिः सम्पूज्य तत्पात्रे अखण्डैकरसाकारपरे परतरात्मनि स्वाच्छन्दस्फुरणामन्त्रनिधे ह्यकुलनायिके ह्रीं श्रीं परमस्वामिनि परमाकाशशून्यवाहिनि चन्द्रसूर्याग्निभक्षिणि पात्रं विश विश स्वाहेति मन्त्रेण पुष्पन्दत्त्वा शुद्धिसहितं तस्मै समर्प्य प्रणमेत् । गुरोरभावे तत्पात्रं जले निःक्षिपेत् ततः शक्तिपात्रं साधकपात्राणि च ज्येष्ठानुक्रमेण वीरपात्रामृतेन सम्पूज्य[७३७] पूर्वोक्तक्रमेणैकैकं पुष्पं दत्त्वा तेषामग्रे आधारेषु संस्थाप्य भक्त्या हस्ताभ्यां सङ्गृहीत्वा[७३८] तदुपरि मूलमन्त्रमष्टधा प्रजप्यानन्दभैरवानन्दभैरव्यौ गुरुं देवतां च सन्तर्प्य स्वस्वकल्पोक्तविधिना तत्त्वशुद्धिं विधाय श्रीमद्भैरवशेखरेत्यादिनाभिवन्द्य वामहस्तेन पात्रमुत्तोल्य परस्परं वन्दनं कृत्वा गृह्णामीति शक्तिसाधकेभ्योऽप्याज्ञां गृहीत्वा तैश्च जुषस्वेत्यभ्यनुज्ञातो मूलाधारात् कुण्डलिनीमिष्टदेवतास्वरूपतामाजिह्वान्तं विभाव्य गुरुपादुकां स्मृत्वा शिवोऽहमिति विचिन्त्य हस्ताभ्यां पात्रं धृत्वा मूलमन्त्रमुच्चरन् कुण्डलिनीमुखेन देवतां तर्पयेदिति । ततोऽप्याकाङ्क्षा चेत्तदा पात्रमाधारोपरि पूर्ववत् संस्थाप्य हैममीनरसावहमित्यादिनाभिमन्त्र्य पूर्ववत् स्वीकृत्य पुनरप्याकाङ्क्षायां सत्यां मद्यमीनरसावहमित्यादिभिरभिमन्त्र्य यावत्वृत्तिं[७३९] निष्पाद्य स्वयमपि तथा विधाय शान्तिस्त्रोत्रं तैः सह पठित्वा तत्रैव देवताग्रे शक्तियोगपक्षे परानन्दं विधाय द्रव्यस्निग्धविधौ भूमौ मायाबीजं विलिख्य यमिति मन्त्रेण कनिष्ठाङ्गुलिना तिलकं कृत्वा हृदि देवीं समावाह्य शक्तिसाधकेभ्यो यथासम्भवं पुष्पादिकं निवेद्य प्राणायामषडङ्गन्यासौ विधाय यथासुखं विहरेदिति ।

इति श्रीमद्राघवभट्टविरचिते कालीतत्त्वे शान्तिविधौ ऊनविंशतत्त्वम् ।

---

७३५ *आवह- ख ।*
७३६ *ह्यैतत्स्वरूपिणी- ख ।*
७३७ *सम्पूर्य- ख ।*
७३८ *तैरपि गृहित्वा- ख ।*
७३९ *तृप्तिं निष्पाद्य- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ मन्त्रविधिरुच्यते

तदुक्तं कालिकाश्रुतौ। अथ सर्वां विद्यां प्रथममेकं द्वयं त्रयं वा नामसम्पुटितं कृत्वा जपेद् गतिस्तस्यास्तीति नान्येभ्यो इति ह्यों सत्यं तत्सत्। अथ गुरुं परितोष्य गृह्णीयान्मन्त्रराजं गुरुस्त्वयि[७४०] शिष्याय सत्कुलीनाय विद्याभक्ताय सश्रूषवे सस्त्रियं स्पृष्ट्वा स्वयं परिपूज्य[७४१] निशायां निन्हेव एकाकी शिवगेहे लक्षं तदर्धं वा जप्त्वा देयम् ॐ सत्यं तत्सत्। नान्यप्रकारेण सिद्धिर्भवतीहैव कालिकामनोर्वातारामनोर्वेर्तित्रिपुरामनोर्वा सर्वदुर्गामनोर्वादित्यों शिवों तत्सत् इति।

कालीतन्त्रे च–

कालीहृदयविद्याञ्च सिद्धिविद्यां महोदयाम्।
पुरा येन यथा सिद्धिमवापुस्त्रिदिवौकसः॥
कामाक्षरवह्निसंस्थमिन्दिरानादबिन्दुभिः।
मन्त्रराजमिदं ख्यातं दुर्लभं पापचेतसाम्॥
सुकृतं सुलभं भक्त्या साधकानां महात्मनाम्।
त्रिगुणा तु विशेषेण सर्वशास्त्रस्य बोधिका[७४२]॥
अनया सदृशी विद्या नहि सारस्वतप्रदा।
ध्यानपूजादिकं सर्वं साधनञ्च पुरस्क्रिया।
अनिरुद्धसरस्वत्याः समानं सर्वमीरितम्॥

कूलचूडामणावपि–

ब्रह्मासरस्वतीयुक्तो देवतामुखसंस्थितः।
बीजशक्तिसमायुक्तः कालीमन्त्र उदाहृतः॥
एकं वा द्विगुणं वापि त्रिगुणं वापि भैरव।
जप्त्वा चाकर्षयत् स्वैरं स्थावरं जङ्गमादिकम्॥
एषा विद्या महाविद्या गुह्याद् गुह्यतरा स्मृता।
पूर्वबीजं पराशक्ति बीजेन मूर्तिकल्पना॥
षड्दीर्घभाजा बीजेन कुर्यादङ्गादिकल्पनम्।
ध्यायेत् करालास्यद्रंष्ट्रां नीलोत्पलविलोचनाम्॥
स्फुरच्छवकरश्रेणीकृतकाञ्चीदिगम्बराम्।
वीरासनसमासीनां महाकालोपरिस्थिताम्॥
श्रुतिमूलसमाकीर्णासृक्कणीं चण्डनादिनीम्।
मुण्डमालागलद्रक्तचर्चितां पीवरस्तनीम्॥
मदिरामोदितस्फालकल्पिताखिलमेदिनीम्।

---

७४० तमपि- ग।
७४१ परिपूज्य- ख।
७४२ सर्वशास्त्रप्रबोधिका- ख, ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
वामे खड्गखण्डमुण्डधारिणी दक्षिणे करे ॥
वराभययुतां घोरवदनां लोलजिह्विकाम् ।
शकुन्तपक्षसंसक्तबाणकर्षविभूषणाम् ॥
शिवाभिर्घोरशवाभिः सेवितां प्रणयोदिताम्[७४३] ।
चण्डहासं चण्डनादं चण्डपालैश्च भैरव[७४४] ॥
गृहीत्वा नवकंकालं जयशब्दपरायणैः ।
सेविताखिलसिद्धौघमुनिभिः सेवितां पराम् ॥
एवं तां कालिकां ध्यात्वा पूजयेत् कुलनायकः ।
यां विना परपुरावेण विवरान्तः प्रसर्पणम् ॥
यत्किञ्चित्कुलसिद्धिस्तु जायते न मनागपि ।
सर्वसिद्धिप्रदा देवी हेलयापि हि चिन्तिता ॥
अतः सा दक्षिणानाम्नी त्रिषु लोकेषु गीयते ।
विद्यारम्भं प्रवक्ष्यामि श्रुत्वा कर्णावतंसयाम् ॥
मायाद्वयं कूर्चयुग्मं मैधन्तमादनत्रयम् ।
मायाविद् वीरसंयुक्तं दक्षिणे कालिके पदम् ॥
संहारक्रमयोगेन वीरसप्तकमुद्धरेत् ।
एकविंशाक्षरो मन्त्रस्ताराद्यो विश्वपूजितः ॥
आकाशं वामकर्णेषु नयुतं बिन्दुभूषितम् ।
चतुर्थ बीजमाख्यातं त्रैलोक्यवशकारणम् ॥
स्वाहान्तश्च त्रयोविंशाक्षरोऽयं मन्त्रराजकः ।
स्वाहा विनैकविंशत्यक्षरः कामदो मतः ॥
विंशत्यर्णा महाविद्या स्वाहा प्रणववर्जिता ।
ध्यानपूजादिकं सर्व दक्षिणावदुपाचरेत् ॥
अथ वक्ष्ये महाविद्यां सिद्धविद्यां महोदयाम् ।
ईश्वरेण पुरा प्रोक्तां देवीं हृदयसंज्ञिकाम् ॥
यस्य ज्ञानप्रभावेण कलयामि[७४५] जगत्त्रयम् ।
प्रणवं पूर्वमुच्चार्य हृल्लेखाबीजमुच्चरेत्[७४६] ॥
रतिबीजं समृद्धृत्य प्रपञ्चमभगान्वितः ।
ठद्वयेन समायुक्ता विद्यावर्गैः प्रकीर्तिताः ॥
अनया सदृशी विद्या कालीतन्त्रेषु दुर्लभा ।

---

७४३ *प्रलयोदिताम्- ख ।*
७४४ *चण्डोस्फालैश्च भैरवैः- ख, ग ।*
७४५ *कल्पयामि- ख ।*
७४६ *उच्चरन्- ख, ग ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
भैरवस्य ऋषिः प्रोक्तो विराट् छन्द उदाहृतम् ॥
सिद्धिकाली ब्रह्मरूपा देवता भुवनेश्वरी ।
रतिबीजं बीजमस्याहृल्लेखाशक्तिरुच्यते ॥
हृल्लेखां षड्दीर्घकेण प्रणवाद्येन कल्पयेत् ।
अङ्गं षट्कं ततो न्यस्य ध्यात्वा देवीं शिवो भवेत् ॥
खड्गोद्भिन्नेन्दुचिंवक्षरदमृतरसाप्लाविताङ्गीं त्रिनेत्रां[७४७] ।
सव्ये पाणौ कपालाकुलमृतमथो[७४८] मुक्तकेशीं पिबन्तीम् ॥
दिग्वस्त्रां बद्धकाञ्चीमणिमयमुकुटाद्यैर्युतादीप्तजिह्वां ।
पायान्नीलोत्पलाभारविशशिविलसत्कुण्डलालीढपादा ॥
जपेद्विंशतिसाहस्रं सहस्रकेणसंयुतम् ।
होमयेत्तु दशांशेन मृदुपुष्पेणमन्त्रवित् ॥
त्रिकोणकुण्डसामान्यसिद्धिविद्यः शिवो भवेत् ।
पूजनञ्च प्रयोगश्च दक्षिणावदुपाचरेत् ।
एकाक्षय्यमिहाकल्य[७४९] समानं सर्वमेव वा ॥
स्वतन्त्रेऽपि–
श्मशानकालिकां मन्त्रं श्रृणुष्वावहिता शिवे[७५०] ।
वाणीं मायान्ततो लक्ष्मीं कामबीजन्ततः पराम् ॥
कालिके संपुटत्वे[७५१] चतुर्थ बीजमालिखेत् ।
एकादशार्णदेवेशि चतुर्वर्गप्रदायिनि ॥
ऋषिर्भृगुत्रिवृच्छन्दो देवता कालिका स्मृता ।
श्मशानाद्या च वाङ्मये बीजशक्तिमहेश्वरी[७५२] ॥
कीलकं कामबीजन्तु श्रृणुपूजाविधिप्रिये ।
चतुस्त्रिश्चतुर्वर्णैस्तु[७५३] विद्यामन्त्रैः षडङ्गकम् ॥
विन्यस्य ध्यानं कुर्वीत कालिकायाः समाहितः ।
अञ्जनाद्रिनिभां देवीं श्मशानतलवासिनीम् ॥
त्रिनेत्रां मुक्तकेशीञ्च शुष्कमांसातिभीषणाम् ।
पिङ्गाक्षीं वामहस्तेन मद्यपूर्णकपालकाम् ॥

---

७४७ *खड्गोद्भिन्नेन्दुवीक्षरदमृतरसाप्लाविताङ्गीं त्रिनेत्रां- ख, ग।*
७४८ *कपालाजलदसृतमथो- ख, ग।*
७४९ *एकाक्षयमिहाकल्प- ख, ग।*
७५० *प्रिये- ख, ग।*
७५१ *कालिके सम्पुटे नेत्र- ख, ग।*
७५२ *महेश्वरि- ख, ग।*
७५३ *चतुस्त्रिश्चतुर्वर्णैस्तु- ख, ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सद्यः कृत्यशिरो दक्षहस्तेन दधतीं शिवाम्।
स्मितवक्त्रां सदावासमांसचर्वणतत्पराम्॥
नानालङ्कारभूषाङ्गीं नग्नां मत्रां सदाशिवाम्।
एवं ध्यात्वा यजेद्देवीं श्मशाने तु विशेषतः॥
गृहे वापि गृहस्थश्च मत्स्यमांसैः सुभोजनैः।
नग्नो भूत्वा महापूजां कुर्याद्रात्रौ सदाहितः॥
पद्मं चाष्टदलं वृत्तं तद्बाह्ये धरणीतलम्।
चतुर्द्वारसमायुक्तं[७५४] साध्यमूलं समालिखेत्॥
दलेष्वष्टषु विलिखेत् कवर्गाद्यष्टवर्गकम्।
धरण्यां विलिखेदाद्यं चतुष्कञ्च चतुष्ककम्॥
पूर्वादि उत्तरायाञ्च मध्ये देवीं प्रपूजयेत्।
ब्राह्म्याद्या योजयेन्मातृः पूजयेन्मातृदलेषु पूर्वत॥
भैरवानसिताङ्गाद्यान् धरण्यां पूजयेत् प्रिये।
असिताङ्गं रुरुं चण्डं क्रोधमुन्मत्तभैरवम्॥
कपालीभीषणञ्चैव संहारं चाष्टमं यजेत्।
चतुर्लक्षं जपेन्मन्त्रं तद्दशांशेन होमयेत्॥
अथ मन्त्रान्तरम्–
कामबीजं समालिख्य कालिकायै पदं वदेत्।
नमोन्तेन च देवेशि सप्तार्णो मन्त्र उत्तमः॥
सर्वाङ्गं कालिकादेवी अन्यत् सर्वं तु पूर्ववत्।
श्रीगुरोः कृपया लब्धा सर्वसिद्धिमवाप्नुयात्॥
अथ पञ्चदशी तदुक्तन्तत्रैव–
कामबीजत्रयन्दत्त्वा कूर्चयुग्मं तथा लिखेत्।
लज्जायुग्मं समाभाष्यं संबोधनद्वयन्ततः॥
पश्चाद्वह्निप्रिया योज्या विद्या पञ्चदशाक्षरी।
पूजनञ्च प्रयोगश्च दक्षिणावदुपाचरेत्॥
अन्यत्रापि–
वर्गाद्यं वह्नियुक्तं विधुरतिवलितं तत्र यं कूर्च्चयुग्मं।
लज्जायुग्मञ्च पश्चात् स्मितमुखितदधः ठद्वयं योजयित्वा॥
मातर्ये ये जपन्ति स्मरहरसहित[७५५] भावयन्तः स्वरूपम्।
तल्लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवन्ति॥

---

७५४ चतुर्द्वारि साध्य- ख, ग।
७५५ महिले- ख, ग।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

अनया सदृशी विद्या न भूतो[७५६] न भविष्यति।
CC-0.In Public Domain. Digitization by eGangotri
यामासाद्य शिवो ब्रह्माशिवत्वाद्युपेयुषः ॥ इति।
कुलोड्डीशतन्त्रोक्तशापस्तु द्वाविंशत्यक्षरी परा ज्ञेया । अन्यत्र प्रमाणाभासात्[७५७]
तदुक्तं सिद्धविद्याप्रदीपे–
द्वाविंशत्यक्षरा विद्या क्षिप्रं सिद्धिप्रदा यतः ॥
तेन विद्धा महेशेन संवादहररामयोः।
महाविद्यापुटीकारः प्रबोधाय यः प्रकल्पयेत्।
एवं गुरुप्रसादेन सिद्धिर्भवति भैरवि ॥

इति श्रीमद्राघवभट्टविरचिते कालीतत्त्वे मन्त्रभेदकथनं विंशतितत्त्वम्।

७५६ *भूता- ख, ग।*
७५७ *अन्यत्र प्रमाणाभावात्- ख।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

एकविंशतितत्त्वम्

अथ विद्यामाहात्म्यम्

एवं समस्तविद्यानां राज्ञीं स्तोतुं न शक्यते।
वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि॥
सर्वसिद्धिप्रदा देवी अनिरुद्धसरस्वती।
तस्मादस्या ज्ञानमात्रात् सिद्धयः सम्भवन्ति हि॥
अनिरुद्धसरस्वत्या ज्ञानमात्रेण साधकः।
पाण्डित्ये च कवित्वे च वागीशसमतां व्रजेत्॥
भैरव उवाच
चतुर्थाश्रमिणान्देवि मोक्षदा त्वं सदा कथम्।
कुलभावविरोधित्वात् संशयं मम दूरय॥
देव्युवाच
मोक्षद्वारञ्च[७५८] बहुधा यद्यस्ति कुलभैरव।
केवलं कुलयोगेन प्रसीदामि न संशयः॥
चतुर्थाश्रमिणान्देव अवधूताश्रमो महान्।
अत्राहं कुलयोगेन प्रसन्ना मोक्षदायिनी॥
यदि तस्य तथा वत्स श्रृणु तत् कथयामि ते।
ज्ञानाभावे समुत्पन्ने सम्प्राप्य च तदाज्ञया॥
तदा योगी विमुक्तः स्यात् तां प्रपूज्य कुलाङ्गनाम्।
कुण्डलीशक्तिविवरे तदा योगं समभ्यसेत्॥
निर्द्वन्द्वो निरहङ्कारः शुद्धनाडीगणो व्रती।
शुद्धासनः[७५९] समासीनः खगसंयमने[७६०] रतः॥
मेरुदण्डबहिःपार्श्वे चन्द्रसूर्यात्मके शिवे।
मध्ये सुषुम्ना संदिष्टा तन्मध्ये चित्ररूपिणी॥
तयैव ग्रथितं पद्मं मूलादिपद्मपञ्चकम्[७६१]।
कुण्डल्याकाररूपेण शाकिन्याद्युपलक्षणम्[७६२]॥
मूलाधारं समासाद्य स्थिता नागस्वरूपिणी।
वायुना भिद्यते कुक्षिःक्षिद्रं[७६३] विद्रापयेत् ततः॥
उच्छ्वासाज्ज्वलकामस्य शिखातीव्रसमुज्ज्वला।

७५८ *मोक्षद्वारस्तु- ख।*
७५९ *मृद्वासनसमासीनः- ग।*
७६० *नाडीसंयमने- ख।*
७६१ *मूलादिपञ्चपद्मकम्-ख, ग।*
७६२ *डाकिन्याद्युपलक्षितम्-ख, ग।*
७६३ *वक्त्रं दृष्टं- ग।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्रतिचक्रं प्रबुद्धासौ जीवात्मानं परे कुले ॥
नियोजयति तद्योगादमृतं क्षरते चिरात्[७६४] ।
व्योमप्रोद्भिद्यमानौ[७६५] तौ गतौ चन्द्रदिवाकरौ ॥
अधोवक्त्रं महापद्मं क्रोडीकृत्य सुषुम्नया ।
व्यावृत्य नासिकामध्ये गताचित्रातरङ्गता[७६६] ॥
ऊर्ध्वं भित्वा तु लिङ्गं वै दृढं तत्पुष्करात्[७६७] ततः ।
बहिरुद्गमनाकाङ्क्षा कारिणी मोक्षदायिनी ॥
जीवेनादृष्टसम्बद्धा स्थिता परमसन्निधौ[७६८] ।
एतद् भेदन्तु विद्वांसो भित्वा याति परां पदम् ॥
अदृष्टधातुजीवोऽसौ बहिर्याति दिने दिने ।
दिनेष्वङ्गुलिमानेन तदर्धञ्चोपवासतः ॥
द्विगुणं रतिकालेऽस्या त्रिगुणं भोजनाद्बहिः ।
अत ऊर्ध्वं हरेद् एवं त्रिगुणं यदि दैवतः ॥
न्यूनं वा तदधः प्राणः यः शरीरं विमुञ्चति ॥
शरीरं समतां नीत्वा न्यूनं वा वटुकेश्वरः ।
कुम्भयित्वा अधोवायुं कुण्डलीमुखवर्त्मनि ॥
योजयित्वा ततो जीवं नीत्वा नासावसानकम् ।
गमागमं कारियत्वा सिद्धो भवति नापरः ॥
पीयते खाद्यते यत्तत् सर्वं कुण्डलिनीमुखे ।
दत्त्वा सिद्धिमवाप्नोति न च बन्धेन बाध्यते ॥
भिक्षा कार्या च न स्वार्थं कुण्डलिन्याः कृते पुनः ।
रे मातर्देहि मे भिक्षां कुण्डलीं तर्पयाम्यहम् ॥
अवधूताश्रमे स्थित्वा भैरवानन्दतत्परः ।
भैरवोऽहं न चान्योऽस्मि न देवो मत्परः क्वचित् ॥
तन्त्रमन्त्राञ्जनं सर्वं मयि जातं न वान्यथा ।
शिवोऽहं भैरवानन्दो मन्त्रोऽयं कुलनायकः ॥
रक्तचन्दनदिग्धाङ्गो रक्तकौपीनभूषितः ।
रक्तमाल्याम्बरधरो हेतुयुक्तः सदा भवेत् ॥
एवं भैक्षं व्रजन् भिक्षुर्भैरवाचारतत्परः ।

---

७६४ *चिरात् ग ।*
७६५ *व्योप्रोद्भिन्नमानान्तरर्गतौ-ख ।*
७६६ *गतिं चित्रां तरङ्गता-ख, ग ।*
७६७ *पुष्करं ततः-ख, ग ।*
७६८ *याः प्राणसन्निधौ- ख ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

क्षीयते न च पापेन बध्यते न च जन्तुना ॥
यत्र देशे त्वयं याति सदेशः क्षितिनायकः ।
यत्र निन्दापरो यत्तु नश्यन्ति तत्क्षणादपि ॥
तस्माद्यत्नात् पूजितव्या न तिरस्कार्य एव हि ।
यत्रेच्छा विद्यते तस्य तत्कार्य प्रियमप्रियम् ॥
तथात्य देवदेवेश विना विचारविस्तरम् ।
पूजयन्ति महादेवीं कुलाङ्गदृष्टिमात्रतः ॥
पुष्पं गन्धञ्च ताम्बूलं नैवेद्यं तत्र यद्भवेत् ।
मनसा तत्समभ्यर्च्य बाह्यतोऽमृतधारिणा[७६९] ॥
आत्मनि तत्समायोज्य देवीरूपं कुलेश्वरः ।
न पूजनं नापि न्यासं न मिष्ठान्नव्रतादिकम् ॥
पूर्णोऽहं भैरवात्माहं नित्यानन्दोऽहमव्ययः ।
निरञ्जनस्वरूपोऽहं निराकारत्वहं प्रभुः ॥
सर्वशास्त्राभियुक्तोऽहं सर्वमन्त्रार्थपारगः[७७०] ।
नास्मत् परतरो देवो क्षिप्रं विद्या प्रसीदति ।
मूलभूता तु या शक्ति भुजगाकाररूपिणी ॥
तद्भूमिवृत्तपातायं प्राण इत्युच्यते बुधैः ।
ध्वनिनाव्यक्तमधुरं गर्जन्ति सततोषिताः ॥
गच्छन्ति ब्रह्मरन्ध्रेण प्रविशन्ति स्वके स्थले ।
यातायातक्रमेणैव तत्र कुर्यान्मनोलयम् ॥
तेन मन्त्रशिखा ज्ञाता तत्र सिद्धिः प्रदायिका ।
तमः पूर्णगृहे यद्वन्न किञ्चित् प्रतिभासते ॥
शिखाहीनास्तथा मन्त्रा न सिद्ध्यन्ति कदाचन ।
शिखोपदेशः सर्वत्र गोपितः परमेश्वरि ॥
विना येन न सिद्धिः स्याद्वर्षकोटिशतैरपि ।
तस्मात् त्वयि गिरिजे गोपनीयं प्रयत्नतः ॥
इति नात्र सिद्धाद्यपेक्षा नारिसिद्ध्यादिदूषणम् ।
सर्व एव शुभकालो नाशुभो विद्यते क्वचिद् ॥

तत्र आदिशब्देन स्वप्ननिद्रायितादिदोषाभावो ग्राह्यः । अत एव निशाचरेत्यादिकमन्त्रापास्तमिति ।
कुलपथिकुलतन्त्रे गुप्तभावैकभाजो गुरुभजनपरेण श्रीमता राघवेण ।
विविधविधिगरिष्ठं पुस्तकं सादरं[७७१] यत् प्रकटकुलमकारी प्रीतये कौलिकानामिति ॥

---

७६९ *कूलवारिणा- ख, ग ।*
७७० *सर्वमन्त्र उपासकः- ग ।*
७७१ *संशोधित पाठ ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
कल्मषध्वान्तविध्वंसि वन्दे धामेन्दुशेखरम्।
समीहितासनज्योतिरक्षराद्यं त्रिमूर्तिवत्॥
प्रध्वस्तपर्वतश्रेणि प्रध्वस्तावधिनी विधिः।
इति श्रीराघवभट्टविरचिते कालीतत्त्वे रहस्यादिप्रतिपादनविधौ एकविंशतितमं तत्त्वम्। शुभम्।
षष्ठ्योगजसम्मिते सुरगुरोर्घस्रेऽसिते पक्षके
कालीतत्त्वमलेखयद् द्विजवरः श्रीचक्रराजः सुधी॥
मासे कार्तिकके मनोहररसे[७७२] देवेन संयत्नतः।
पञ्चम्यां शुभयोगमिश्रितभरण्यां तारकायां मुदा॥

इति शुभम्॥

७७२ संशोधित पाठ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

परिशिष्ट खण्ड

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

B.११५/6

श्रीराष्ट्रिय अभिलेखालय
नेपाल

NATONAL ARCHIVES
NEPAL

विषय: शैवतन्त्र — Subject:
पुस्तक नाम: कालीतत्त्व — Mansccript-Name:
ल. सं. पं ४८०१ — C. No.
वि. सं. १७८ — S. No.
पत्र सं: ७८ — Folio. No.
आकार ३३ १/२ × १३ से.मि. — Size.


कालीतत्व.
१ ॐश्रीगुरुमूर्त्तिर्जयति॥उन्मीलन्नवनीरजालिविगलन्माध्वीकलुब्धातुरभ्राम्यन्मञ्जुलमत्तषट्पदघटाव्यस्ताःसमस्ताइव॥
शम्भोराननपङ्कजेषुपरितोयागुम्फतस्तास्तरांनिःशेषंममदुष्कृतानिगिरिजेहन्युःकटाक्ष्योर्मयः॥विचार्य्यसर्वतन्त्राणिकुलना॰
थगरोःसह॥साधकानाञ्चपश्यानांगुरूणाञ्चतथात्मनाम्॥उपनिषत्तथास्तोत्रंनिबन्धानपिभूयशः॥श्रीमद्राघवभट्टेनका॰
लीतत्त्वंवितन्यते॥प्रातःकृत्यंभवेदादौस्नानंद्वितीयकेमतम्॥सन्ध्यातृतीयतत्त्वेवैतुरीयेतर्पणंतथा॥पूजाचपञ्चमेज्ञेयाशुद्धि
द्रव्यस्यषष्ठके॥सप्तमेकुलसम्पत्तिःपुरश्चर्याष्टमेतथा॥नैमित्यंनवमेज्ञेयंदेवताप्रीतिकारकम्॥दशमेकाम्यकर्माणिआ
चारोदशमान्तिके॥द्वादशेस्थानपुष्पादित्रयोदशेवलेर्विधिः॥चतुर्दशेप्रायश्चित्तंभावःपञ्चदशेतथा॥षोडशेतुकुमारीणां
पूजाविधिरुदाहृतः॥सप्तदशेतुमालोक्तोष्टादशेस्तुवशंकथा॥ऊनविंशतमेशान्तिर्विंशत्तमेतुमन्त्रकाः॥ततःपरंरहस्यादिःस्या
दितिक्रमपद्धतिः॥तत्रगुरुध्यानंयथा॥उत्थायोपविश्यवद्धपद्मासनःस्वशिरसिश्वेतसहस्रदलकर्णिकायाम्॥ध्यायेत्सु
धांशुसंकाशंशरच्चन्द्रनिभाननम्॥प्रफुल्लेन्दीवराकारंनेत्रद्वयविराजितम्॥शुक्लाम्बरधरंशुक्लंश्वेतगन्धानुलेपनम्॥वि १

भूषितंश्वेतमाल्यंवराभयकरद्वयम्॥वामाङ्कगतयास्वशक्त्यारक्तोत्पलधारिण्यासहितम्॥ज्ञानानन्दमुदितमानसंमा
नसैरुपचारैरभ्यर्च्य॥अज्ञानतिमिरान्धस्यज्ञानाञ्जनशलाकया॥चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेनमः॥इतितत्वाज्ञा
नमयींकुलकुण्डलिनींविभाव्यशिरस्थंगुरुंकुलंध्यायेत्॥तदुक्तंकुलचूडामणौ॥मूलादिब्रह्मरन्ध्रान्तंकृत्वंध्यात्वागुरू
न्स्मरेत्॥प्रह्लादानन्दनाथञ्चसकलानन्दमेवच॥कुमारानन्दनाथञ्चवशिष्ठानन्दनाथकम्॥क्रोधानन्दसुखानन्दौध्या
नानन्दनतःपरम्॥बोधानन्दशुकानन्दौध्यायेच्चैवकुलोपरि॥महारसरसाज्झोलहृदयापूर्णलोचनान्॥कुलालिङ्गन
संभिन्नवर्णितान्शेषनामसान्॥कुलशिष्यैःपरिवृतान्पूर्णपात्रःकरान्॥धनान्॥वराभययुतान्सर्वान्कुलतन्त्रार्थवेदिनः
॥एवंकुलगुरुंनत्वाविमृष्यकुलमातृकाम्॥कुलस्थानंसमानीयस्नानार्थंतीर्थमाश्रयेत्॥स्वाक्षंगुरुकुलंवन्दस्मर्तुःकु॰
लसुखावहम्॥रहस्यमद्भुतंप्रोक्तंगोप्तव्यंपशुसङ्कटे॥इदन्तुगुरुध्यानादिकमावश्यकतनम्॥अन्यथानिष्ठश्रवशात्॥न
दुःक्तंतन्नैव॥गुरुकुलंपरित्यज्ययेसाक्षात्परसेविनः॥तेषांदीक्षाचयागश्चअभिचारायकल्पयेत्॥तस्मात्सर्वप्रयत्ने

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतन्त्र. तत्कुलीनानगुरून् मातृश्रयेत् ॥ तत स्तत्र कमलस्थामृतलोलीभूतं कुलं मूलाधारमानयेत् ॥ तदुक्तं श्रुतौ ॥ प्रकाशमानां प्रथमे प्रया
२ णे प्रतिप्रयाणेऽप्यमृतायमानाम् ॥ अन्तःपदव्यामनिशं चरन्तीमानन्दरूपामबलां प्रपद्ये ॥ उपनिषदि च ॥ मूलाधारे समारो
ढ्य त्रिकोणान्ते जसां निधिम् ॥ तत्पार्श्वे रेखामानीय अधऊर्ध्वं व्यवस्थितम् ॥ नीलतोयदमध्यस्थ तडिल्लेखेव भास्वराम् ॥
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमाम् ॥ तस्याः शिखायां मध्ये स्थे परमात्मा व्यवस्थितः ॥ अस्यायमर्थः ॥ मूलाधारत्रि
कोणान्तर्गताधोमुखशिवलिङ्गवेष्टनीं सोऽहंत्रयवलयेन सुप्तां कुण्डलिनीं त्रिकोणाग्निना शिवचर्यास चेतनां कृत्वा सुषुम्ना
वर्त्मना ब्रह्मरन्ध्रे नीत्वा तत्र सहस्रदलकमलस्थायिना सदाशिवेन सङ्गमय्य तस्याप्रभामध्ये कुलगुरुं ध्यात्वा तत्राज्ञां
गृहीत्वा मूलाधारपद्मस्थं त्रिकोणान्तर्गताधोमुखस्वयम्भुलिङ्गवेष्टनीं सुप्तभुजगाकारसार्द्धत्रिवलयगेन्द्रवलयां तडि
त्कोटिप्रभां नीवारशूकवत्तन्वीं कुलकुण्डलिनीं कूर्चबीजेन त्रिकोणाग्निना चेतनां विधाय ब्रह्मपथेन द्वादशान्तं नीत्वा तत
स्थापरमशिवे संयोज्य कुलगुरुं ध्यायेदिति ॥ गुरुध्यानं तु तदुपरिस्थप्रसङ्गात् ॥ अतस्त्व चूडामणावपि ॥ कुलोपरित्यादि २

सङ्कृतइति ॥ यद्वा कुलोपरि सहस्रदलकमलोपरीत्यर्थः ॥ ततः अहं देवी न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक् ॥ सच्चिदानन्द
रूपोऽहमात्मानमपि चिन्तयेत् ॥ प्रातः कृत्यमवश्यमेव कार्यं कुलार्णवेऽन्यथा निन्दाश्रवणात् ॥ अतस्त्वयामलेऽप्युक्तम् ॥ प्रा
तःकृत्यमकृत्वा तु यो देवीं शक्तितोऽर्चयेत् ॥ तस्य तस्याद्विफलं पूजा शौचहीना यथा क्रिया ॥ इति ॥ अथ प्रयोगः ॥ ब्राह्मे मुहूर्ते उ
त्थाय वज्रासनः ब्रह्मरन्ध्रस्थ सहस्रदलकमलकर्णिकान्तर्गतचन्द्रमण्डलस्थं निजगुरुं श्वेतवर्णमित्यादिना ध्यात्वा
मानसैरुपचारैः सम्पूज्य ॥ अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ॥ चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ इति नत्वा
गुरुध्यानं त्वा तदाज्ञां गृहीत्वा मूलाधारस्थ त्रिकोणान्तर्गताधोमुखशिवलिङ्गवेष्टनीं प्रसुप्तभुजगाकारां शङ्खावृत्ताकारेणार्द्ध
त्रिवलयां तडित्कोटिप्रभां नीवारशूकवद्दीप्यमानां मूलविद्याप्रकृतिस्वरूपां कूर्चबीजेन त्रिकोणाग्निना सचेतनां कृत्वा सुषु
म्णावर्त्मना ब्रह्मरन्ध्रस्थसहस्रदलकमलस्थेन परमसदाशिवेन संयोज्य तत्रैव तत्प्रभाया कुलगुरुं ध्यात्वा नमस्कुर्यात् ॥
कुलसम्रसोल्लोलहृदयापूर्णलोचनान् ॥ कुलालिङ्गनसम्भिन्नवर्णान्निःशेषतामसान् ॥ कुलशिष्यैः परिवृतान् पूर्णानन्दक

कालीतन्त्र. रुणोघन ॥ वराभययुतान्सर्वान् कुलतत्वार्थवेदिनः ॥ इति विभाव्य ॥ ॥ प्रह्लादानन्दनाथाय नमः ॥ सकलानन्दनाथाय न
३ मः ॥ वशिष्ठानन्दनाथाय नमः ॥ क्रोधानन्दनाथाय नमः ॥ बोधानन्दनाथाय नमः ॥ शुकानन्दनाथाय नमः ॥ इति नत्वा त
त्कमलस्थामृतेन लोलीभूतां कुण्डलिनीं पुनस्तेनैव पथा मूलाधारमानीय देवीरूपोऽहं ब्रह्मैवाहं नित्यात्मानं विभावयन् नी
र्थमाश्रयेत् ॥ ॥ इति श्रीराघवभट्टविरचिते कालीतन्त्रे प्रातःकृत्यं नाम प्रथमतन्त्रम् ॥ १ ॥ अथ नद्यादौ मूलेन मृत्तिक
याङ्गं विलिप्य देवीरूपं सर्वं विभावयन् कुशान् गृहीत्वा मलापकर्षणं स्नात्वा तान्त्रिकस्नानं कुर्यात् ॥ तदुक्तं कुलचूडा
मणौ ॥ कृष्णारक्तहरिनीलाविविधाम्बरसूत्रयः ॥ नेत्रयः कुलगः शिष्यसनद्रूपंपराभृगन् ॥ दिनं सर्वमथो नीष्टयपाता
लं भृतसम्भवम् ॥ आचान्तः कुलद्रव्यैर्गात्रसदर्भं कुशसूत्रकः ॥ कुलपात्रे च तत्सर्वं सतिलं सलिलं ततः ॥ गृहीत्वा कुलदेवस्य
प्रीतये स्नानमाचरेत् ॥ कृत्वा सङ्कल्पमस्त्वादौ कुलचक्रं जलेऽन्यसेत् ॥ कुलस्थानात्समानीय कुलमुद्रयाङ्कुलो सच ॥ कुलती
र्थादितत्रैव समवाहय शिवात्मकम् ॥ तत्तोय च त्रिधापी त्वा त्रिधा प्रक्षालनं ततो ॥ तीर्थावाहनमन्त्रः ॥ यथा श्रीक्रमसंहिता ३

याम् ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥ कुलतन्त्रेऽप्याह ॥ मूलाङ्कुशेनापि संगृह्य
गत्वा जलाञ्जिकं ततः ॥ मलापकर्षणं स्नानं मन्त्रस्नानमथाचरेत् ॥ विंशत्या त्रिशिरापठेवमाचमेत्साधकोत्तमः ॥ अथ वर्णात
त्रेप्युक्तम् ॥ मूलं पठन्मूर्द्धितोयं मुद्रया कुम्भसंज्ञया ॥ सिञ्चावारत्रयं देवी आचमेत्साधकोत्तमः ॥ आत्मविद्याशिवैस्तत्वै
ततो यागगृहं विशेत् ॥ अतस्त्व कुमारीतन्त्रे ॥ आत्मविद्याशिवस्तत्वैराचमेत्साधकाग्रणीः ॥ सप्तच्छिद्राणि संरुद्ध ततो मज्जे
त्रिधा सुधीः ॥ वह्निजयान्तदेवं त्रत्रशुद्धेन पाथसा प्रिये ॥ अथ प्रयोगः ॥ देवरूपमात्मानं विभावयन् तीर्थान्तिके गत्वा मूलेन मृ
त्तिकयाङ्गं विलेपनं विधाय ॥ स्वर्णरजतमुद्रारूपान् कुशादीं संगृह्य सर्वं देवीरूपं विभाव्य. मूलमुच्चरन् मलापकर्षणं
स्नात्वा आचम्य ॥ ॐ अद्येत्यादि अमुकदेवतायाः प्रीतये मन्त्रस्नानमहं करिष्ये ॥ इति सङ्कल्प्य त्रिकोणचक्रं विलिख्य गङ्गे
त्यादि पुनः पठित्वा तीर्थमावाह्य ॥ मूलान्तेनाचम्य. आत्मतत्वाय स्वाहा. विद्यातत्वाय स्वाहा. शिवतत्वाय स्वाहा. इति त्रिराच
म्य मूलेन त्रिःशरीरं संप्रोक्ष्य पुनर्मूलेन मृत्तिकयाङ्गानि विलिप्य तेन कुम्भमुद्रया त्रिर्मूर्ध्नि जलेनाभिषिञ्च्य अङ्गुलिभि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतत्व. अवगाहादिसमन्विद्वारि॥संस्पर्श[illegible]विरचितेकालीतत्त्वेप्रातःस्ना
४ नप्रतिपादनंनामद्वितीयतत्त्वम्॥ ॥अथसन्ध्याविधिरुच्यते॥तदुक्तंकुमारीकल्पे॥प्रणवंपूर्वमुद्धृत्यमरायन्त्रेवरागीतिच
॥वज्रनीतिपदंप्रोक्तंमहाप्रतिसरेतथा॥वक्षद्वयंततोहुंफट्स्वाहेतितदनन्तरम्॥अनेनैवतुमन्त्रेणरक्षांकुर्याद्विचक्षणः
॥पुनराचम्यविन्यस्यषडङ्गमपिमन्त्रवित्॥वामहस्तेजलंग्राह्यगलितोदकबिन्दुभिः॥सप्तधाप्रोक्षणंकृत्वामूर्द्धिमन्त्रं
समुच्चरेत्॥अवशिष्टोदकंहस्तेदक्षिणेग्राह्यबुद्धिमान्॥इडयाकृष्यदेहान्तःक्षालयेत्पापसञ्चयम्॥कृष्णवर्णंतदुदकं
दक्षनासादिरेचनम्॥दक्षहस्तेचतन्मन्त्रीपापरूपंविचिन्त्यच॥पुरतोवज्रपाषाणेनिक्षिपेदस्त्रमन्त्रतः॥अतएवयाम
लावप्याह॥षडङ्गन्यासमाचार्यवामहस्तेजलंततः॥गृहीत्वादक्षिणेनैवसम्पुटंकारयेत्ततः॥शिववायुजलंपृथ्वीवह्नि
बीजंत्रिधापुनः॥अभिमन्त्र्यचमूलेनसप्तधातत्त्वमुद्रया॥निःक्षिपेत्तज्जलंमूर्द्ध्निशेषंदक्षेनिधायच॥शरीरान्तःस्थितंपापं
क्षालयेत्साधकाग्रणीः॥मूलेनतिलकंकुर्यात्सन्ध्यैषैवहिकौलिकी॥उड्डियकुलगंशिष्यकथितादेविसुन्दरि॥अस्या ४

र्थः॥एषैवाथवैकारेणाभिधेयत्वनचैदोषिमतःसन्ध्यादीनाम्॥तथाच॥शाक्तंवैदिकंवाभिधेयंनतुसमुच्चयत्॥नचउक्ते
नैवविधानेनस्नानंकृत्वातुतान्त्रिकम्॥वैदिकंतान्त्रिकंसन्ध्याकृत्वातर्पणमाचरेत्॥इतिसारदायीकाविवोध्यइतिनात्यम्
॥कौलीकंकुर्वतःकर्मवैदिकंनाभिधीयते॥वैदिकंकुर्वतःकर्मकौलिकंनाभिधीयते॥इत्यादियामलादिवचनस्वर
सेनअथेहमिथोनिरपक्षमेवकर्मइति॥अथवेदःस्वरसेनतस्योक्तार्थपरत्वादिति॥तथायेषायत्रैकातैस्तत्कर्मकर्तव्य
मिति॥सम्प्रदायिकाः॥कुलीनंशिष्यमुद्दिश्यएषैवकथितेतिवचनस्वरसेनकौलिकमित्यादिवचनस्वरसेनकौलिकं
प्रतिकौलिकीवैदिकंप्रतिवैदिकीयंसन्ध्येतिनिष्कर्षः॥तन्त्रान्तरेपि॥दिनेशायोक्षिपेन्मन्त्रीवारिणाचाञ्जलित्रयम्॥अष्टो
त्तरशतावृत्यागायत्रींप्रजपेत्सुधीः॥अतएवाहकुमारीकल्पे॥कालिकायैततःप्रोक्ताविद्महेश्मशानवासिनीम्॥ज्येष्ठां
धीमहीतिततोचोदन्नोघोरेप्रचोदयात्पठेदिति॥अस्याःप्रसादमात्रेणमहापातककोटयः॥सद्यःप्रलयमायान्तिसा
धकस्यनचान्यथा॥रावणस्यवधाच्चैवरामचन्द्रोविमोचितः॥गुरुदाराभिगमनाचन्द्रोपिहिविमोचितः॥निजकन्या

कालीतत्व. कर्षणाच्चब्रह्माचैवविमोचितः॥मातृवधात्परशुरामोपिमोचितोस्याःप्रसादतः॥सुरापानाच्चश्रीकृष्णोदत्तात्रेयस्तथैवच॥
५ एवमेषामहाविद्यागोप्तव्यादेविसुन्दरि॥महापातकयुक्तोपिप्रजपेद्दशधायदि॥सत्यंसत्यंमहादेविमुक्तोभवतितत्क्ष
णात्॥अथप्रयोगः॥मणिधरिणिवज्रिणिमहाप्रतिसरेरक्षरक्षहुंफट्स्वाहेतिशिखाबन्धनंविधायमूलेनतिलकंकृत्वा
षडङ्गंविन्यस्यवामहस्तेजलंसंगृह्याङ्गुल्यग्रगलदुदकबिन्दुभिःमूलमुच्चरन्मूर्द्धिसप्तवारंप्रोक्षणंकृत्वाऽवशिष्टजलंदक्ष
हस्तेसंगृह्यदक्षनासाग्रमुपनीयइडयादेहान्तर्वर्तिसमस्तंपापमाकृष्यदक्षिणनासापुटेनधृत्वातज्जलंकृष्णवर्णंविचि
न्त्यपुरतोवज्रोपमंपाषाणंविभाव्यतदुपरिअस्त्रमन्त्रेणक्षिप्त्वागायत्रींदशधाअष्टोत्तरशतावृत्त्यावाप्रजप्यनमस्कु
र्वन्सूर्यमण्डलेविसर्जयेदिति॥ ॥इतिश्रीराघवभट्टविरचितेकालीतत्त्वेसन्ध्याप्रतिपादनंनामतृतीयतत्त्वम्॥ ॥
अथतर्पणविधिरुच्यते॥तदुक्तंयामलादौ॥तर्पणादौप्रयुञ्जीततृप्यन्त्वाब्रह्मभैरव॥आवाहने — पितॄन्भैरवानिति
कीर्तयेत्॥तत्रभैरवरूपेणदेवीमपिचकालिकाम्॥तृप्यतांकालिकामातःपितरश्चैवतृप्यताम्॥अनेनैवविधानेनयथा ५

शक्त्याचतर्पयेत्॥मार्तण्डभैरवायेतित्रिधाचार्घ्यंप्रकल्पयेत्॥चूडामणावप्याह॥नमःसूर्यायदेवायत्रिधाचार्घ्यंप्रकल्प्यच॥
देवान्पितॄन्नृषींश्चैवतर्पयेत्कुलवारिणा॥आवाहनेआवाहेत्यर्थः॥इदमुपलक्षणंतत्परिवाराणामपिबोध्यम्॥नील
तन्त्रेप्याह॥मूलान्तेनतर्पयामीतिस्वाहान्तंतर्पणंमतम्॥एवंविधानतर्पणन्तुकृत्वापापक्षयोभवेत्॥कुशीतमोभपुष्पञ्च
कुलपुष्पंकुशाञ्जलम्॥प्रसन्नयाहीनाम्रपात्रेकृत्वावार्घ्यंनिवेदयेत्॥मूलाद्यन्तेबोधयदादित्यमण्डलवर्तिन्यैशिवाचैतन्य
मय्यैस्वाहेतिमन्त्रःस्मृतः॥सूर्यार्घस्त्वावश्यकः॥अन्यथानिषेधात्॥तदुक्तंनन्दिकेश्वरसंहितायाम्॥यावन्नदीयतेचा
र्घंभास्करायनिवेदनम्॥तावन्नपूजयेद्विष्णुंशङ्करंवासुरेश्वरीम्॥अथप्रयोगः॥प्रथमंश्रीब्रह्मानन्दनाथभैरवंतृप्यता
मितिगुरुंतर्पयेत्॥ततोनिजगुरुंसन्तर्प्यअसिताङ्गादीन्देवींभैरवादींश्चतर्पयेत्॥ततोजलेयन्त्रंविभाव्यदेवीमावाहस्ता
हान्त्रमूलान्तेमहाकालसहितअमुकदेवीमानस्तृप्यतामितित्रिःसकृद्वासन्तर्प्यसूर्यमण्डलेदेवींविभाव्यपूर्ववदर्घंदत्वामू
लंततःगायत्रींवासमुच्चार्यमहाकालसहितायैअमुकदेव्यैइदमर्घंस्वाहेतिअर्घंदत्वादेवींगायत्रींयथाशक्त्याप्रजप्यदेवीह

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतत्व. स्तेगुरुरेत्यादिनामन्त्रेणजपंसमर्प्यसूर्यमण्डलेविसर्जयेदिति॥ ॥इतिश्रीराघवभट्टविरचितेकालीतत्त्वेतर्पणनिर्णयोचतुर्थत
९ त्वम्॥ ॥अथपूजाविधिरुच्यते॥उत्थायकुलवस्त्रेद्वेपरिधायकुलेनच॥तिलकंकुलरूपञ्चकृत्वावैचकुलेश्वरी॥फलवि
द्याकांक्षिभिःवस्त्रेविशेषपरिधानमिति॥तदुक्तंस्वतन्त्रेचाद्ये॥मोक्षार्थीरक्तवस्त्रेणभोगार्थीश्वेतवाससा॥मारणेकृ
ष्णवस्त्रैवैवश्येरक्तंसदागृही॥उच्चाटेव्याघ्रचर्माणिवृषलकृतमम्भकर्मणि॥परिधायततोमन्त्रीयागभूमिमथाविशेत्॥
ततश्चसाधकश्रेष्ठःहृदिमन्त्रंस्मरन्परा॥अवहिर्मानसायोगीयागभूमिमथाविशेत्॥जलशंखंकरेधृत्वागत्वाद्वारिमहे
श्वरि॥क्षालयेत्हस्तपादौचतन्मन्त्रंवैसमुच्चरन्॥ॐवज्रोदकेहुंफट्स्वाहाइतिमन्त्रेणमन्त्रवित्॥जलमानीयसव्येनअ
नेनसोधयेत्ततः॥प्रणवंपूर्वमुद्धृत्यलज्जावीजंतथैवच॥ततोविशुद्धान्तेसर्वपापानिसमयादथ॥अशोधास्तेविकल्प
स्यादपनयेत्ततःपरम्॥कूर्चबीजंभवेन्मन्त्रंपादप्रक्षालनेप्रिये॥वेदाद्यंचतथामायास्वाहेत्याचमनंमतः॥तथाआच
मनंकृत्वासामार्घ्यंप्रकल्पयेत्॥त्रिकोणवृत्तसूर्यविम्बंमण्डलंरचयेत्ततः॥आधारशक्तिंसम्पूज्यतदाधारंविनिक्षिपेत्॥ ९

अस्त्रेणपात्रसंशोध्यहृदामन्त्रेणपूरयेत्॥निक्षिपेत्तीर्थमावाह्यगन्धादीन्प्रणवेनतु॥दर्शयेद्धेनुमुद्रांवैसामान्यार्घ्यमिदंमत
म्॥सामान्यार्घ्येणदेवेशिपूजयेद्द्वारपार्श्वयोः॥गणेशंक्षेत्रपालञ्चवटुकंयोगिनीन्तथा॥गङ्गाञ्चयमुनाञ्चैवलक्ष्मींवाणीं॰
ततोविशेत्॥अन्यत्रापि॥गंबीजाद्यंगणेशञ्चवामाद्यंवटुकंतथा॥क्षामाद्यंक्षेत्रपालञ्चयामाद्यांयोगिनीन्तथा॥ॐवा
मेनदक्षेचअधश्चैवयथाक्रमात्॥ततोगृहंप्रविश्यमन्त्रीभूतापसारणंकुर्यात्॥तदुक्तंस्वतन्त्रे॥भूमिव्योमस्थितान्भू॰
तान्विघ्नान्महादृष्टान्विनेतैः॥सिद्धार्थैस्तिलसंघातैःप्रोक्षार्घ्याचमनंविशेत्॥अन्यत्रापि॥भूतापसारणंकुर्यान्मन्त्रेणानेन
साधकः॥यस्मिन्कुलेस्थिताभूतादूरंयान्तुशिवार्चने॥स्थितेषुतत्रभूतेषुनैवेद्यंमण्डलन्तथा॥लम्पन्तिहितथातुयानन
न्दन्तिचदेवताः॥तस्मात्प्रयत्नेनकर्तव्यंभूतानामपसारणम्॥अतस्त्वकुमारीकल्पोक्तम्॥प्रणवंपूर्वमुद्धृत्यसर्वविघ्नांस्त
तःपरम्॥उत्सारयेतिहुंफट्स्वाहातदनन्तरम्॥अनेनैवचमन्त्रेणविघ्नानुत्सारयेत्सुधीः॥प्रणवंपूर्वमुद्धृत्यरक्षरक्षेत
दन्तरम्॥हुंफट्स्वाहेतिमन्त्रेणभूमिञ्चपरिशोधयेत्॥ततःपवित्रवज्रादौप्रणवंपूर्वमुद्धरेत्॥चर्महृदयमनश्चैवफट्स्वा॰

कालीतत्व. हान्दनन्तरम्॥अनेनैवतुमन्त्रेणकुर्यात्तस्याभिमन्त्रणम्॥ततःआसनस्थापनंकुर्यात्॥तदुक्तंस्वतन्त्रे॥भूमौत्रिकोणमा
७ लिख्याधारशक्तिप्रपूजनम्॥मेरुपृष्ठऋषिःप्रोक्तःसुतलंछन्दईरितम्॥कूर्मोदेवतादेविचासनोपवेशनेप्रिये॥विनियोगश्च
कथितःपठेन्न्यासनंततः॥पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता॥त्वञ्चधारयमांनित्यंपवित्रंकुरुचासनम्॥इति॥
धृत्वादेवेशिकुशांस्तत्रैवदापयेत्सुधीः॥मायाबीजंसमुच्चार्यआधारशक्तयेतथा॥कमलासनमुच्चार्यॐनमोन्तंप्रपूजयेत्॥
कुमारीकल्पोक्तम्॥आकारान्तेसुरेखेचवज्ररेखेततःपरम्॥हुंफट्स्वाहेतिचब्रूयान्मण्डलन्तुवरानने॥वीरासनोपविष्टे
नसम्पूज्यासनमेवच॥स्वंविधानतोदेविसंस्थाप्यासनमेवच॥तत्रोपविश्यविधिनाप्रकुर्याद्धेतुकम्॥तदुक्तंभावचू
डामणौ॥विनाहेतुकमास्वाद्ययोभक्त्यामहेश्वरि॥नपूजामनसंकुर्यात्नध्यानंनतुचिन्तनम्॥तस्माद्धुत्वाचपीत्वाच
पूजयेत्परमेश्वरीम्॥विजयाकल्पोक्तम्॥सम्विदाशवयोर्मध्येसम्विदेवगरीयसी॥सम्विदायागेनैतेनहप्रजादौसाध
कोत्तमैः॥कर्तव्यश्चमहापूजाकरणीयासुनन्दिने॥यामलादौच॥आनन्देनविनाङ्गेनचतृप्यन्तिदेवताः॥इति॥ततः ७

शुद्धिन्तुतत्त्वेविवेचयिष्ये॥ततःपूजोपकरणानिस्वस्वस्थानेषुसंस्थाप्यशोधयेत्॥तदुक्तंकुलचूडामणौ॥नानाविधानिपुष्पा
णिगन्धानिविविधानिच॥कर्पूरादिभिःधूपादिवासितंवटवासितम्॥ताम्बूलादीनिद्रव्याणिधूपदीपादिकंततः॥सर्वालङ्कार
भूषादिभूषितंकौलिकेश्वरि॥मूलमन्त्रजप्ततोयैःप्रोक्षितंस्थापयेत्ततः॥सर्वंस्वदक्षिणेसंस्थाप्यवामेचार्घंनिवेदयेत्॥पश्चिमे
देवतायाश्चकुलद्रव्याणिधारयेत्॥कालिकापुराणेपि॥मदिरांपृष्ठतोदद्यात्अन्यपानन्तुवामतः॥पुष्पशोधनमन्त्रान्तरं॰
प्युक्तम्॥प्रणवंपुष्पकेतुश्चतथाराजार्हतेपिच॥ज्ञानास्त्रसम्यगित्युक्त्वासम्भूतायततःपरम्॥पुष्पेपुष्पेमहापुष्पेसपुष्पेपु
ष्पसम्भवे॥पुष्पाचस्वावकीर्णेनहुंफट्स्वाहातदनन्तरम्॥मनुनानेनदेव्यास्तुपुष्पशुद्धिमथाचरेत्॥प्रणवंपूर्वमुद्धृत्यतस्यान्त
रमेवच॥हुंफट्स्वाहामनुःप्रोक्तःकस्तवाकृचित्तसोधने॥रक्षद्वयंहुंफट्स्वाहामन्त्रःस्यादात्मरक्षणे॥पार्ष्णिघातकवासकौतेन
जेन्यकुष्ठमध्यमम्॥तालत्रयमथोदद्यात्संशब्दंसंप्रदायतः॥धानुवश्चैनेनैवदूरेशेयमधिकैःप्रिये॥मात्राभिःप्रणवंजप्त्वापू
रयेत्कुम्भकरेचके॥प्राणायामंततःकृत्वाभूतशुद्धिमथाचरेत्॥अन्यत्राप्युक्तम्॥मनोजीवात्मनःशुद्धिःप्राणायामेनजायते॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतत्व. कालीक्रमेप्युक्तम्॥प्राणायामत्रयंकुर्यान्मूलेनप्रणवेनच॥तन्त्रान्तरेपि॥कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम्॥प्राणाया
८ मसविज्ञेयःतर्जनीमध्यमाविना॥स्वतन्त्रेपि॥संहारक्रमयोगेनपञ्चतत्वसमुद्भवेत्॥शोषदाहप्लवान्कृत्वावाय्वग्निसलिला
क्षरैः॥ततोन्यासंप्रकुर्वीतपीठशक्तिनवेरितम्॥अन्यत्रापि॥देवीरूपंततोध्यायेदात्मानंकमलेक्षणे॥ततोजीवंप्रविन्यस्यपाशा
दिव्यक्षरेणतु॥प्राणामन्त्रेणशाउक्तेनततोऽमुष्याःपदंवदेत्॥प्राणाइहवदेत्पश्चात्तइहप्राणास्ततःपरम्॥अमुष्याजीवइहस्थितोअ
मुष्याःसर्वपदंततः॥सर्वेन्द्रियाण्यमुष्यावाङ्मनोनयनादितः॥श्रोत्रघ्राणपदाप्राणाइहागत्यसुखंचिरम्॥वह्निजायाततःप्राण
मन्त्रोयंसमुदीरितः॥अमुष्याःस्थानेसाध्यादेवतायाःषष्ठ्यन्तंनामदेयमितिभावः॥तदुक्तंयामलादौ॥अमुकपदंयद्रूपंयः
यमन्त्रेषुदृश्यते॥साध्याभिधानंतद्रूपंतत्रस्थानेनियोजयेत्॥कुमारीकल्पेप्युक्तम्॥भैरवोस्यऋषिःप्रोक्तःउष्णिक्छन्दउ
दाहृतम्॥देवताश्यामलाप्रोक्तालज्जाबीजन्तुबीजकम्॥शक्तिःस्तुकूर्चबीजंस्यादनिरुद्धसरस्वती॥कवित्वार्थेविनियोगःस्या
देवमुष्यादिकल्पना॥अनिरुद्धसरस्वतीतिप्रथमंबीजंकीलकमित्यर्थः॥कवित्वेत्युपलक्षणम्॥अभिमतार्थइत्यपिवाध ८

यम्॥अतएवकालीक्रमे॥कीलकञ्चाद्यबीजन्तुचतुर्वर्गार्थसिद्धये॥कुलचूडामणावप्याह॥भैरवोस्यऋषिःप्रोक्तःउष्णिक
छन्दउदाहृतम्॥श्यामलादक्षिणाकालीचतुर्वर्गफलप्रदा॥तन्त्रान्तरेपि॥ऋषिंन्यासम्मूर्ध्निदेशेछन्दस्तुमुखपङ्कजे॥देवताहृ
दयेचैवबीजंगुह्येतुदेशके॥शक्तिस्तुपादयोश्चैवकीलकंसर्वाङ्गकेन्यसेत्॥ततःकराङ्गन्यासौकुर्यात्॥तदुक्तंकालीतन्त्रे॥
अङ्गन्यासकरन्यासौयथाविधिविधीयते॥षड्दीर्घभाजबीजेनप्रणवाद्येनकल्पयेत्॥हृदयायनमःप्रोक्तंशिरसेवह्निवल्ल
भा॥शिखायैवषडित्युक्तंकवचायहुमीरितम्॥नेत्रत्रयायवौषट्स्यादस्त्रायफट्प्रकीर्तितम्॥बीजमाद्यबीजंतत्रपरिभा
षितम्॥तन्त्रान्तरेविरोधादिभावः॥अतएववीरतन्त्रेप्युक्तम्॥दीर्घषट्स्वरभाजाद्येनप्रणवाद्येनकल्पयेत्॥स्वतन्त्रेपि॥प्रण
वंचाद्यबीजन्तुषड्दीर्घमानितः॥कुर्यात्षडङ्गंविन्यासंमूलस्वराङ्गयेणवा॥भैरवतन्त्रेच॥षडङ्गानिन्यसेन्मन्त्रीत्रिःसकृद्वाय
थाक्रमम्॥ततोवर्णन्यासंकुर्यात्॥एवंयथाविधिकृत्वावर्णन्यासंसमाचरेत्॥अआइईउऊऋॠऌॡवेहृदयायनमः॥
एऐततोअंअःकखगघङतथापुनः॥उच्चार्यदक्षिणंहस्तंन्यसेत्साधकसत्तमः॥ङचछजझञटठडढणतथापुनः॥इतिनाममु

कालीतत्व. जेन्यस्यवामेतथैवपुनस्मरेत्॥तथफबभइतिचदक्षिणेजङ्घेन्यसेत्॥मयरलवशषसहक्षवामजङ्घेन्यसेत्॥ततोमातृका
९ श्रीकण्ठौःकुर्यात्॥तदुक्तंस्वतन्त्रेच॥आदौचमातृकान्यासस्ततःश्रीकण्ठउच्यते॥ऋषिर्ब्रह्माभवेच्छन्दोगायत्रीमातृकापुनः
देवतंव्यञ्जनंबीजंशक्तयस्तुस्वबीजं अमी॥अव्यक्तंकीलकंज्ञेयंन्यासेदुक्तक्रमेणतु॥उक्तक्रमेणेतिपूर्वोक्तऋष्यादि
न्यासविन्दुकम्॥क्रमेणाहइत्यर्थः॥षडङ्गंमातृकायास्तुकारयेत्साधकोत्तमः॥स्वराणांक्लीवहीनानांसबिन्दूनांक्रमेणतु॥युग्म
युग्मान्तरान्तेतुपञ्चवर्गंसबिन्दुकम्॥निःक्षिपेद्यादिवर्गस्तुशेषवर्णान्तरालके॥क्लीवहीनानामितिऋॠऌॡरहितानामित्य
र्थः॥युग्मयुग्मान्तरालेति॥अंकंखंगंघंङंआंहृदयायनमः॥इंचंछंजंझंञंईं उंटंठंडंढंणंऊं ऎंतंथंदंधंनंऐं ओंपंफंबंभंमंऔंअं
यंरंलंवंशंषंसंहंक्षंअः॥इतिक्रमेणापूर्वोक्तषडङ्गन्यासक्रमेणेत्यर्थः॥अथवाक्रमेतिप्रथमस्वरयुग्मान्तरालेप्रथमवर्गः॥ए
वंद्वितीयस्वरद्वितीयवर्गः॥तृतीयस्वरतृतीयवर्गः॥चतुर्थस्वरचतुर्थवर्गः॥एवंपञ्चमस्वरपञ्चमवर्गः॥अंअःतयोर्मध्येया
दिवर्गःअस्त्रमन्त्रः॥इतिक्रमेणेत्यर्थः॥एवंषडङ्गविन्यस्यतांध्यायेत्॥सम्पूर्णेन्दुप्रशुभ्रांसकललिपिमयींलोलवक्त्रांत्रिनेत्रां ९

शुक्लालङ्काररम्यांशशिमुकुटजटाजूटयुक्तांप्रसन्नांपुस्तकस्रक्पूर्णकुम्भांसुशिमपिदधतींशुक्लपद्मासनस्थांवाग्देवींप्रणवक्रां
स्तनभरनमितांचिन्तयेत्साधकेन्द्रः॥एवंध्यात्वाललाटादिक्रमेणसकारान्तान्न्यसेत्॥तदुक्तम्॥ललाटेमुखवृत्ताक्षिश्रुतिघ्राणो
ष्ठगण्डयोः॥ओष्ठदन्तोत्तमाङ्गास्यदोपत्सन्ध्यग्रकेषुच॥पार्श्वयोःपृष्ठतोनाभौहृदयेजठरांशके॥कक्ष्यांशकचहृत्पूर्वंपाणिपा
देषुयत्नतः॥जठराननयोन्यस्यमातृकार्णांयथाक्रमम्॥ललाटेनामिकामध्येविन्यसन्मुखवृत्तके॥तर्जनीमध्यमानामास्य
देषुयत्नतः॥जठराननयोन्यस्यमातृकार्णांयथाक्रमम्॥ललाटेनामिकामध्येविन्यसन्मुखवृत्तके॥तर्जनीमध्यमानामाश्च
सनीयापुनर्द्वयैः॥तर्जन्यनामिकादे विन्यसेच्चैवनेत्रयोः॥अङ्गुष्ठकर्णयोर्न्यस्यकनिष्ठाङ्गुष्ठौनसोन्यसेत्॥मध्यमाङ्गुष्ठ
योर्न्यस्यमध्यमाप्राक्षयोर्न्यसेत्॥अनामादन्तयोर्न्यस्यमध्यमामुत्तमाङ्गके॥मुखेनामामध्यमेचहस्तपादचपार्श्वयोः॥क
निष्ठानामिकामध्या स्तास्तुपृष्ठतोन्यसेत्॥नामङ्गुष्ठनाभिदेशेसर्वकुक्षौचविन्यसेत्॥हृदयेचसर्वमंसयास्वककुस्थलेहृ
त्पूर्वहस्तयत्कुक्षिमुखेस्थलमेवच॥एतास्तुमातृकामुद्राःक्रमेणैवप्रकीर्तिता॥अज्ञात्वाविन्यसेद्यस्तुन्यासःस्यात्तस्यनिष्फ
लः॥ततःश्रीकण्ठन्यासंकुर्यात्॥तदुक्तंकालिकाक्रमे॥विन्यसेन्मातृकास्थानेश्रीकण्ठादीन्यथाक्रमम्॥पूर्णोदर्पादि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतन्त्र. निःसार्द्धमातृकार्णैस्समन्वितम्॥श्रीकण्ठानन्तसूक्ष्मौचत्रिमूर्तिरमरेश्वरः॥अर्घीशोभारभूतिश्चातिथीशःस्थाणुकाहरः॥
१० झिण्टीशोभौतिकःसद्योजातश्चानुग्रहेश्वरः॥अक्रूरश्चमहासेनःस्युरेतेसुरमूर्तयः॥पाश्चात्क्रोधीशचण्डेशप
ञ्चान्तकशिवोत्तमाः॥अथैकरुद्रेशकूर्मैकनेत्रेशचतुराननाः॥अजेशःसर्वसोमेशौलाङ्गलीदारुकौतथा॥अर्द्धनारीश्व
रश्चोमाकान्तश्चाषाढदण्डिनौ॥अत्रिमीनमेषाख्यालोहितास्सशिखिकास्मृताः॥एतेरुद्राःस्मृतानक्ताधूतस्थूलकपालः
काः॥पूर्णादेवीस्याद्विजयाशाल्मलीनस्तत्परम्॥लोलाक्षीवर्तुलाक्षीचदीर्घघोणासमीरिता॥सुदीर्घमुखीगोमुख्यो
दीर्घजिह्वातथैवच॥चण्डोर्ध्वमुखीकेशीचतथासिंहमुख्यपि॥ज्वालामुखीसमाख्यातापश्चादुल्कामुखीततः॥श्रीमुखी
विद्यामुखीतास्युःसुरशक्तयः॥महाकालीसरस्वत्यौसर्वसिद्धिसमन्विते॥गौरीत्रैलोक्यविद्यास्यात्मन्त्रशक्तिस्ततःप
रम्॥आत्मशक्तिस्तुमातातथालम्बोदरीमता॥द्राविणीनागरीज्ञेयाखेचरीचैवमञ्जरी॥रूपिणीवीरिणीपश्चात्काको
दरीपूतना॥स्याद्भद्रकालीयोगिन्यौशङ्खिनीगर्जिनीतथा॥महाकालरात्रिकुब्जिन्यौकपर्दिन्यपिवज्रिणी॥जयासु १०

मुखेश्वर्यौरेवतीमाधवीततः॥वारुणीवायवीप्रोक्तापश्चाद्रक्षोविदारिणी॥ततश्चसहजालक्ष्मीव्यापिनीमाययान्विता॥ध्या
त्वाद्धार्कसमीकृत्यासिन्दूरप्रख्यविग्रहाः॥रक्तोत्पलकपालाढ्यप्रलंबूनकराम्बुजाः॥ततोन्तःश्चोढान्यसेत्॥तदुक्तंवीरतन्त्रे॥केव
लामात्रकांकृत्वामातृकान्तारसम्पुटम्॥मातृकांपुटितांतारंन्यसेत्साधकसत्तमः॥स्वंकामपुटंतारंकामंवातारसम्पुटम्॥
शक्त्याचपुटितंतारंशक्तितारपुटान्यसेत्॥ह्रींह्रूंक्लींह्रौंसोन्तमन्त्रेणपुटितंपुनः॥तैस्तैस्तथाचमन्त्रेणपुटितंविन्यसेद्बुधः॥
अनुलोमविलोमेनमन्त्रंकेवलमेवतु॥विन्यसेन्मातृकास्थानेत्याप्तमन्त्रोत्तरंशतम्॥उक्तिगुप्तेनदुर्गायांअङ्केयोढाप्रकीर्ति
ता॥तारीयाःकालिकायाश्चउन्मुख्याश्चतथापरा॥कृतेस्मिन्न्यासवर्येतुसर्वपापंप्रणश्यति॥अल्पमृत्युहरानूनंरोगशोक
विनाशिकाः॥दुष्टसत्वानिनश्यन्तिशत्रवोयान्तिमित्रताम्॥वाणीतस्यमुखस्थाचद्वक्षारसपरम्परा॥अणिमाद्यष्टसिद्धि
स्तुतस्यहस्तेव्यवस्थिता॥कायिकंवाचिकंवाचिकंवापिमानसंवापियत्कृतम्॥सर्वंतस्यविनाशंतुयातिन्यासस्यचिन्त
नात्॥ब्रह्महत्यासमंयात्नियत्किञ्चिदुपपातकम्॥यद्रूपंदृश्यतेसोपिसतद्रूपश्चगच्छति॥यंनमन्त्रिमहादेवियोढापु

कालीतन्त्र. टितविग्रहः॥अल्पायुष्यंभवेत्सद्योदेवताकम्पतेभयात्॥ततस्तत्न्यासंकुर्यात्॥तदुक्तंस्वतन्त्रतन्त्रे॥तदुक्तंकालीकल्पे॥ब्रह्म
११ रन्ध्रेभ्रुवोर्मध्येललाटेनाभिदेशके॥गुह्यवक्त्रेतुसर्वाङ्गेसप्तबीजानिक्रमान्न्यसेत्॥ततोव्यापकन्यासंकुर्यात्॥पञ्चधाथवापि
मूलेनसप्तधातथा॥स्वतन्त्रतन्त्रेपिउक्तम्॥मूलेनव्यापकंन्यासंनवधाकारयेत्प्रिये॥इतिन्यासजालंविधायचक्रराजंन्यसे
त्॥तदुक्तम्॥स्वर्णेविन्यस्यहस्तेनचक्रराजंसमालिखेत्॥स्वर्णेचक्रराजनेतास्मेपाषाणेचाष्टधातुके॥स्वयम्भुकुसुमंकुण्डगो
लोत्थंरोचनागुरुम्॥कस्तूरीमृगनाभीचकुलंकमलयोद्भवम्॥एषगन्धसमाख्यातःसर्वदाचण्डिकाप्रिये॥एतेनगन्धयो
गेनयोनिचक्रंसमालिखेत्॥योनिद्वयंततःकुर्यात्प्रद्वेणमालिखेद्धि॥कालीतन्त्रेच॥आदौत्रिकोणंविन्यस्यत्रिकोणंत
द्बहिर्न्यसेत्॥ततोवैविलिखेन्मन्त्रीत्रिकोणत्रयमुत्तमम्॥ततोवृत्तंसमालिख्यदलाष्टकंततःपरम्॥वृत्तंविलिख्यविधिवल्लि
खेद्भूपुरमेककम्॥नीलतन्त्रेप्युक्तम्॥पञ्चशक्तिंसमालिख्यअधोवक्त्रांसुलक्षणाम्॥ज्ञात्वैवंमुक्तिमाप्नोतियन्त्रराजंनसंश
यः॥एतत्तुविलिखेत्तामेकुण्डगोलविलेपितम्॥स्वयम्भुकुसुमैर्यन्तुकुङ्कुमागुरुसंयुतैः॥एवंपीठनिर्मायस्त्रीवेशधारीस ११

पीठपूजांकुर्यात्॥तदुक्तंकुमारीकल्पे॥ततःस्त्रीवेशधारीस्यात्सिन्दूराकृतभालकः॥शृङ्गारोत्कटवेशाढ्यस्ताम्बूलपूरिताननः॥
पीठन्यासंततःकुर्यादाधारशक्तिपूर्वकम्॥प्रकृतिंकमठंचैवशेषंपृथ्वींतथापुनः॥सुधाम्बुधिंमणिद्वीपंचिन्तामणिगृहंतथा॥
श्मशानंपारिजातंचततस्तमूलेरत्नवेदिकाम्॥तस्योपरिमणेःपीठंन्यसेत्साधकसत्तमः॥चतुर्दिक्षुमुनीन्देवान्शवान्सर्वशवमुण्डकान्॥
धर्माद्यैश्चाधर्माद्यैश्चपादगात्रचतुष्टये॥हृदिशेषत्रयम्प्रसंसूर्यसोमौमहेश्वरि॥वैश्वानरंतथासत्त्वंरजश्चैवतमस्तथा॥आत्मानं
चविन्यस्यशक्तिःस्पष्टस्थलेन्यसेत्॥इच्छाज्ञानक्रियाचैवकामिनीकामदायिनी॥रतिरतिप्रियानन्दाकर्णिकायामतात्मना॥वागुरुं
प्रथमंचोक्त्वापरायैनमस्ततःपरम्॥अपरायैपरापरायैहसौःबीजंपदंततःपरम्॥सदाशिवमहाप्रेतपद्मासनंततः॥नमइत्येवमं
त्रोयंपीठन्यासमुदाहृतः॥इतिपीठंपूजयित्वाघटंस्थापयेत्॥कलौकलौगृहीत्वातुदेवानांविश्वकर्मणा॥निर्मितोयंमुनेयत्नात्क
लशस्तेनउच्यते॥सौवर्णंराजतंवापिमार्तिकंकांस्यकान्वितम्॥क्षालयेदस्त्रमन्त्रेणाक्षमांसम्यक्सुरेश्वरि॥ततस्तुकारणंदिव्यं
समानीयघटस्थितम्॥वेष्टितंरक्तवस्त्रेणरक्तमाल्येनभूषितम्॥वामभागेमहेशानिमण्डलंचतुरस्रकम्॥ततस्संस्थापयद्भृता

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

कालीतत्व. देवीकुञ्ज्यवरानने॥ मण्डले कलशोद्भवमर्घ्यं अग्निमण्डलम्॥ इति द्रव्याभिषिक्त शुद्धिं नोक्तप्रकारेण संशोधितं कुर्यादिति भा
१२ वः॥ चूडामणावप्युक्तम्॥ स्ववामभागे मूलाग्रेण मध्यमञ्जलिस्वकम्॥ लिखित्वा तत्र कुम्भं वै सौवर्णं राजतं तथा॥ ताम्रं भूमिम
यं वापि यद्वा लोहविवर्जितम्॥ आधारे स्थापयेद्घटं सौवर्णं वापि राजतम्॥ सौवर्णं भोगदं प्रोक्तं राजतं मोक्षसंस्मृतम्॥ कांस्यं ता
म्रिकं चैव मृण्मयं वृद्धिवर्द्धनम्॥ ततस्तत्र नीरपादिकं मानयेत्॥ अन्यत्रापि॥ ओं रवं चैतेन वपात्रं तु स्थापयेन्मध्यभागतः॥ श्रीवि
द्योक्तविधानेन ततः पूजां समाचरेत्॥ समयाचारेप्युक्तम्॥ सामान्यार्घ्यं ततः कृत्वा पयसा साधकोत्तमः॥ तज्जलैर्मण्डलं कृत्वा
पात्राणि स्थापयेद्बुधः॥ कुमारीकल्पेप्युक्तम्॥ ततोऽर्घ्यं कारयेन्मन्त्री स्ववामे सुरसुन्दरि॥ अर्घद्रव्यमर्घपात्रे निःक्षिपेद्यत्नतः
सुधीः॥ कुण्डगोलोद्भवं द्रव्यं स्वयम्भुकुसुमं तथा॥ नाधर्मनिधनेऽशुद्धिर्मम त्रस्य साधने॥ कुलार्णवादावप्युक्तम्॥ कुलमांसं
तथा मत्स्यं मुद्रां मैथुनमेव च॥ अन्योन्यनित्यतत्त्वेयाप च्चानां पूजने सदा॥ अन्यत्रापि॥ शंकया जायते हानिः शंकया विघ्नभा
जनम्॥ शंकया योगतिर्यातिनस्मात् शंकां परित्यजेत्॥ दिव्यकुसुमसहस्रैः सुमांसमारणैरपि॥ नत्प्रिं भैरवं देव्याकुलामृत १२

विना ध्रुवम्॥ एतत्तु दिव्यद्रव्यादिकं शुद्धित्वोक्तविधानेन शोधयित्वा घटं शंखयोर्मध्ये निःक्षिपेदिति॥ ततः पीठमाद्याय चि
न्तयेदिष्टदेवताम्॥ ततः कामकलाध्यानं आवाह्य कालिकां शिवाम्॥ कूर्माख्यमुद्रया पुष्पं चक्रमध्ये निधापयेत्॥ देवीं सुषुम्ना
देशे ब्रह्मरन्ध्रकम्॥ वामनासापुटे ध्यात्वा निर्गतां स्वाञ्जलिस्थिताम्॥ पुष्पमालोक्य तत्पुष्पं प्रतिमादौ निधापयेत्॥ भैरवतन्त्रे
प्युक्तम्॥ ततः पूर्वोक्तरूपां च ध्यायेच्चैव हि दक्षिणाम्॥ योगिनीं चक्रसहितां महाकालसमन्विताम्॥ कालिकातन्त्रेमप्याह॥
ततो हृदयपद्मान्तः स्फुरन्तीं विद्युदाकृतिम्॥ सुषुम्णावर्त्मना नीत्वा शिवस्थाने महेश्वरि॥ ततोपि इडस्यासत्त्वः पर्यन्तं वे समन्तरे
त्॥ वामनासया देवेशि वायुवीजेन मन्त्रवित्॥ देवेशीति च मन्त्रेण चक्रे आवाहयेत्सुधीः॥ ध्यात्वा कामकलामादौ ध्यायेद्देवी
मतः परम्॥ तदुक्तं भावचूडामणौ॥ मुखं — वदाकारं तदधः कुचयुग्मकम्॥ सर्वविद्यासुसम्पन्नं सर्वनाग्निभवप्रदम्॥ सर्वा
र्थसाधकं देवं सर्वरञ्जनकारकम्॥ तदधः सपरार्द्धं च सम्मुपस्कृतमण्डलम्॥ सर्वदेवादिभूतं च सर्वदेवनमस्कृतम्॥ सर्वान
न्देनसम्पूर्णां सर्वरञ्जनकारकम्॥ सर्वार्थदं देववन्द्यं सर्वस्य च प्रवर्तनम्॥ एतत्कामकलाध्यानं संगोप्यं साधकोत्तमैः॥ स्वत

कालीतत्व. न्त्रेपि॥ देव्या ध्यानं प्रवक्ष्यामि सर्वदेवोपसेवितम्॥ अञ्जनाद्रिनिभां देवीं करालवदनां शिवाम्॥ मुण्डमालावलीकीर्णां मुक्तके
१२ शीं स्मिताननाम्॥ महाकालहृदम्भोजस्थितां पीनपयोधराम्॥ विपरीतरतासक्तां घोरदंष्ट्रां शिवेन वै॥ नागयज्ञोपवीतं च चन्द
न्द्रार्द्धकृतशेखराम्॥ सर्वालङ्कारसंयुक्तां मुक्तामालाविभूषिताम्॥ मृतहस्तसहस्रैस्तु बद्धकाञ्चीं दिगम्बरीम्॥ शिवाकोटिसह
स्रैस्तु योगिनीभिर्विराजिताम्॥ रक्तपूर्णमुखाम्भोजां मद्यपानप्रमत्तिकाम्॥ वह्न्यर्कशशिनेत्रां तु रक्तविस्फुरिताननाम्॥ वि
गतासुकिशोराभ्यां कृतकर्णावतंसकाम्॥ कण्ठावसक्तमुण्डालीगलद्रुधिरचर्चिताम्॥ श्मशानवह्निमध्यस्थां ब्रह्मकेशववन्दि
ताम्॥ सद्यः कृतशिरः खड्गवराभयकराम्बुजाम्॥ अन्यत्रापि॥ ऊर्द्ध्ववामे कृपाणां करकमलतले छिन्नमुण्डं तथोधः सव्ये भीतिं
वरं च त्रिजगदघहरे दक्षिणे कालिके ति॥ स्वतन्त्रतन्त्रे॥ ध्यात्वा देवीं समावाह्य योनिमुद्रां तु दर्शयेत्॥ खड्गमुण्डं वराभीतं प्रयो
निं सुदर्शयेत्॥ ततश्च सर्वकोणेषु देवीमाराधयेत्सुधीः॥ देवीइति अत्र देवीह रुन्त्यर्थः॥ तदुक्तं कालीतन्त्रे॥ श्रुतावप्याह॥ सं
वीः श्यामा असिकरा मुण्डमालाविभूषणाः॥ काली कपाली कुल्वा च कुरुकुल्वा विरोधिनी॥ विप्रचित्ता च उग्रचित्रा उग्रप्रभ १३

दीप्ता च॥ नीलो घना बलाका च मात्रा मुद्रा मिता सिता॥ पञ्चदश कोणगा इति॥ तर्जनं वामहस्तेन धारयन्त्यश्च सस्मिताः॥ ततोऽष्ट
दलेषु अष्टदेवीमावाहयेत्॥ तदुक्तं कुलसद्भावे॥ मोहमण्डलश्चापि ब्राह्मी नारायणी तथा॥ माहेश्वरी च चामुण्डा कौमारी चा
पराजिता॥ वाराही च तथा पूज्या नारसिंही तथैव च॥ ब्रह्माणीं हंसमारूढां स्वर्णवर्णां चतुर्भुजाम्॥ चतुर्वक्त्रां त्रिनेत्रां च कुचे च
पङ्कजेन तथा॥ दण्डं पद्माक्षसूत्रं च वहन्तीं चारुहासिनीम्॥ जटाजूटधरां देवीं भावयेत्साधकोत्तमः॥ नारायणीं महादीप्तां श्या
मां गरुडवाहिनीम्॥ नानालङ्कारसंयुक्तां चारुकेशीं चतुर्भुजाम्॥ गदाशंखकपालं च चक्रं सन्दधतीं कराम्॥ मधुमत्तमदो
ल्लोलदृष्टिं सर्वाङ्गसुन्दरीम्॥ महेश्वरीं वृषारूढां शुक्लां त्रिनयनान्विताम्॥ कपालडमरुं चैव वरदाभयशूलकम्॥ दधतीं
देवदेवेशीं नानाभरणभूषिताम्॥ चामुण्डां मन्दहास्यां विकटितदशनां भीमवक्त्रां त्रिनेत्रां नीलाम्भोजप्रभां तु प्रमुदितवपुषं
नीरदश्यालिमालाम्॥ खड्गं शूलं कपालं नरशिरघटितं खेटकं धारयन्तीं प्रेतारूढां प्रमत्तां मधुमदमुदितां भावयेच्चण्डरूपाम्॥
कौमारीं कुङ्कुमाभां च त्रिनेत्रां शिखिसंस्थिताम्॥ चतुर्भुजां शक्तिपाशमङ्कुशाभयधारिणीम्॥ नानालङ्कारसंयुक्तां प्रमत्तां परि॰

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतन्त्र.
१४ चिन्तयेत्॥ अपराजिता च पीताभा मत्स्यसूत्रं वरप्रदाम्॥ कमलं मातुलिङ्गं च दधतीं परिचिन्तयेत्॥ वाराहीं धूम्रवर्णाभां वराहवाहना
नां शुभाम्॥ फलकं खड्गकं चैव मुशलं वेदभुजैर्युताम्॥ नारसिंही नृसिंहस्य विभ्रान्तिसदृशीं तनुम्॥ इति काम्यादिपञ्चदश देवीः प्रण
वेन ब्रह्माद्यष्टदेवीश्चाष्टदेवीः स्वरेण॥ तदुक्तं श्रुतौ॥ द्वितीयचतुर्थषष्ठदशद्वादशचतुर्दशषोडशचतुर्दशस्वरभेदेन प्रणवेनाङ्कमिति
ततश्च गुरुपङ्क्तिं पूजयेत्॥ तदुक्तम्॥ वायव्यादीशपर्यन्तं गुरुपङ्क्तिं समर्चयेत्॥ भावचूडामणावप्युक्तम्॥ भैरव उवाच॥ मानदेवी
महामाये बन्धमोक्षप्रवर्तिनि॥ इदानीं श्रोतुमिच्छामि गुरुक्रममनुत्तमम्॥ देव्युवाच॥ गुरुक्रमस्तु वक्तुं भास्करविस्तरगौरवात्॥
देवीनामनन्ततत्त्वानुकथं तत्कथयामि ते॥ अज्ञात्वा गुरुकुलं देव नष्टमार्गो भविष्यति॥ नष्टमार्गो महाविघ्नेन ता(?)दृक्फलगोचरे॥
गुरूणां शिष्यभूतानां सिञ्चेत(?) स्मृतिक्रमः॥ अक्रम आश्रवि(?)यामि स्फलानात्र संशयः॥ तस्मात्सर्वत्र देवेश संक्षेपाच्छृणुतान्गुरू
न्॥ आदौ सर्वत्र देवेश महत्परमो गुरुः॥ तत्रादौ कालिका देवी तस्याः शृणु गुरुक्रमम्॥ महादेवी महादेव त्रिपुराख्येन भैरव॥ दिव्यौ
घाः गुरवः प्रोक्ताः सिद्धौघान् कथयामि ते॥ ब्रह्मानन्दपूर्णा देवी चलचित्तश्चलोचनः॥ कुमारः क्रोधनश्चैव वरदः स्मरदीपनः॥ मायारि १४

मारुती चैव मानवौघाः शृणु प्रिये॥ विमलः कुशलश्चैव भीमासनः सुधाकरः॥ मीनो गोरक्षकश्चैव भोजदेवः प्रजापतिः॥ मूलदेवो न
न्तिदेवो विघ्नदेवो हुताशनः॥ समयानन्दसन्तोषौ कालिकागुरवः स्मृताः॥ आनन्दनाथशब्दान्ता गुरवः सर्वसिद्धिदाः॥ स्त्रियोऽपि गुरुरूपा
श्च अम्बान्ताः परिकीर्तिताः॥ मानवौघान्तिके देवेशस्वगुरुं परिपूजयेत्॥ देव्यास्तु दक्षिणे भागे महाकालं समर्चयेत्॥ कुमारीकल्पेऽपि॥
ब्राह्म्याद्याः पूजयेत्तत्र पत्राग्रे भैरवान्यजेत्॥ दिक्पालानपि तेषां ब्राह्मस्थाने शिवनदीहि॥ अथ मूलदेवीपूजां कुर्यात्॥ तदुक्तं स्वतन्त्रतन्त्रे॥
आवाहयेत्तु मण्डले तु मूलदेवीं प्रपूजयेत्॥ अभीष्टासु स्वायव्यमध्ये गपूजनम्॥ तन्त्रान्तरे च॥ इष्टां हृदयमार्गेयां स्थितां ध्यात्वा तु स्थिरं
यजेत्॥ नैरृत्यां च शिरवा पूज्या वायव्यां कवचं यजेत्॥ अभ्यर्च्य पुरतो नेत्रं दिक्षु शस्त्रं प्रभार्चयेत्॥ इति तर्पयेत्कालिकां देवीं सायु
धां सपरिवाराम्॥ पाद्यादिभिश्च मूलेन देवीं सम्पूज्य तर्पयेत्॥ इति षोडशोपचारादिभिर्विशेषः॥ तदुक्तं मन्त्ररत्नावल्याम्॥
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्॥ मधुपर्काचमनस्नानवसनाभरणानि च॥ सुगन्धसुमनो धूपदीपनैवेद्यवन्दनाः॥ प्र
योजयेदर्चनायामुपचारांस्तु षोडश॥ पाद्यमर्घ्यं निवेद्याथ तथैवाचमनीयकम्॥ मधुपर्काचमनं चैव गन्धप्रसूनकेन तु॥ धूपदी

कालीतन्त्र.
१५ पौ च नैवेद्यं दशोपचारकं स्मृतम्॥ गन्धादयो नैवेद्यान्ता पूजा पञ्चोपचारिका॥ पूजाविशेषाप्युक्तः॥ तदुक्तं कालीकल्पे॥ श्रीपदं पूर्वमुच्चा
र्य पादुकां परमुच्चरेत्॥ पूजयामि ततः पश्चात् -------- ॥ पाद्यं च पादयोर्दद्यात्तामोऽन्तेन तु मन्त्रवित्॥ सुधामन्त्रेण देवेशि अ
र्घ्यं दद्याच्छिरोपरि॥ आचमनं मधुपर्कं च सुधा मुखे स्नानं गन्धं हृद्दद्यात्तु व्याप्यां शिवोऽयमिति॥ ततो निवेदयामी
ति सर्वं दद्यान्महेश्वरि॥ नमोऽन्तेनेति मूलेनेति विशेषः॥ अतस्तु स्वतन्त्रतन्त्रादौ॥ पाद्यादिभिश्च मूलेन देवीं सम्पूज्य साधकः॥ इति
साम्प्रदायिकाः॥ अतः अस्याः पूजादिकं सर्वकार्यं मूलेन साधकवित्॥ यामलादिवचनात्॥ मूलेनावाहनं तेनैव पूजनमिति उप
निषद्‌दृक्कर्जनाच विशेषविहितपरं साम्प्रदायिकमतम्॥ अथवा तेन व न्येव कारगर्भपाठलाभयोगश्च व च्छेदप्रत्ययात्साम्प्रदा
यिकमतानुरोधेन रतान्वयप्रत्ययाच्च मिथो विरोधादिति॥ मूलेनैव पाद्यादिभिः पूजयेदिति॥ अन्यत्राप्युक्तम्॥ मध्यमानामिका
भ्यां तु अङ्गुष्ठाग्रेण पार्वति॥ दद्याच्च विमलं गन्धं मूलेनैव तु साधकः॥ अङ्गुष्ठतर्जनीभ्यां च चक्रे पुष्पं निवेदयेत्॥ यथागन्धस्तथा दे
वि धूपं दद्याच्च दक्षिणे॥ मध्यमानामिकाभ्यां तु मध्यपर्वणि देशिकः॥ अङ्गुष्ठाग्रेण देवेशि धूना दीपं निवेदयेत्॥ तत्तोलनं तथा १५

कृत्वा गायत्र्या मूलयोगतः॥ तत्त्वार्थमुद्रया देवि नैवेद्यानि निवेदयेत्॥ मूलेनाचमनं दत्त्वा ताम्बूलं तत्त्वमुद्रया॥ अशेषं धूपदीपादी
न्सम्पूज्य दापयेत्ततः॥ धूपादिकं च स्वस्थाने दद्यात्॥ तदुक्तं यामलादौ॥ निवेदयेत्पुरोभागे गन्धपुष्पं च भूषणम्॥ दीपं दक्षिणतो
दद्यात्पुरतोऽप्यथवा मतः॥ वामतस्तु तथा धूपमग्रतो वा न दक्षिणे॥ नैवेद्यं दक्षिणे भागे पुरतो न तु पृष्ठतः॥ दद्यादिति तथा पश्चा
त्पूजयेदङ्गदेवताः॥ एवं सम्पूज्य पुनर्मूलेन देवीमभ्यर्चयेदिति॥ तदुक्तं स्वतन्त्रतन्त्रे॥ ततः पुनर्मूलदेवीं मुद्रानर्पणपूजनैः॥ अर्च
यित्वा जपं कृत्वा विसर्जयेत्ततः परम्॥ कालीतन्त्रेऽप्युक्तम्॥ ततः सावहितो मन्त्री गुरुं नत्वा शिरस्थितम्॥ देवीं ध्यात्वा च अष्टोत्तरस
हस्रं प्रजपेन्मनुम्॥ तेजोमयं जपफलं देव्या हस्ते समर्पयेत्॥ गुह्यातिगुह्यगोप्त्री त्वमिति मन्त्रेण मन्त्रवित्॥ परिवारान्समभ्यर्च्य
पुनरभ्यर्चयेत्तु ताम्॥ नत्वा च शिरसा देवीं स्वात्मनि च विसर्जयेत्॥ पुष्पाणां विधिनिषेध विवेचयिष्याम॥
॥ ॥ अथ पूजापद्धतिः॥ यथाकामनया नत्त्वा ध्येयं परिधाय स्त्रीवत्तिलकं चन्दनादिना कृत्वा स्थानेन तत्र स्थाने सुयथेच्छया स्था
नं ॐ वज्रोदके हुं फट् स्वाहा॥ इति मन्त्रेण जलं समानीय आसनमभ्युक्ष्य उपरि ॐ विशुद्धिः सर्वपापानि शम

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतत्व. याङ्गोथविकल्पमपनय हँ इत्यात्मनाम् ... ॥ ॐ ह्रीँ ... रहुँफट्स्वाहा॥ इतिहन्तदः
१६ त्वा आत्मरक्षांविधाय वामपादघातेनतर्जनीमध्यमाभ्यां ऊँ ऊँ इतालचयेणाद्विव्यदृष्ट्यावििघ्नविद्रिवानुत्सार्य कोटिकादिमिर्दः
शदिग्वन्धनंविधायप्राणायामादिकंकुर्यात्॥ यमूलाधारायनमः॥ सयोज्यदक्षिणाङ्गुष्ठेनदक्षिणनासापुटंधृत्वामूलंप्रणवंवा
मूलाद्यबीजंवाषोडशवारंजपन्वामनासानावायुमापूर्य कनिष्ठानामिकाभ्यांवामनासापुटंधृत्वामूलादिचतुःषष्टिवारंजपन्
वायुंकुम्भयित्वामूलादिद्वात्रिंशद्वारंजपन्दक्षिणनासयावायुंरेचयेदित्येकम्॥ पुनःकनिष्ठानामिकाभ्यांवामनासापुटंमू
लादिषोडशवारंजपन्दक्षिणनासयावायुमापूर्य पुनरङ्गुष्ठेननासापुटंधृत्वामूलादिचतुःषष्टिवारंजपन्वायुंकुम्भयित्वामू
लादिद्वात्रिंशद्वारंजपन्रेचयेत्॥ पुनरङ्गुष्ठेनदक्षिणनासापुटंधृत्वामूलादिषोडशवारंजपन्वामनासयावायुमापूर्यकनिष्ठा
नामिकाभ्यांवामनासापुटंधृत्वाचतुःषष्टिवारंजपन्वायुंकुम्भयित्वामूलादिद्वात्रिंशद्वारंजपन्दक्षिणनासयावायुंरेचयेत्
इत्यन्यः॥ इत्येवंप्राणायामत्रयंविधायभूतशुद्धिंकुर्यात्॥ यथामूलाधारात्कुण्डलिनींहंसमन्त्रेणसमुत्थाप्यपृथिव्यासहस्वा १६

धिष्ठानेसमानीयतदनुजलप्लाविनीनांविभाव्यतस्माज्जलेनसमणिपुरसमानीयतत्रत्येवह्नौजलंविलीनंविचिन्त्यततोवह्निः
नासहअनाहतेसमानीयतत्रत्यवायौवह्निविलीनंविचिन्त्यततोवायुनासहविशुद्धेसमानीयतत्रात्याकाशेवायुंविलीनंविभा
व्यतस्मादाकाशेनसहाज्ञाचक्रेसमानीयतत्रत्यमनस्याकाशंविलीनंविभाव्यमनोदेहेविलीनंविभाव्यनादोबिन्दौसमर्प्यब्रह्म
रन्ध्रस्थसदाशिवेनसङ्गमय्यवामनासापुटाग्रेयमितिवायुबीजंधूम्रवर्णविचिन्त्यषोडशवारंजपन्पापपुरुषेणसहशरीरंसं
शोध्य॥ रमितिवह्निबीजंरक्तवर्णंचतुःषष्टिवारंजपन्वायुंकुम्भयित्वातदुद्भूताग्निनाशरीरंदग्धंविचिन्त्यवमितिसुधाबीजंललाटे
विचिन्त्यद्वात्रिंशद्वारंजपन्वायुंरेचयेत्॥ शरीरमुत्पाद्यतत्रत्रिकोणवृत्तचतुरस्रमण्डलंकृत्वा॥ ॐ ह्रीँ आधारशक्त्येनमः॥ इति
आधारशक्तिंसम्पूज्य॥ तत्राधारंनिधाय॥ अस्त्रायफट्॥ इतिपात्रंप्रक्षाल्य॥ आधारेनिधायहृदयायनमः॥ इतिजलेनसं
पूर्य ॐ इतिमन्त्रेणगन्धपुष्पादिनासम्पूज्य॥ अङ्कुशमुद्रयासूर्यमण्डलाद्गङ्गेचेत्यादिमन्त्रेणतीर्थमावाह्यधेनुमुद्रयामृतीकृ
त्यतेनोदकेनचतुर्द्वारंसंप्रोक्षतेषुतेषुद्वारेषुद्वारदेवताःपूजयेत्॥ यथाद्वारार्द्धेगँगणपतयेनमः॥ वामेक्षाँक्षेत्रपालायनमः॥

कालीतत्व. दक्षिणेवाँवटुकनाथायनमः॥ अग्रेयाँयोगिनीभ्योनमः॥ एवमेवगँगङ्गायैनमः॥ यँयमुनायैनमः॥ श्रीँलक्ष्म्यैनमः॥ ऐँसरस्व
१७ त्यैनमः॥ एवंपूर्वद्वारक्रमेणद्वारचतुष्टयंसम्पूज्य। वामाङ्गसंकोचपूर्वकंमण्डलंप्रविश्य॥ ॐसर्वविघ्नान्उत्सादयहुँफट्स्वाहा॥
इतिसिद्धार्थसतादिप्रक्षेपेणविघ्नोत्सादनंविधाय॥ ॐरक्षरहुँफट्स्वाहा॥ इतिभूमिंसंशोध्य॥ ॐपवित्रवज्रहुँफट्स्वाहा॥ इ
तिभूमिमभिमन्त्र्य॥ आःसुरेखेवज्ररेखेहुँफट्स्वाहा॥ इतिमन्त्रेणत्रिकोणमण्डलंकृत्वा॥ ॐह्रीँआधारशक्त्येनमः॥ इतिमन्त्रे
णसम्पूज्यतत्राधारंसंस्थाप्यहस्तेनधृत्वापृथ्वीतिमन्त्रस्यमेरुपृष्ठऋषिःसुतलच्छन्दःकूर्मोदेवताआसनोपवेशनेविनियोगः
इतिवश्यादीनस्मृत्वा॥ पृथ्वीत्वयाधृतालोकादेवित्वंविष्णुनाधृ॥ त्वाञ्चधारयमांनित्यंपवित्रमासनंकुरु॥ इतिमन्त्रंपृष्ठित्वा
वीरासनोपविश्य॥ द्रव्यशुद्धितन्त्रोक्तप्रकारेणवकुलद्रव्यंसंशोध्यभुक्त्वा॥ वामकरोपरिश्रीअमुकनन्दनाथगुरुपादुका
भ्योनमः॥ दक्षिणकरेगँगणपतयेनमः॥ इतिनत्वापूर्ववदर्घंविधायततःकिञ्चिज्जलंप्रोक्षणीपात्रेसंस्थाप्यपूजोपकर
णंसंप्रोक्ष्यस्वदक्षिणेपुष्पादिकंपृष्ठभागेदेवतायाःकुलद्रव्याणिवामेचान्यस्मैयादिकंधृत्वा॥ ॐपुष्पकेतुराजार्हतेशतायस १७

म्यकसम्यग्धायपुष्पेरमहापुष्पेसुपुष्पेपुष्पसम्भवेपुष्पेचस्वावकीर्णेहुँफट्स्वाहा॥ इतिमन्त्रेणपुष्पशुद्धिंविधायस्वमूलेनाभिमं
त्रितजलेनात्मेयामपिशुद्धिंनिष्पाद्य॥ ॐहुँफट्स्वाहा इतिमन्त्रेणकायवाक्चित्तशोधनामृतवृष्ट्यासंप्लाव्यसोहमितिमन्त्रेणपु
नःकुण्डलिनींसुधालोलीभूतांपञ्चतत्वानिचसुषुम्नावर्त्मनास्वस्वस्थानेसमानीयदेवतारूपमात्मानंविभाव्यहृदिहस्तंनिधायक
जीवन्यासंकुर्यात्॥ आँह्रीँक्रौँहंसःदक्षिणकालिकायाःप्राणाइहप्राणाःपुनस्तद्दक्षिणकालिकायाजीवइहस्थितःदक्षिणका
लिकायाःसर्वेन्द्रियाणिदक्षिणकालिकायाःवाङ्मनश्चक्षुश्रोत्रप्राणाइहागत्यसुखंचिरन्तिष्ठन्तुस्वाहा॥ इतिजीवन्यासंकृत्वाऋ
ष्यादिन्यासंकुर्यात्॥ अस्यमन्त्रस्यभैरवऋषिरुष्णिक्छन्दोऽमुकदेवताह्रीँबीजंहुँशक्तिःआद्यबीजंकीलकंअभिष्टसिद्धयर्थे
विनियोगः॥ अन्यभिन्नयअनामयाशिरसावाभैरवऋषयेनमः॥ उष्णिक्छन्दसेनमःमुखे॥ अमुकदेवतायैनमःहृदि॥
ह्रीँबीजायनमःइतिगुह्ये॥ हुँशक्तयेनमःइतिपादयोः॥ आद्यबीजकीलकायनमःसर्वाङ्गे॥ विन्यस्यकराङ्गन्यासौकुर्यात्॥
नद्यथा॥ ॐह्रांक्रांअङ्गुष्ठाभ्यांनमः॥ अङ्गुल्योः॥ ॐह्रीँक्रीँतर्जनीभ्यांनमः॥ तर्जन्योः॥ ॐक्रैँमध्यमाभ्यांनमः॥ मध्यमयोः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतन्त्र. ॐ ह्रूँ कँ अनामिकाभ्यां नमः॥ अनामिकयोः॥ ॐ क्रौँ कनिष्ठाभ्यां नमः॥ कनिष्ठयोः॥ ॐ कः करतलकरपृष्ठाभ्यां नमः॥ करतलपृष्ठयोः
१८ इति विन्यस्य॥ ॐ क्रां हृदयाय नमः॥ ॐ क्रीं शिरसे स्वाहा॥ ॐ क्रूँ शिखायै वषट्॥ मुष्टिं च ध्यात्वा धो मुखाङ्गुष्ठेन॥ ॐ क्रैँ कवचाय हुँ॥
व्यस्तहस्तद्वयाङ्गुलिभिः॥ ॐ क्रौँ नेत्रत्रयाय वौषट्॥ तर्जनीमध्यमानामिकाभिः॥ नेत्रयोः॥ ॐ क्रः अस्त्राय फट्॥ तर्जनीमध्यमा॰
भ्यां ऊर्ध्वाधः तालत्रयेण च्छोटिकादिभिर्दिग्बन्धनं कुर्यात्॥ ॐ ठं हृदि॥ ऐं ठं दक्षिणभुजे॥ गाँ ठं दक्षिणपादे॥ इति विन्यस्य मातृकान्या
सं कुर्यात्॥ तद्यथा॥ सम्पूर्णेन्दुप्रसुभ्रां सकललिपिमयीं लोलवक्त्रां त्रिनेत्रां लम्बाङ्गुलरं भूषां शशिमुकुटजटाजूटयुक्तां प्रसन्ना
म्॥ पुस्तकं स्रक्पूर्णकुम्भान् वरमपि दधतीं शुक्लपाशाम्बराभ्यां वाग्देवीं पद्मवक्त्रां कुचभरनमितां चिन्तये साधकेन्द्रः॥ इति ध्या
त्वा॥ मातृकामन्त्रस्य ब्रह्मर्षिर्गायत्रीच्छन्दो मातृकादेवता हलो बीजानि स्वराः शक्तयः अव्यक्तं कीलकं पापक्षयविनियोगः॥ इति
पठित्वा॥ ब्रह्मणे ऋषये नमः शिरसि॥ गायत्रीच्छन्दसे नमः मुखे॥ मातृकादेवतायै नमः हृदि॥ हलो बीजेभ्यो नमः गुह्ये॥ स्वराः
शक्तिभ्यो नमः पादयोः॥ अव्यक्तकीलकाय नमः सर्वाङ्गे॥ इत्यनामप्यविन्यस्य॥ अं कं खं गं घं ङं आं हृदयाय नमः॥ इति तर्जनीम १८

ध्यमानामिकाभिः॥ इं चं छं जं झं ञं ईं शिरसे स्वाहा॥ तर्जनीमध्यमाभ्यां शिरसि॥ उं टं ठं डं ढं णं ऊं शिखायै वषट्॥ बद्धमुष्ट्या धोमुखा
ङ्गुष्ठेन शिखायाम्॥ एं तं थं दं धं नं ऐं कवचाय हुँ॥ व्यस्तहस्ताङ्गुलिभिः॥ कवचे॥ ओं पं फं बं भं मं औं नेत्रत्रयाय वौषट्॥ तर्जनीमध्यमा
नामाभिः नेत्रयोः॥ अं यं रं लं वं शं षं सं हं लं क्षं अः अस्त्राय फट्॥ तर्जनीमध्यमाभ्यामूर्ध्वाधः तालत्रयं दत्वा॥ इति षडङ्गं न्यस्य॥ ॐ अं
नमः ललाटे॥ अनामामध्यमाभ्याम्॥ ॐ आं नमः मुखवृत्ते मध्यमानामिकाभिः॥ ॐ इं ईं दक्षिणवामनेत्रयोस्तर्जन्यनामाभ्याम्
ॐ उं ऊं दक्षिणवामकर्णयोरङ्गुष्ठेन॥ ॐ ऋं ॠं नमः दक्षिणवामनासिकयोः कनिष्ठाङ्गुष्ठाभ्याम्॥ ॐ ऌं ॡं दक्षिणवामगण्डयोः
ॐ एं ऐं नमः ऊर्ध्वाधोऽधरयोः मध्यमया॥ ॐ ओं औं ऊर्ध्वाधो दन्तपङ्क्त्योः अनामया॥ अं नमः शिरसि मध्यमया॥ अः नमः मुखे म॰
मया॥ ॐ कं नमः दक्षिणबाहुमूले॥ ॐ खं नमः कूर्परे॥ ॐ गं नमः मणिबन्धे॥ ॐ घं नमः अङ्गुलीमूले॥ ॐ ङं नमः अङ्गुल्यग्रे॥ ॐ चं
नमः वामबाहुमूले॥ ॐ छं नमः कूर्परे॥ ॐ जं नमः मणिबन्धे॥ ॐ झं नमः अङ्गुलीमूले॥ ॐ ञं नमः अङ्गुल्यग्रे॥ ॐ टं दक्षिणपाद
मूले॥ ॐ ठं मध्ये॥ ॐ डं गुल्फे॥ ॐ ढं अङ्गुलीमूले॥ ॐ णं अङ्गुल्यग्रे॥ ॐ तं वामपादमूले॥ ॐ थं॥ ॐ दं॥ ॐ धं॥ ॐ नं

कालीतन्त्र. दक्षिणवत्॥ ॐ पं परस्पपार्श्वे॥ ॐ फं वामपार्श्वे॥ ॐ बं पृष्ठे कनिष्ठानामिकाभिः॥ ॐ भं कनिष्ठानामिकाङ्गुष्ठैः॥ नाभौ॥ ॐ मं कु
१९ क्षौ कनिष्ठानामिकामध्यमातर्जन्यङ्गुष्ठैः॥ ॐ यं हृदि करतलेन॥ ॐ रं दक्षिणांसे करतलेन॥ ॐ लं ककुदि करतलेन॥ ॐ वं न
मः वामांसे करतलेन॥ ॐ शं हृदादिदक्षिणकराङ्गुलीपर्यन्तं करतलेन॥ ॐ षं हृदादिवामकराङ्गुल्यपर्यन्तं करतलेन॥ ॐ सं
हृदादिदक्षिणपदाङ्गुल्यपर्यन्तं करतलेन॥ ॐ हं हृदादिवामपादाङ्गुल्यपर्यन्तं करतलेन॥ ॐ लं हृदाद्युदरे करतलेन॥ ॐ क्षं
हृदयान्मुखपर्यन्तं करतलेन॥ इति मातृकान्यासः॥ श्रीकण्ठन्यासं कुर्यात्॥ तद्यथा॥ ॐ अं श्रीकण्ठपूर्णादेवीभ्यां नमः ललाटे॥
ॐ आं अनन्तविजयाय नमः मुखवृत्ते॥ ॐ इं सूक्ष्मेशशाल्मलीभ्यां नमः दक्षाक्षिणि॥ ॐ ईं लोलाक्षिभ्यां नमः वामाक्षिणि॥ ॐ
उं अमरेश्वरलोलाक्षिभ्यां नमः दक्षकर्णे॥ ॐ ऊं अर्घीसदीर्घघोणाभ्यां नमः वामकर्णे॥ ॐ ऋं भारभूतीशदीर्घमुखीभ्यां नमः
दक्षनासायाम्॥ ॐ ॠं अतिथीशगोमुखीभ्यां नमः वामनासायाम्॥ ॐ ऌं स्थाण्वीशदीर्घजिह्वाभ्यां नमः दक्षगण्डे॥ ॐ ॡं हरकुण्डो
दरीभ्यां नमः वामगण्डे॥ ॐ एं झिण्टीशऊर्ध्वकेशीभ्यां नमः ओष्ठे॥ ॐ ऐं भौतिकेशविकृतमुखीभ्यां नमः अधरे॥ ॐ ओं सद्योजा १९

तज्वालामुखीभ्यां नमः ऊर्ध्वदन्ते॥ ॐ औं अनुग्रहेशमहाकालीभ्यां नमः अधोदन्ते॥ ॐ अं अक्रूरेशसुमुखीभ्यां नमः शिरसि॥ ॐ
अः विसेनमहाविद्यामुखीभ्यां नमः मुखे॥ कं क्रोधीशमहाकालीभ्यां नमः दक्षांसे॥ खं चण्डेशसरस्वतीभ्यां नमः कूर्परे॥ गं प॰
ञ्चान्तकेशगौरीभ्यां नमः मणिबन्धे॥ घं शिवोत्तमेशत्रैलोक्यवन्द्याभ्यां नमः अङ्गुलीमूले॥ ङं एकरुद्रेशमन्त्रशक्तिभ्यां नमः
अङ्गुल्यग्रे॥ चं कूर्मेशआत्मशक्तिभ्यां नमः वामाङ्गे॥ छं एकनेत्रेशभूतमातृभ्यां नमः कूर्परे॥ जं चतुराननेशलम्बोदरीभ्यां न॰
मः मणिबन्धे॥ झं अजेशद्राविणीभ्यां नमः अङ्गुलीमूले॥ ञं सर्वेशनागरीभ्यां नमः अङ्गुल्यग्रे॥ टं सोमेशखेचरीभ्यां नमः द
क्षोरुमूले॥ ठं अङ्गुलीशमञ्जरीभ्यां नमः वामोरुमूले॥ डं दारुकेशरूपीभ्यां नमः गुल्फे॥ ढं अर्द्धनारीशवारुणीभ्यां नमः अङ्गुली
मूले॥ णं उमाकान्तेशकण्ठदेवीभ्यां नमः अङ्गुल्यग्रे॥ तं आषाढीशपूतनाभ्यां नमः वामोरुमूले॥ थं दण्डीशभद्रकालीभ्यां॰
नमः मध्ये॥ दं अत्रीशयोगिनीभ्यां नमः गुल्फे॥ धं मनेशशङ्खिनीभ्यां नमः अङ्गुलीमूले॥ नं मखेशगर्जनीभ्यां नमः अङ्गुल्यग्रे॥
पं लोहितेशकालरात्रीभ्यां नमः दक्षपार्श्वे॥ फं शिखीशकुब्जिनीभ्यां नमः वामपार्श्वे॥ बं छगलण्डेशकपर्दिनीभ्यां नमः पृष्ठे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतत्व. ऐंनिरञ्जनचिराणीभ्यांनमःनाभौ॥ मैंमहाकालजयाभ्यांनमःउरो॥ यंवाणीभस्मवेदाभ्यांनमःहृदि॥ रंभुजङ्गरेवतीभ्यां
२० नमःदक्षस्कन्धे॥ लंपिनाकीशाम्भवीभ्यांनमःककुदि॥ वंखड्गीशावायवीभ्यांनमःवामस्कन्धे॥ शंरकेशनायवीभ्यांनमःहृदा
श्री. दिदक्षकराङ्गुल्यपर्यन्तम्॥ षंश्वेतेशारस्कोविदवलीभ्यांनमःहृदादिवामकराङ्गुल्यपर्यन्तम्॥ संमृडीशसहजाभ्यांनमःहृदा श्री.
दिदक्षपादाङ्गुल्यग्रपर्यन्तम्॥ हंनन्दनीशलक्ष्मीभ्यांनमःवामपादाङ्गुल्यग्रपर्यन्तम्॥ लंशिवव्यापिनीभ्यांनमःउदरादिहृत्
पर्यन्तम्॥ क्षंसम्वर्तेशमहामायाभ्यांनमःहृदादिमुखपर्यन्तम्॥ इतिश्रीकण्ठन्यास॥ षट्न्यासात्मकंषोढान्यासंकुर्यात्॥
यथा॥ प्रथमंमातृकान्यासंविधायतेषुस्थानेषु॥ श्रींऐंश्रींअंनमः॥ ललाटे॥ श्रींऐंश्रींरंनमोमुखवृत्ते॥ एवंक्रमेणमातृका
वद्विन्यसेत्॥ क्लींश्रींक्लींश्रींक्लींश्रींनमःललाटे॥ क्लींश्रींहुंनमःमुखवृत्ते॥ एवंक्रमेणन्यसेदितितृतीयोन्यासः॥ हुंश्रींहुंश्रींहुंश्रीं
हुंश्रींलंनमोमुखवृत्ते॥ इतिक्रमेणन्यसेदितिचतुर्थः॥ मूलंह्रांह्रांस्रांस्रांक्रूंमूलंह्रांह्रांस्रांस्रांक्रूंमूलंह्रांह्रांस्रांस्रांक्रूंनमोललाटे॥
मूलंह्रांह्रांस्रांस्रांक्रूंमूलंह्रांह्रांस्रांस्रांक्रूंमूलंह्रांह्रांस्रांस्रांक्रूंनमोमुखवृत्ते॥ एवंक्रमेणन्यसेदितिपञ्चमः॥ अनुलोमविलोमाभ्यां २०

मातृकास्थानेकेवलंमूलंविन्यस्याषोढान्यासःशंव्यापकंव्यस्तहस्ताभ्यांमातृकामुद्राभिर्न्यसेदितिषष्ठः॥ इतिषोढान्यासः॥ ततस्तत्त्वन्या
संकुर्यात्॥ तद्यथा॥ मूलाद्यखण्डान्तेआत्मतत्त्वायनमः॥ पादादिनाभिपर्यन्तं॥ द्वितीयमूलखण्डान्तेविद्यातत्त्वायनमः॥
नाभ्यादिहृत्पर्यन्तम्॥ तृतीयमूलखण्डान्तेशिवतत्त्वायनमः॥ हृदादिशिरपर्यन्तंन्यसेदिति॥ इतितत्त्वन्यासः॥ ततोबीजन्यासंकु
र्यात्॥ आद्यबीजंब्रह्मरन्ध्रे॥ द्वितीयं⸺ तृतीयंभालेचतुर्थंनाभौपञ्चमंगुह्येषष्ठंनङ्केसप्तमंसर्वाङ्गेविन्यस्यव्यापकंकुर्यात्॥ य
थापञ्चधानवधाशतधावामूलमुच्चरन्व्यस्तहस्ताभ्यांन्यसेदिति॥ न्यासजालंविधाययथोक्तविधिनायन्त्रराजंनिर्माय पुरोव
र्तिनिपीठेनिधायेत्पीठपूजांकुर्यात्॥ यथा॥ ॐह्रींआधारशक्त्यैनमः॥ ॐप्रकृत्यैनमः॥ ॐकूर्मायनमः॥ ॐअनन्तायर
ॐसुधाम्बुधयेर॥ ॐमणिद्वीपायनमः॥ ॐचिन्तामणिगृहायर॥ ॐश्मशानायर॥ ॐपारिजातायर॥ ॐरत्नवेदिकायैर॥ तदु
परिमणिपीठायर॥ चतुर्दिक्षुॐनानामुनिभ्योर॥ ॐनानादेवेभ्योर॥ परितःॐबहुमांसास्थिमोदमानशिवाभ्योर॥ ॐसर्वे
भ्योदेवेभ्योर॥ ॐशवमुण्डेभ्योर॥ पूर्वादिचतुष्टये॥ ॐधर्मायर॥ ॐज्ञानायर॥ ॐवैराग्यायर॥ ॐऐश्वर्यायर॥ चतुष्पादि

कालीतत्व. ॐधर्मायनमः॥ ॐअज्ञानायर॥ ॐअवैराग्यायर॥ ॐअनैश्वर्यायर॥ मध्ये॥ ॐअनन्तायर॥ ॐपद्मायर॥ ॐअंअर्कमण्डला
२१ यर॥ ॐसंसोममण्डलायर॥ ॐवह्निमण्डलायर॥ ॐसंसत्त्वायर॥ ॐरंरजसेर॥ ॐतंतमसेर॥ ॐआंआत्मनेर॥ ॐअंअन्तरात्म
नेर॥ ॐपंपरमात्मनेर॥ ॐह्रींज्ञानात्मनेर॥ अष्टदलेपूर्वादितः॥ ॐइच्छायैर॥ ॐक्रियायैनमः॥ ॐकामिन्यैर॥ ॐरत्यैर॥ ॐर
न्तेर॥ ॐपंपरमात्मनेर॥ ॐ...
निप्रियायैर॥ ॐआनन्दायैर॥ ॐकर्णिकायैर॥ ॐमनोन्मन्यैर॥ मध्ये॥ ऐंपरायैर॥ ॐअपरायैर॥ ॐमणिपीठायर॥ मणि
पीठोपरि॥ ह्सौःसदाशिवमहाप्रेतपद्मासनायर॥ इतिमणिपीठंसम्पूज्यघटस्थापनंकुर्यात्॥ यथास्ववामेषट्कोणान्तर्गतं
विन्दुत्रिकोणव्यवाह्यवृत्तंचतुरस्रंकृत्वासामान्यार्घोदकेनाभ्युक्ष्य॥ ॐह्रींआधारशक्तिभ्योनमः॥ इतिसम्पूज्यनमइतिआधा
रंप्रक्षाल्यमण्डलंस्थाप्य॥ मंवह्निमण्डलायदशकलात्मनेनमः॥ इतिसम्पूज्यअस्त्रायफट्इतिघटंप्रक्षाल्यरक्तवस्त्रमं
त्यादिनाभूषयित्वा॥ ओमितिमन्त्रेणत्रिपदिकोपरिदेवीबुद्ध्यासंस्थाप्य॥ ॐअंअर्कमण्डलायद्वादशकलात्मनेनमः॥ इतिघ
टंसम्पूज्यमूलमुच्चरन्कारणेनघृतेनतैलेनदुग्धेनदधितक्रेणवासंपूर्य॥ उंसोममण्डलायषोडशकलात्मनेनमः॥ इतिसम्पू २१

ज्य॥ फट्इतिदर्भैःसंताड्य॥ हुमित्यवगुण्ठ्यमूलात्तेनैवाभ्युक्ष्यतेनैवत्रिभागन्यमासायपुष्पेणसहओमितिमन्त्रेणकुम्भेनिःक्षि
प्यकारपुरस्परशापमोचनंकृत्वाद्रव्यशुद्धिंतत्वोक्तप्रकारेणसंशोध्यशंखस्थापनंकुर्यात्॥ यथाङ्कारत्रिकोणवृत्तषट्कोणाच
तुरस्रमण्डलंनिर्मायचतुरस्रेचतुरेखायाम्॥ ॐपूर्णशैलायनमः॥ ॐउड्डीयानायर॥ ॐजालन्धरायर॥ ॐकामरूपायर॥ इ
तिपूर्वादितःसम्पूज्य॥ षट्कोणेहृदयायनमः॥ इतिक्रमेणषडङ्गंसम्पूज्यमूलखण्डत्रयेणत्रिकोणस्याग्रदक्षिणोत्तरांसम्पूज्य
ॐह्रींआधारशक्त्यैनमः॥ इतिसम्पूज्य॥ त्रिकोणेषट्कोणेवृत्तभूषिताम्यत्रिकांतत्रसंस्थाप्यनमःसामान्यार्घोदकेनाभ्युक्ष्य
वह्नेर्दशकलांपूजयेत्॥ यथा॥ यंधूम्रार्चिषेनमः॥ रंऊष्मायर॥ लंज्वलिन्यैर॥ वंज्वालिन्यैर॥ शंविस्फुलिङ्गिन्यैर॥ षंसुश्रि
यैर॥ लंकपिलायैर॥ हंहव्यवाहनायैर॥ क्षंकव्यवाहनायैर॥ इतिसम्पूज्य॥ मंवह्निमण्डलायदशकलात्मनेनमः॥ इति
षट्कोणेषडङ्गंसम्पूज्य॥ मध्येव्यस्तहस्तमूलमन्त्रेणदेवींसम्पूज्य॥ फट्इतिमन्त्रेण॥ अर्घपात्रंप्रक्षाल्यत्रिपदिकोपरिसंस्थाप्य
तत्रसूर्यमण्डलंपूजयेत्॥ तद्यथा॥ कंभंतपिन्यैर॥ खंबंतापिन्यैर॥ गंफंधूम्रायैर॥ घंपंमरीच्यैर॥ ङंनंज्वालिन्यैर॥ चंधं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतन. रुच्यै २॥ ढैं दैं सुसुम्नायै २॥ जैं थैं भोगदायै २॥ झैं नैं विश्वायै २॥ जैं गौं रोधिन्यैनमः॥ ठैं ठैं धारिण्यै २॥ इत्यर्कमण्डलं सम्पूज्य॥ अ
२२ थवा अर्कमण्डलाय द्वादशकलात्मने २॥ इत्यर्कमण्डलं सम्पूज्य॥ त्रिकोणवृत्तषट्कोणार्घपात्रेमध्ये विलिख्य व्यस्त हस्तमू
लमन्त्रेण त्रिकोणांसम्पूज्य षट्कोणेषडङ्गं पूजयित्वा वामितिमूलमन्त्रं विलोममातृकाश्च पवनघटस्य कारणाद्यमृतेनत्रिमा
गमाप्यर्घ्यजलेन भागैकं संपूर्य दूर्वाक्षत रक्तपुष्पादिनासुगन्धिद्रव्याणि तत्र निःक्षिपेत्॥ ततः सोमकलाः संपूजयेत्॥ तद्य
था॥ अं अमृतायै २॥ आं मानदायै २॥ इं पूषायै २॥ ईं तुष्ट्यै २॥ उं पुष्ट्यै २॥ ऊं रत्यैनमः॥ ऋं धृत्यै २॥ ॠं शशिन्यै २॥ ऌं चन्द्रिकायै २
ॡं कान्त्यै २॥ एं ज्योत्स्नायै २॥ ऐं श्रियै २॥ ओं प्रीत्यै २॥ औं आनन्दायै २॥ अं पूर्णायै २॥ अः पूर्णामृतायैनमः॥ इतिसोममण्ड
लं सम्पूज्य॥ त्रिकोणवृत्तषट्कोणान्तमध्ये कुङ्कुमेन लिखित्वा त्रिकोणेरेखायां. अ १६ कं १६ थं १६ इति विलिख्य मूलखण्डत्र
येण त्रिकोणांसम्पूज्य षट्कोणे षडङ्गं पूजयित्वा गङ्गे चेति मन्त्रेण अङ्कुशमुद्रया सूर्यमण्डलात्तीर्थमावाह्य आं भैरवानन्दभैरवी
नन्त्रेण सम्पूज्य पूर्वादिक्रमेण पञ्चरत्नं पूजयेत्॥ तद्यथा॥ श्रूं गगनरत्नेभ्यो २॥ म्लूं स्वर्गरत्नेभ्यो २॥ ह्लूं पातालरत्नेभ्यो २ २२

म्लूं मर्त्यरत्नेभ्योनमः॥ म्लूं मध्यरत्नेभ्यो २॥ इति सम्पूज्य आं खस्वख्येति द्वितीया अनिष्ध चक्र तत्त्वोक्तक्रमेण अङ्कुशगोलोद्भवमुत्पाद्य संशो
ध्य मांसं मत्स्यं मुद्रां च शुद्धिं तत्त्वोक्तप्रकारेणसंशोध्य निःक्षिप्य कुम्भिन्यवगुण्ठ्य धेनुमुद्रयामृतीकृत्य तालत्रयं दिग्बन्धनं कृ
त्वा तदुपरि मूलं संजप्य सामान्यार्घपात्रवत्पात्राणि पातयेत्॥ यथार्घ्यं समीपे गुरुपात्रं भैरवपात्रं ततो वीरपात्रं ततः शक्तिपा
त्रं ततो योगिनीपात्रं ततो बलिपात्रं ततः पाद्यपात्रं तत आचमनीयपात्रं ततो देवीपात्रं इति क्रमेण स्थापयित्वा सर्वपात्रेषु शु
द्धद्रव्यं निःक्षिप्य विन्दुं गुरुपात्रामृतेन तत्त्वमुद्रया स्वशिरसि अमुकानन्दनाथपादुकां तर्पयामीति त्रिः सन्तर्प्य आत्मानं पूजो
पकरणं चाभ्युक्ष्य सर्वं ब्रह्ममयं विभाव्य पूजामारभेत्॥ यथा चक्रस्य पूर्वदिशि त्रिकोणवृत्तं विलिख्य॥ ऐं ह्रीं हुं मण्डलाय नमः
इतिमण्डलं सम्पूज्य॥ वामे वटुकाय २॥ इति वाग्भादि मिरभ्यर्च्य बलिमुपनीय बलिपात्रामृतेन एह्येहि देवीपुत्र वटुकनाथ कपि
लजटाभासुर त्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय सर्वोपचारं बलिं गृह्ण २ स्वाहा॥ एष बलि वटुकाय नमः॥ इति वामाङ्गुष्ठेनानामिका
भ्यां उत्सृज्य दक्षिणादिशि पूर्वेन मण्डलं विलिख्याभ्यर्च्य योगिनीपात्रामृतेन बलिमुपनीय॥ ऊर्ध्वं ब्रह्माण्डतो वा दिवि गगनतलेभू

कालीतन. तलेनिष्कलेवापाताले वा वने वा सलिलपरिनमोर्यत्र कुत्रस्थिते वा॥ क्षेत्रे पीठोपपीठे दिशु च परिधृतं धूपदीपादिकेन शीता देव्यासद्
२३ नः शुभ्रबलिविधिनापातुवीरेन्द्रवन्द्याः॥ यां योगिनीभ्यः स्वाहा॥ सर्वयोगिनी हुं फट् स्वाहा॥ एष बलि योगिनीभ्यो नमः॥ इति तत्त्वमु
द्रयावलिपात्रामृतेन॥ क्षां क्षीं क्षूं क्षैं क्षौं क्षः स्थान क्षेत्रपाल धूपदीपसहितं बलिं गृह्ण २ स्वाहा॥ एष बलिः क्षेत्रपालाय नमः॥ इति ब
लिं दत्वा पूर्ववन्मण्डलं विलिख्याभ्यर्च्य गणेशबलिमभ्यर्च्य गां गीं गूं गणपतये वर २ सर्वजनमेवसमानय २ बलिं गृह्ण २ स्वाहा॥
एष बलि गणपतयेनमः॥ इति बलिं दत्वा स्ववामे चतुरस्रमण्डलं कृत्वा पूर्ववत्सम्पूज्य तत्र साधारणबलिं संस्थाप्य मूलेनाभि
मन्त्र्य धूपादिना सर्वभूतं सम्पूज्य. ऐं ह्रीं सर्वविघ्नकृद्भ्यः हुं फट् स्वाहा॥ एष बलि सर्वभूतेभ्योनमः॥ इति तत्त्वमुद्रया बलिपात्रामृ
तेनोत्सृज्य॥ चक्रप्रेतासनोपरि मूलेन मूर्त्तिं विचिन्त्य आत्मानं कामकलारूपं विभाव्य करकच्छपिकया पुष्पादिकं गृहीत्वा मूलाधा
रात् कुण्डलिनीं ब्रह्मपथेन शिरोरन्ध्रं विभाव्य तत्रस्थामृतेन लोलीभूतां हृदयपङ्कजे समानीय तत्तदभेदेन मूलदेवीं अञ्जनाद्रिनिभा
मित्यादिक्रमेण ध्यात्वा क्रमेण वायुबीजेन वामनासया वाह्यकरस्थपुष्पेष्ववरोप्य॥ देवेशि भक्तिसुलभे परिवारसमन्विते॥ २३

यावत्वां पूजयिष्यामि तावद्देवि इहावह॥ इति मन्त्रं पठन् तत्पुष्पं कल्पितमूर्त्तौ निधाय आवाहनमुद्रया महाकालसहिते अमुकदे
वी इहावह २ इत्यावाह्य स्थापनमुद्रया इह तिष्ठ २ इति संस्थाप्य सन्निधापनमुद्रया इह सन्निधेहि इति सन्निधाप्य निरोधनीमुद्रया
सन्निरुध्यस्व २ इति सन्निरुध्य अङ्कुशेन तेलिह मुद्रया वा जीवन्न्यासं विधाय कुम्भिन्यवगुण्ठ्य षडङ्गेन सकलीकृत्य छोटिकाभिर्द
शदिग्बन्धनं विधाय धेनुमुद्रया अमृतीकरणं च कृत्वा ॐ आगतं कुशेन मिदमासनमास्यतां मिन्यम्भिन्यं योनिमुद्रां खण्डमुद्रां
प्रदर्श्य अभीष्टासु रवायुमध्ये दिक्षु च षडङ्गं च पूजयित्वा पञ्चदशकोणेषु कालाद्यादि पञ्चदशदेवीयथोक्तक्रमेण ध्यात्वा स्वस्वे
ह्लादपावनदेवीय थोक्तक्रमेण विभाव्य मूलमन्त्रमुच्चार्य ॐ महाकालसहिते अमुकदेवी सायुधे सपरिवारे मानस्त्रूप्यतामि
ति देवीपात्रामृतेन त्रिः सन्तर्पयित्वा मूलेन एतत्पाद्यं महाकालसहितायै अमुकदेव्यैनमः॥ इतिपाद्यपात्रामृतेन पाद्यं द
त्वा पादयोः॥ मूलमुच्चार्य इदमर्घ्यं स्वाहा शिरसि पात्रामृतेनार्घ्यं मूलेन महाकालसहितायै अमुकदेव्यै एष मधुपर्कः स्वाहेति मुखेद
त्वा आचमनीयमप्येवं दत्वा मूलेन स्नानीयं नमः॥ इति सर्वाङ्गे दत्वा गन्धमप्येवं दत्वा मूलेन महाकालसहितायै अमुकदेव्यै पु

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

याणि॥ वोषडितिवारत्रयंपुष्पाणिदद्यात्॥ मूलेनाधिनिवेदयामि॥ इति धूपदीपाभरणवस्त्रादिकंदत्वा आचमनीयपात्रामृतेनपुनराच
मनीयंदत्वापुनरग्रत्रिकोणचतुरस्रंनिर्माय नैवेद्यपात्रंमण्डलोपरिसंस्थाप्यनत्वमुद्रयासंस्पृश्यवलिपात्रामृतेनमूलमन्त्रेण॥
महाकालसहितायैअमुकदेव्यैनैवेद्यमिदंनिवेदयामीतिनिवेद्यतत्वमुद्रयापुनराचमनीयंदत्वामहाकालसहितायैअमुक
देव्यैताम्बूलमिदंकर्पूरादिसहितंनिवेदयामीतिनिवेद्य॥ देवीदक्षिणभागेमहाकालभैरवंपूजयित्वाभैरवपात्रामृतेनसन्तर्प्य
गुरुपङ्क्तिंपूजयेत्॥ तद्यथा॥ देवीदक्षिणभागेवायव्यादीशानपर्यन्तंपङ्क्तिक्रमेणविभाव्य॥ महत्येवंवायैनमः॥ महादेवानन्द
नाथाय २॥ ॐत्रिपुराम्बायै २॥ इतिदिव्यौघगुरून्पाद्यादिभिःसम्पूज्यगुरुपात्रामृतेनत्रिःसकृत्तत्वमुद्रयासन्तर्प्य॥ ॐपूर्णा
नन्दनाथायनमः॥ ॐवलचित्तानन्दनाथाय २॥ ॐचलाचलनाथाय २॥ ॐकुमारानन्दनाथाय २॥ ॐक्रोधानन्दनाथाय २॥ ॐ
रदानन्दनाथाय २॥ ॐस्मरदीपानन्दनाथाय २॥ ॐमायाम्बायै २॥ ॐमायावत्याम्बायै २॥ इतिसिद्धौघगुरून्पाद्यादिभिःसम्पू
ज्यगुरुपात्रामृतेनतत्वमुद्रयात्रिःसकृद्वासन्तर्प्य॥ ॐविमलानन्दनाथायनमः॥ ॐमीनानन्दनाथाय २॥ ॐगोरक्षानन्दनाथाय २४

नमः॥ ॐभोजदेवानन्दनाथाय २॥ ॐप्रजापत्यानन्दनाथाय २॥ ॐविश्वदेवानन्दनाथाय २॥ ॐहुताशनानन्दनाथाय २॥ ॐसमयानन्द
नाथाय २॥ ॐसत्तोषानन्दनाथाय २॥ इतिमानवौघगुरून्पाद्यादिभिःसम्पूज्यगुरुपात्रामृतेनतत्वमुद्रयासन्तर्प्यपञ्चदशकोणे
षुपञ्चदशदेवीःपूजयेत्॥ यथाप्रथमतः॥ सर्वाग्रेपामाद्यादिक्रमेणध्यात्वासंमुखकोणे॥ ॐनमःमहाकाल्यै॥ वामकोणे॥ ॐ
कपालिन्यै २॥ दक्षिणकोणे कुल्लायै २॥ इतिसम्पूज्य॥ योगिनीपात्रामृतेनत्रिःसकृत्तत्वमुद्रयासन्तर्प्य॥ कुरुकुल्लाविरोधिनींवि
प्रचित्तांसम्पूज्य॥ तदन्तस्त्रिकोणे॥ ॐश्रींउग्रप्रभादीप्तांपूर्ववत्सम्पूज्यसन्तर्प्यततस्त्रिकोणे॥ नीलांघनांवलाकांसम्पूज्यसन्तर्प्य
॥ तदन्तस्त्रिकोणेमात्रांमुद्रांमितांपूर्ववत्सम्पूज्य॥ अष्टदलेष्वष्टशक्तिर्ध्यात्वापूजयेद्यथा॥ पूर्वदले॥ ॐआंब्रह्माण्यैनमः॥ अग्नि
दले॥ ॐईंनारायिण्यै २॥ दक्षदले॥ ॐऊंमाहेश्वर्यैनमः॥ नैरृतिदले॥ ॐऋंचामुण्डायै २॥ वरुणदले॥ ॐऌंकौमार्यै २॥ वायुदले
ॐऐंअपराजितायै २॥ उत्तरदले॥ ॐऔंवाराह्यै २॥ ईशानदले॥ ॐअःनारसिंह्यै २॥ इतिपाद्यादिभिःसम्पूज्ययोगिनीपात्रामृतेन
त्रिःसकृत्तत्वमुद्रयासन्तर्प्य॥ अष्टदलाग्रेष्वष्टभैरवान्पूजयेत् यथापूर्वदलाग्रे॥ ॐऐंह्रींअसिताङ्गभैरवायनमः॥ ॐऐंह्रीं

वरदभैरवाय २॥ ॐऐंह्रींचण्डभैरवाय २॥ ॐऐंह्रींक्रोधभैरवाय २॥ ॐऐंह्रींउन्मत्तभैरवाय २॥ ॐऐंह्रींकपालभैरवाय २॥ ॐऐंह्रींभीष
णभैरवाय २॥ ॐऐंह्रींसंहारभैरवाय २॥ ॐऐंह्रींसङ्कर्षणभैरवाय २॥ इतिक्रमेणपाद्यादिभिःसम्पूज्यभैरवपात्रामृतेनत्रिःसकृ
त्तत्वमुद्रयासन्तर्प्य॥ ततःदिक्पालान्सम्पूजयेत्॥ ॐऐंह्रींइन्द्रायसुराधिपतयेश्यामवर्णायऐरावतासनायनमः इतिसम्पूज्य॥
रंवह्नयेतेजोधिपतयेछागवाहनायशक्तिहस्ताय २॥ इतिसम्पूज्य॥ यंयमायमहिषवाहनायदण्डहस्ताय २॥ इतिपूर्ववत्सम्पू
ज्य॥ नैरृतिदिशि॥ नैरृतयेअश्ववाहनायखड्गहस्ताय २॥ इतिसम्पूज्य॥ वंवरुणायजलाधिपतयेमकरवाहनायपाशहस्ता
य २॥ इतिपूर्ववत्सम्पूज्य॥ वायव्ये॥ यंवायव्येवाय्वाधिपतयेमृगवाहनायअङ्कुशहस्ताय २॥ इतिपूर्ववत्सम्पूज्य॥ उत्तरे॥ कुं
कुवेरायनरवाहनायगदाहस्ताय २॥ इतिपूर्ववत्सम्पूज्य॥ हौंईशानायभूताधिपतयेशूलहस्तायवृषवाहनाय २॥ इतिपा॰
द्यादिभिःपूजयित्वा॥ इतिक्रमेणदिक्पालान्ततःदेव्यस्त्राणिपूजयेत्॥ तद्यथा॥ वामोर्ध्वहस्ते॥ ॐखड्गायनमः॥ तदधोहस्ते॥
ॐखड्गायनमः॥ दक्षिणोर्ध्वहस्ते॥ ॐअभयाय २॥ तदधोहस्ते॥ ॐवराय २॥ इतिसम्पूज्यघटस्थद्रव्यंदेव्यैनिवेद्यपुनर्देवींपूज २५

येत्॥ देवीपात्रामृतेनसन्तर्प्यधूपदीपादिकञ्चपुनर्दद्यात्॥ ॐघण्टायनमः॥ इतिघण्टांसम्पूज्य॥ प्राणायामंषडङ्गन्यासंवि
धायमुद्रांप्रदर्श्यमालयावाकरेणवाशेत्तरशतंविंशतिवासञ्जप्यगुह्यादिनमन्त्रेणदेवीवामहस्तेशंखामृतेनसमर्प्ययथा
शक्त्यास्तुत्वापूर्ववदात्वानम्परिवारान्तस्यामेवविलीनांविभाव्य॥ गुरुंस्वशिरसिदेवींहृदयेसमर्प्यवामभागेनिर्माल्यवा
सिनींसम्पूज्यपुष्पंशिरसिनिधायययथासुखंनित्यंविहरेदिति॥ ॥इतिश्रीराघवभट्टविरचितेकालीतत्वेपूजाप्रतिपाद
नंनामपञ्चमतत्वम्॥ ॥अथ द्रव्यशुद्धिविधिरुच्यते॥ तदुक्तंविजयाकल्पे॥ सम्विदासवयोर्मध्येसम्विदेवगरीयसि॥ सा
पुनश्चतुर्विधाचतदुक्तंतत्रैव॥ ब्राह्मणक्षत्रियवैश्यशूद्राश्चेति॥ श्वेतरक्तपीठकृष्णपुष्पभेदतः॥ सम्विदे ब्रह्मसम्भूते ब्रह्मपु
त्रीसदानघे॥ भैरवानाञ्चदत्तार्थंपवित्राभवसर्वदा॥ ॐब्राह्मण्यैनमः॥ स्वाहेतिमन्त्रेणब्राह्मणींशोधयेदिति॥ सिद्धिमूल
क्रियेदेविहीनवोधप्रवोधिनी॥ राजाप्रजावशंकरिशत्रुकण्ठनिसूदनि॥ रैंक्षत्रियायै २॥ स्वाहेतिशोधयेत्परान्ततः॥ अज्ञा
नेधनदीपायेज्ञानाग्नेर्ज्ञानरूपिणी॥ अज्ञानस्याकृतिंप्रीतिंसम्यग्ज्ञानंप्रयच्छमे॥ हूंवैश्यायैनमः॥ स्वाहेतितत्परम्॥ न

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतन्त्र. प्रत्यामिनमस्यामियोगमार्गप्रदर्शिनि॥त्रैलोक्यविजयेमातःसमाधिफलदाभव॥क्लींस्वाहायनमःस्वाहेतिमन्त्रमुत्तमम्॥यः
२६ द्वाकेनैवमन्त्रेणसर्वाशोधयेत्॥तदुक्तंतन्त्रेव॥ॐअमृतेअमृतोद्भवेअमृतवर्षिणिपदस्ततः॥अमृतमाकर्षयेद्वन्द्वंसिद्धिंदेहि
पदस्ततः॥सर्वमेवततोब्रूयात्समानयततःपरम्॥स्थितायंमनुःप्रोक्तःचतुर्णांचैवसाधने॥उत्तरतन्त्रे॥सर्वसाधारणं
प्रकारान्तरेपि॥मूलमन्त्रंसप्तवारंतस्योपरिनियोजयेत्॥आवाहनादिमुद्राश्चधेनुयोनिततःपरम्॥दिव्यध्यानंकोटिकासि
मालत्रयपुरःसरम्॥दिव्यद्रव्यंतथापाणिर्घ्राणैर्विप्रान्विधानयेत्॥सप्तधानर्पयेद्वत्सरसैःक्षूलंसमुच्चरन्॥गुरुरूपेसहस्रा
रेनथानत्वारव्यमुद्रया॥त्रिधैवतर्पयेद्वत्त्यासाधकःसिद्धमानसः॥ऐंवदवदपदूयाह्याम्वादिनीपदंततः॥ममजिह्वायेस्थि
रीतिभवसर्वैपदंततः॥सत्त्ववशंकरीस्वाहामन्त्रेणजुहुयान्मुखे॥इतिविजयाशोधनम्॥अथकुलद्रव्यशुद्धिः॥तत्रादौशाप
मोचनंकुर्यात्॥तदुक्तंकुमारीतन्त्रे॥अन्यच्चशृणुदेवेशियथाकुलादिकर्मणि॥हानीरक्षायनेयेनतान्नेवमन्त्रान्छृणुष्वमे॥
एकमेवपरंब्रह्मस्थूलसूक्ष्मामयंध्रुवम्॥कचोद्भवांब्रह्महत्यांतेनतांनाशयाम्यहम्॥सूर्यमण्डलसंभूतेवरुणालयसम्भवे॥ २६

अमावीजमयेदेविशुक्रशापाद्विमुच्यते॥वेदानांप्रणवोवीजंब्रह्मानन्दमयंयदि॥तेनसत्येनतोदेविब्रह्महत्यांव्यपोहति॥एवं
मन्त्रत्रयेणैवअभिमन्त्र्यंकुलंशुभम्॥पदद्याचरिडकायैचततोनैवेद्यमुद्धरेत्॥वांवींवूंवैंवौंवःब्रह्मशापविमोचितायैसुधादे
व्यैनमः॥इतिदशवारंपठेदिति॥इतिब्रह्मशापविमोचनम्॥ततक्रांक्रींक्रूंक्रैंक्रौंक्रःस्वाहेतिकृष्णशापविमोचनम्॥ततोद्रव्या
नन्दभैरवानन्दभैरव्यौध्यायेत्॥तद्यथा॥कोटिसूर्यप्रतीकाशंचन्द्रकोटिसुशीतलम्॥अष्टादशभुजंदेवंपञ्चवक्त्रंत्रिलोचनम्
अमृतार्णवमध्यस्थंब्रह्मपद्मोपरिस्थितम्॥वृषारूढंनीलकण्ठंसर्वाभरणभूषितम्॥कपालखट्वाङ्गधरंघण्टाडमरुवादिन
म्॥पाशाङ्कुशधरंदेवंगदामुसलकधारिणम्॥खड्गखेटकपट्टीशमुद्गरंशूलदण्डकम्॥विचित्रखड्गकंमुण्डंवराभयपाणिनम्
लोहितंदेवदेवेशंभावयेत्साधकोत्तमः॥एवंध्यात्वा|आनन्दभैरवायवषडित्यानन्दभैरवंवारत्रयम्पूजयेदिति॥भावयेच्च
सुधांदेवींचन्द्रकोटियुतप्रभाम्॥हिमकुन्देन्दुधवलां|पञ्चवक्त्रांत्रिलोचनाम्॥अष्टादशभुजैर्युक्तांसर्वानन्दकरोद्यताम्
प्रहसन्तीविशालाक्षींदेवदेवस्यसंमुखीम्॥एवंध्या|त्वाहसक्षमलवरयूंसुधादेव्यैवौषडितिआनन्दभैरवींसम्पूज्य॥

कालीतन्त्र. द्रव्यमध्येत्रिकोणचक्रंविलिख्य॥वामावर्तेनपश्चिमकोणादारभ्यदक्षिणकोणपर्यन्तंअकारादिषोडशस्वरंदक्षिणकोणादुत्त
२७ रपर्यन्तंकादिषोडशान्तमक्षरंउत्तरादिपश्चिमपर्यन्तंथादिषोडशाक्षरम्॥मध्येहल्लक्षत्रयंविलिख्यततःशिवशक्तिसमागम
द्रव्यमध्येअमृतत्वंविचिन्त्यधेनुमुद्रयाअमृतीकृत्यवामितिवरुणवीजंमूलंचाष्टधापात्रेध्यात्वाजपेदिति॥तदुक्तंस्वतन्त्रतन्त्रे॥
ततश्चभावयेद्द्रव्यंचन्द्रकोटिनिभंप्रिये॥अकथादित्रिपंक्त्यातुहसक्षमध्यमण्डितम्॥पूर्वोक्तयोनिमुद्रायांशिवशक्त्यासमाग
मम्॥अमृतंचिन्तयेद्द्रव्येमष्टधाअमृतंजपेत्॥अष्टधामूलमन्त्रञ्चघटंधृत्वाजपेत्ततः॥एतत्तुकारणंदेविसुरसंघनिसेवितम्॥अ
तएवतस्यनामसुधेतिभुवनत्रये॥तस्यगन्धप्रकाशेनतुलेनगन्धेनकौलिकः॥तत्पूजयेत्सुरांदेवींकालिकांदक्षिणांशिवाम्॥इ
तिद्रव्यशुद्धिः॥ ॥अथमांसशुद्धिः॥मांसंत्रिविधंभवति॥तदुक्तंच्चयामले॥मांसंचत्रिविधंदेविजलखेचरभूचरम्॥गोनरोऽश्व
माहिषवराहाजमृगोद्भवम्॥महामांसाष्टकंप्रोक्तंदेवताप्रीतिकारणम्॥तदभावेनतदनुकल्प॥तदुक्तंसमयाचारे॥लवणाद्र
कपीजातगाभूमसाषपञ्चमम्॥तमुतञ्चमहेशानिमांसंप्रतिनिधिस्मृतम्॥ॐप्रतद्विष्णुस्तवतेवीर्येणमृगोनभीमःकुचरो २७

गिरिष्ठाः॥यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियन्तिभुवनानिविश्वास्वाहेतिमन्त्रेणमांसंशोधयेदिति॥अथमत्स्यशुद्धिः॥तदुक्तंत
त्रैव॥मत्स्यञ्चत्रिविधंप्रोक्तंमुत्तमाधममध्यमम्॥उत्तमंत्रिविधंदेविशालपाठीनरोहिताः॥प्रवीणंकण्टकैर्हीनंतैलाक्तंस्वादुः
संयुतम्॥देव्याःप्रीतिकरश्चैवमध्यमंतदुदीरितम्॥सुशरणानिसर्वाणिअधमान्याहुरुत्तमाः॥ॐत्र्यम्बकंयजामहेसुगन्धिंपु
ष्टिवर्द्धनम्॥उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात्॥इतिमन्त्रेणमत्स्यंशोधयेदिति॥अथमुद्राशुद्धिः॥तदुक्तंकुलार्णवे
जेहेयंमरणान्ताकारंचन्द्रविम्बनिभंशुभम्॥चारुपङ्कमनोहारिशार्करांघृतपूरितम्॥पूजाकालेदेवतायैएषामुद्राःप्रकीर्तिताः॥ॐ
तद्विष्णोःपरमंपदंसदापश्यन्तिसूरयः॥दिवीवचक्षुराततंतद्विप्रासोविपन्यवोजागृवांसःसमिन्धतेविष्णोर्यत्परमंपदम्॥इति
मन्त्रेणमुद्रांशोधयेदिति॥अथकुण्डगोलोद्भवशुद्धिः॥ॐविष्णुर्योनिंकल्पयेतुत्वष्टारूपाणिपिंशतुआसिञ्चतुप्रजापतिर्धा
तागर्भंदधातुगर्भंधेहिसिनीवालीगर्भंधेहिसरस्वतीगर्भंतेअश्विनौदेवावाधत्तांपुष्करस्रजौ॥ह्रूंह्रूंफ्रूंस्फ्रूंस्वाहाअमृतेअमृतोद्भवे
अमृतवर्षिणिअमृतंश्रावयश्रावयस्वाहाइतिमन्त्रेणकुण्डगोलोद्भवोत्पत्तिःपदेकतत्वोक्तप्रकारेणात्याघ्रतेशोधयेदिति॥अथतत्व

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतत्व. शुद्धिः॥ तदुक्तं श्रुतौ॥ ॐ प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा॥ ॐ पृथिव्यप्तेजवा
२८ युआकाशा मे शुध्यन्ताम्॥ ॐ प्रकृत्यहङ्कारबुद्धिमनःश्रोत्राणि मे शुध्यन्तां ज्योतिः॥ ॐ त्वक्चक्षुर्जिह्वाघ्राणवचांसि मे शुध्यन्तां ज्योतिः॥ ॐ
पाणिपादपायूपस्थशब्दा मे शुध्यन्तां ज्योतिः॥ ॐ शब्दस्पर्शरूपरसगन्धाकाशानि मे शुध्यन्तां ज्योतिः॥ ॐ
मनो मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा॥ इति सप्तमन्त्रैः सप्ताभ्यां सर्वाङ्गं मार्जयेदिति॥ दक्षहस्ते त्रिकोणं वि
लिख्य कान्यसदृशीं शुद्धिं त्रिकोणादक्षोत्तरसन्मुखमध्ये तु निधाय वामहस्ताङ्गुष्ठमध्यमानामायोगे स्फां गृहीत्वा मूलमन्त्रेण
ह्रौं स्त्रीं आत्मतत्त्वेन स्थूलदेहं शोधयामि स्वाहा॥ अनेन शुद्धिं स्वीकृत्य ह्रौं श्रीं विद्यातत्त्वेन सूक्ष्मदेहं शोधयामि स्वाहा॥ दक्षिणस्था
स्वीकृत्य ह्रौं श्रीं शिवतत्त्वेन परदेहं शोधयामि स्वाहा॥ उत्तरस्यां ह्रौं श्रीं सर्वतत्त्वेन तत्त्वत्रयश्रयं जीवं शोधयामि स्वाहा॥ अनेन वा
मदक्षिणस्यां शुद्धिं स्वीकृत्य वस्त्रेण हस्तौ विशोध्य हस्ताभ्यां सर्वाङ्गं मार्जयेदिति॥ इति तत्त्वशुद्धिः॥ तदुक्तं कुलतन्त्रे॥ अथ शक्तिशु
द्धिः॥ अभिषेको भवेच्छुद्धिमन्त्रस्योच्चारणाच्छुतौ॥ रतिकाले महेशानि दीक्षाकाले च कन्यका॥ इति शुध्यन्तीति शेषः॥ सुभ्यारेत २८

सावापिजलेन मनुनापि वा॥ सम्भोगे भिषिचेन्नारीं रणे वामन्त्रवर्जिनी॥ आदौ मायां समुच्चार्य त्रिपुरायै समुच्चरेत्॥ नमः श
ब्दं समुच्चार्य इमां शक्तिं ततो वदेत्॥ पवित्रां कुरु शब्दान्ते मम शक्तिं कुरुप्रिये॥ वह्निकान्तां समुच्चार्य शुद्धिमन्त्रः सुरेश्वरि॥ अनेन मनुना
देवि अभि क्तां स्त्रियः सदा॥ रममाणो भमन्नित्यं सर्वसिद्धिमवाप्नुयात्॥ अभिषेकादिति प्रथमं ह्रीं त्रिपुरायै नमः इमां शक्तिं प
वि कुरु मम शक्तिं कुरु स्वाहा॥ इति मन्त्रेण जलादीनां अभिषिञ्चेच्छनैः शनैः स्वाहेत्यन्तं निजं मन्त्रं जपन् रतिं कुर्यादिति॥ रत्यर्थं श
क्तिशुद्धिः॥ दीक्षाकालपूजाकाल इत्यर्थः॥ यत्तां सम्प्रथमं दीक्षार्थं जलादिना उक्तमन्त्रेणाभिषिञ्चेदिति॥ दीक्षार्थं शक्तिशुद्धिः॥
दीक्षिता शक्तिः सदा सर्वकर्मणि शुद्धैव॥ तदुक्तं यामलादौ॥ स्वदीक्षितानु या शक्तिः सैव शुद्धा भवेत्सदा॥ अदीक्षितानु या शक्तिः
मायान्तस्य निवेदयेत्॥ अथवोक्तविधानेन शोधयेच्छक्तिमुत्तमाम्॥ अन्यत्रापि॥ तस्मात्सर्वप्रयत्नेन दीक्षयेच्छक्तिमुत्तमा
म्॥ इत्यादि॥ गुरुवचनावक्तः अभिषेकमन्त्रेणैव स्वाभिन्नवधूः स्वमन्त्रेण मायावीजेन वा दीक्षयेत् इत्येव शुद्धिः॥ मतङ्गतन्त्रेप्यु
क्तम्॥ दीक्षामात्रेण शुद्ध्यन्ति स्त्रियः सर्वत्र कर्मणि॥ इति॥ अत्र मन्त्रपदेन अभिषेकस्य व्यतिरेके प्यस्मादभिषेकोपि॥ स्वत

कालीतत्व. त्त्वद्रव्यशुद्धिहेतुः॥ अतस्त्व अभिषेक इति स्वतन्त्रैव हेतुना प्रतीयते इत्याहुः॥ शक्तिशुद्धिस्त्वावश्यकी॥ अन्यथा निन्दाश्रवणात्॥ तदु
२९ क्तं समयाचारे॥ असंस्कृतां तु यां शक्तिं पूजयेद्रमयेद्यदि॥ पचते नरके घोरे सिद्धिश्चापि न विन्दति॥ इत्यादि बहुश्रवणात्॥ ॥ इति श्री
राघवभट्टविरचिते कालीतत्त्वे द्रव्यशुद्धिप्रतिपादनं नाम षष्ठं तत्त्वम्॥ ॥ अथ कुण्डगोलोद्भवोत्पत्तिविधिरुच्यते॥ तदुक्तं स्वतन्त्र
तन्त्रे॥ आनीय शोभनां बालां कुलामृतरसाय च॥ प्रसूनतूलिकामध्ये कुलपुष्पं हरेद्यथा॥ वाग्भवं कामबीजं च श्रीबीजं कामराज
कम्॥ हस मात्मकं दत्वा आधारशक्तिमुद्धरेत्॥ श्रीपादुकां ततो दत्वा पूजयामि वदेत्ततः॥ अनेन मनुना तस्याः ललाटे सुमनोहरम्॥
त्रिकोणं तत्र संलिख्य सिन्दूरादिविशेषतः॥ बटुकं योगिनीं चैव क्षेत्रपालं गणेश्वरम्॥ लक्ष्मीं सरस्वतीं चैव पूजयेत्तत्र सुरेश्वरि॥ का
समुच्चार्य कामबीजं ततः परम्॥ श्रीपादुकां ततो दत्वा पूजयामि वदेत्ततः॥ दक्षपादतले देवि पूजयेन्मनुनामुना॥ वसन्तं तं समुच्चा
र्य तदहीनरमा ततः॥ पादुकां पूजयामीति तस्या वामकरे न्यसेत्॥ शक्तिबीजं समुच्चार्य साम वामपदं ततः॥ श्रीपादुकां ततो दत्वा
पूजयामि स्तनद्वये॥ आरोह क्रमतः कामः कलास्यास्सञ्चरन्मुखीः॥ ह्रीः प्रीतिरतिश्चैव धृतिः कान्तिर्मनोहरा॥ मनोरमां मनारामा २९

मदनोन्मादिनी निच॥ मोहिनी दीपनी चैव बोधनी च वशंकरी॥ रञ्जिनी सुभगा देवि शोभनी प्रियदर्शना॥ अकारादिस्वरैरेताः क
लाकुसुमधन्वनः॥ पूषार्यमासुमनारतिः प्रीतिस्तथा धृतिः॥ सौम्या मरीचिः विश्वदशमी नाम्ना च सुमालिनी॥ अङ्गिरा शशिनी चैव च
च्छायासम्पूर्णमण्डला॥ पुष्टिरमृता चैव कला षोडश षोडश॥ अकारादिस्वरयुताः पूजयेदारोहतः सुधीः॥ पृष्ठवंशमास्तमारभ्य शि
वोन्तं कामचापकम्॥ विन्यस्य विधिवन्मीनपूजयेत्तस्य मूर्द्धनि॥ भूपात्मकं समुच्चार्य कामचापपदं ततः॥ पदे श्रीपादुकां दत्वा पूज
यामीति पूजयेत्॥ स्फिग्भ्रे पादे मुखे गुह्ये हृदये च तथा क्रमात्॥ पञ्चवाणैः पञ्चवाणान् यथास्थानेषु पूजयेत्॥ द्रां द्रावणपदं दत्वा वा
मपादे पदं ततः॥ पदे श्रीपादुकां दत्वा पूजयामीति पूजयेत्॥ कामबीजं पदं दत्वा मोहवाणपदं ततः॥ पदे श्रीपादुकां दत्वा पूजया
मीति पूजयेत्॥ क्लीमात्मकं समुच्चार्य सन्दीपनपदं ततः॥ वाणपदं पदं दत्वा श्रीपादुकां ततो वदेत्॥ पूजयामीति सम्पूज्य शोषणं
पदमुच्चरेत्॥ शोचनञ्च समालिख्य वाणपादपदं ततः॥ श्रीपादुकां ततो दत्वा पूजयामीति पूजयेत्॥ ललाटे मण्डलं पश्चात्त्रिकोणं
पूजयेत्ततः॥ वाग्भवं शुभपादञ्च श्रीपादुकां ततो वदेत्॥ पूजयामि ततो दत्वा दक्षकरे स्वामुपूजयेत्॥ स्त्रीमात्मकं समुच्चार्य भगपा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतत्व. दपदंततः॥श्रीपादुकांततोदत्वापूजयामीतिपश्चिमे॥कामबीजंसमुच्चार्यभगसर्पिपदंततः॥श्रीपादुकांततोदत्वापादुकाचत
३० नोवदेत्॥पूजयामीतिसम्पूज्यपूजयेत्कामपार्श्वके॥हसमात्मकमालिख्यभगावहत्ततःपरम्॥परेश्रीपादुकांदत्वापूजयेत्मं
ध्यदेशके॥उड्डीशीतिपदंदत्वाउड्डीशीनिततःपरम्॥नाथदेवपदंदत्वारक्तामबाचनतोवदेत्॥श्रीचर्यनाथमालिख्यपदश्रीपादु
कांततः॥पूजयामीतिसम्पूज्यपूजयेच्चहस्तिसुने॥श्रीपदंचसमालिख्यजालन्धरपदंततःमहापीठेसमालिख्यनादहीनारमांत
नः॥जालेशीतिपदंदत्वाजालीशमालिखेत्ततः॥नाथदेवपदंदत्वाश्रीजालाम्बापदंततः॥श्रीषष्ठीबापदंदत्वानाथदेवपदंततः॥पाद
श्रीपादुकांदत्वापूजयामिततोवदेत्॥अनेनमनुनादेविपूजयेच्चाभिमण्डले॥श्रीपदंचततोदत्वापूर्णेश्वरींततोवदेत्॥देवीश्रीपूर्ण
नाथश्चवदेच्चभक्तितस्ततः॥ह्रौंह्रूंह्रःइतिसमुच्चार्यमन्त्रेणसाधकोत्तमः॥योनिमुद्रांप्रदर्श्याथयोनौसौम्यंविचिन्तयेत्॥वाग्भवंक्ल
मराजञ्चश्रीबीजंतदनन्तरम्॥सोमस्त्रीनामविधेयंस्तनयोःसोममाचरेत्॥योनिमुद्रांप्रदर्श्याथशनैरितिचसाधकः॥वाग्भवंच
समुच्चार्यह्रूंह्रूंचततोवदेत्॥क्लौमात्मकंसमुच्चार्यह्रीमात्मकंसमुच्चरेत्॥समात्मकंततोदत्वातस्याःसौम्यंविचिन्तयेत्॥इतिरागिना ३०

मनिर्धेयंभ्रुवोर्मध्येविचिन्तयेत्॥मूलमन्त्रेःमच्चवारांततोयोनौविचिन्तयेत्॥चेतनीनामविधेयंचिन्तयेद्योनिमध्यतः॥परानन्दंम
योश्चत्वानिर्भरानन्दमानसः॥चिन्तयेन्निजविद्यायावीजंमूर्ध्निसरोजके॥ततस्तस्यायोनिमध्येस्थूलमन्त्रेश्चसाधकः॥पुष्पाञ्जलिस्ततो
दत्वाननःसौम्यंविचिन्तयेत्॥स्वयमस्तुभिनोमन्त्रीशक्तिंसौम्यंविचिन्तयेत्॥कद्बौलिनीकाननकन्दरादौदुर्गांचमेवापिनचिन्तवृत्तिः॥
मृदुस्तारंभवतिस्वकीयंदीर्घं——— रमेतेवनेषु॥कृत्वाम्रतश्चयत्नामगृहीत्वादुर्लभंनरैः॥तेनामृतेनतर्पयेद्धक्तिमास्त्रिलोचनामृ॰
सादीसत्ता॥ह्यपिसर्वेश्रीनिसिद्धिंमयच्छति॥समस्तदेवतानाञ्चतर्पणाञ्चसदामृतैः॥गुरूणांसाधकानाञ्चसर्वेषांतर्पणाञ्चरेत्॥तेनामृ
तेनदिव्येनसर्वतुष्टाभवन्तिच॥यत्कामंकुरुतेमन्त्रीतत्सर्वंतत्रसिद्ध्यति॥अर्थाद्वाकामुकाद्वापितौन्याद्वापिचयोनरः॥लिङ्गयोनि
रतोमन्त्रीरौरवंनरकंव्रजेत्॥पूजाकालेनिनादेनपश्चात्कुर्वीत दिश्वरीम्॥अत्यायुष्प्रहतश्रीश्चनिष्फलीतिश्चनसंशयः॥तदभावेऽनुक
कल्पमपिकुर्यात्॥तदुक्तंभावचूडामणौ॥अपराजुष्पमध्येतुकुलस्थानंमनोहरम्॥हयारिकुसुमेवापिस्वयमस्तिसदाशिवः॥तस्मा
त्तेनघमादायपुष्पमध्येतुचन्दनम्॥रक्तकुङ्कुमरागंवादत्वातत्रशिवात्मिके॥योजयेच्चिनशक्त्याश्चरैक्यंसंभावयेत्क्रिया॥स्तरांनि

कालीतत्व. चिन्तयेत्तत्रैवसच्चिन्त्यपरमेश्वरि॥दत्वातदेवकुण्डोत्थंद्रव्यंपरमदुर्लभम्॥अमृतोदधिकंरत्नद्रव्यंनुसाधकः॥इतिकुण्डगोलोद्भवोत्प
३१ त्तिः॥अथपद्धतिः॥प्रसन्नदृरिकोपरिशक्तिंसंस्थाप्य॥ऐंक्लींश्रींह्रींआधारशक्तिश्रीपादुकाम्पूजयामीतिसिन्दूरेणतस्याःशिरसि
त्रिकोणंनिर्माय॥ॐमदिरार्णवपादुकाम्पूजयामि॥ॐप्रेतासनपादुकाम्पूजयामि॥ॐश्यो‍पद्देह्रासनपादुकाम्पूजयामि॥
ॐमहाप्रेतासनपादुकाम्पूजयामि॥इत्युपर्युपर्यासनानिसम्पूज्य॥तत्रकम्बलासनमास्तीर्यापविश्य॥भुविपरितोमण्डला॰
निचतुरस्राणिविधाय॥तत्र॥वांवटुकनाथपादुकाम्पूजयामि॥यांयोगिनीपादुकाम्पूजयामि॥क्षांक्षेत्रपालपादुकाम्पूजया
मि॥गांगणेश्वरपादुकाम्पूजयामि॥इतिपूर्वादिक्रमेणपूजयित्वापुरतोचतुरस्रमण्डलीविधाय॥श्रींलक्ष्मीपादुकाम्पूजयामि
ऐंसरस्वतीपादुकाम्पूजयामि॥इतिसम्पूज्यतस्यास्तपाद ॥क्लींकामराजश्रीपादुकाम्पूजयामि॥सोःसोमपादश्रीपादुकाम्पूज
यामि॥स्तनयोः॥सम्पूज्यकामकलान्यसेद्यथा॥ॐअंश्रद्धाकपालश्रीपादुकाम्पूजयामि॥दक्षपादाङ्गुष्ठे॥ॐप्रीतिकलाश्रीपादु
काम्पूजयामि॥पादपृष्ठे॥इंरतिकलाश्रीपादुकामित्यादि॥गुल्फे॥ईंधृतिकलाश्रीपादुकामित्यादि॥जङ्घायाम्॥उंकीर्तिकलाश्री ३१

पादुकामित्यादि॥जानुनि॥ऊंमनोरमाकलाश्रीपा२॥उरुमध्ये॥ऋंमनोरमाकलाश्रीपादुका२॥उरुमूले॥ॠंमनोवश्याकलाश्री
पा२॥नितम्बे॥ऌंमनोन्मादिनीकलाश्रीपा२॥कट्याम्॥ॡंमोहिनीकलाश्रीपा२॥स्तने॥एंदीपनीकलाश्रीपा२॥कक्षायाम्॥ऐंर
रोधिनीकलाश्रीपा२॥कण्ठे॥ओंवशीकरीकलाश्रीपा२॥करमूले॥औंरञ्जिनीकलाश्रीपा२॥कपोले॥अंशुभगोकलाश्रीपा२॥
नेत्रे॥अःप्रियदर्शिनीकलाश्रीपादुकाम्पूजयामि॥इत्येवमेताः॥कलासम्पूज्यसोमकलापूजयेत्तद्यथा॥ॐअंपूषाकलाश्रीपा
दुकाम्पूजयामि॥शिरसि॥ओंअर्यमकलाश्रीपा२वामनेत्रे॥इंसुमनाकलाश्रीपादु२दक्षनेत्रे॥ईंरतिकलाश्रीपादु२करमूले॥
उंप्रतिकलाश्रीपादु२गले॥ऊंधृतिकलाश्रीपादु२कक्षायाम्॥ऋंसौम्याकलाश्रीपादु२स्तने॥ॠंमरीचीकलाश्रीपादु२कट्याम्
ऌंदशमीकलाश्रीपादु२उरुमूले॥ॡंअंशुमालिनीकलाश्रीपादु२उरुमूले॥एंअङ्गिराकलाश्रीपादु२उरुमध्ये॥ऐंशशिनीकलाश्री
पादु२उरुमध्ये॥ओंछायाकलाश्रीपादु२जंघायाम्॥औंपूर्णामण्डलाकलाश्रीपादु२गुल्फे॥अंतुष्टिकलाश्रीपादुकाम्पूजयामिपृ
ष्ठे॥अःअमृताकलाश्रीपादुकाम्पूजयामिवामपादाङ्गुष्ठे॥इतिविन्यस्य॥धूंकामचापश्रीपादुकाम्पूजयामित्यनेनमन्त्रेणापृष्ठ

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कालीतत्व. वंशादारभ्य चापाकारेण [illegible] श्रीपादयोः॥ क्लौं मोहनबाणः श्रीनके॥ क्लौं
३२ सन्दीपनबाणः श्रीगुहे॥ सः शोषणबाणः श्रीहरि॥ एवं क्रमेण विन्यस्य॥ ललाटे भ्योमि त्रिकोणं पूजयेत्॥ तद्यथा॥ ऐं सुभगपादु
२ दक्षरेखायाम्॥ श्रीभगपादश्रीपादुका २ पश्चिमरेखायाम्॥ क्लौं भगसर्पिणी श्रीपादु २ वामरेखायाम्॥ सौः भगावह श्रीपादु २
मध्ये सम्पूज्य॥ चतुष्टयं पूजयेद्यथा॥ श्रीउड्डीशदेवी उड्डीशनाथदेव श्रीवक्त्रा श्रीचर्यनाथ श्रीपादुकां तर्पयामि नमः॥ इति उड्डी
याने महापीठे हृदि॥ श्रीजलेश्वरी देवी श्रीजालीबानाथ देवी श्रीजालाम्बा देवी श्रीषष्ठीशनाथ श्रीपादुकां पूजयामि तर्पयामि
नमः॥ इति जालन्धरपीठिनामौ॥ श्रीपूर्णेश्वरी देवी श्रीशैनाथदेव श्री चामुण्डाम्बा श्रीउड्डीशन श्रीपादुकां इत्यादि॥ इति पूर्णगिरि
पीठे शिरसि॥ कामेश्वरी देवी श्री कामेश्वरानन्दनाथ श्रीमहानुखाम्बा श्रीमित्रीशनाथ श्रीपेत्यादि॥ इति कामरूपमहापीठे स्वर
सासने॥ इति क्रमेण विन्यस्य पीठस्य वाम भागे स्वगुरुपङ्क्तिं सम्पूज्य हृत्पद्मे अनङ्गकुसुमादिभ्यो नमः॥ इति पूजयेत्॥ ऐं सं ब्लूं सः
इति मन्त्रेण धारयेद्योनिमुद्रां निचिन्त्य॥ योनौ शक्तिभ्यो हो विचिन्तयेत्॥ ऐं क्लौं स्त्रौं स्रो शिरसि मन्त्रेण स्तनयोः स्त्रौ भं निचिन्तयेत्॥ ऐं स्त्रौं ३२

हुं ऐं इति शिरसि विद्यास्मरणात् स्याद्भ्रूमध्ये स्त्रो भं विचिन्तयेत्॥ पुनस्तस्या योनौ ह्रीं क्लीं क्लौं ब्लूं सः मूलविद्यां विन्यस्य कुलद्रव्यं प्रदाता
प्यान्तरे कृत्वा गुरवे निवेद्य शक्तये दत्वा स्वयं स्वीकृत्वा आनन्दमयो भूत्वा निजविद्याद्यबीजं स्वशिरसि विन्यस्य॥ पुनस्तस्या योनौ मूल
विद्यया करवीरस्वारोपुष्पाञ्जलित्रयं दत्वा तां सो भयन् स्वयमपि कल्लोलीनीत्यादिना अषु षोभूत्वा शिवरूपमात्मानं शक्तिं श
क्तिरूपां च विभाव्य नन्दमयं विधाय॥ परिवर्तनं ततः मूत मुक्त्य देवताया गुरुप्रभृतीनां तर्पणं सकृदाः शिरसमर्घपात्रेति क्षिप्य
निःशङ्कं पूजयेदिति॥ केचित्तु दूतीदेहन्यस्तन्यासनस्वदेहेपि न्यसेदित्याहुः॥ तद्भावेत्तदनुकल्पनाच कुर्यात्॥ यथा अपरा पुष्पं ह
यारि पुष्पं समानीय लघु यथास्यात्तथा चन्दनादिना अपरापुष्पमापूर्य हयारिपुष्पतेनसंयोज्यो भयो शिवशक्तित्वेन सञ्चिन्त्य
तयोः सङ्गमं विभाव्य तस्माच्चकुलद्रव्योत्पत्तिं विचिन्त्य॥ तदुपरियथाशक्त्या निजविद्यां जप्त्वा तत्कुसुममर्घपात्रेति क्षिप्य देवता
यै निवेदयेदिति॥ ॥इति श्रीराघवभट्टविरचिते कालीतत्वे कुण्डगोलोद्भवोत्पत्तिघातिपादने नाम सप्तमतत्वम्॥ ॥अथ नित्या
नुष्ठानविधिरुच्यते॥ तदुक्तं कालीतन्त्रे॥ आदौ पुरश्क्रियां कुर्यात्रियमेन यथाविधि॥ ततः सिद्धमनुर्मन्त्री प्रयोगार्भेण चान्यथा॥

कालीतत्व. जीवहीनो यथा देही सर्वकर्मसु न क्षमः॥ पुनश्चरणहीनोपि तथा मन्त्रः प्रकीर्तितः॥ तस्मादादौ पुरश्चरणं कृत्वा साधकोत्तमः॥ फेत्कारि
३३ णीयेऽपि॥ फेत्कोपि नियमाहारसकृद्वा नैवि धीयते॥ दिवसे वा जपं कुर्यात्पौरश्चरणिकोद्विज॥ शोकयावक भैक्षाणि चरुरप्सह
सर्पिषा॥ दध्ना मूलफलैर्वापि कुर्यादशनमन्वहम्॥ ब्रह्मचर्यं तथैवोक्तं स्नानं त्रैसन्धिकं तथा॥ पूर्वाह्णे च देवतायाः पूजां कृत्वा विशे
षतः॥ सर्वमन्त्राः प्रयोक्तव्या प्रायशः प्रणवादिकाः॥ अनन्यचेता आसीनो चास्यते विजितासनः॥ अनुष्ठेत वसन्त्राणि गुरुसम्प्रति
नित्यशः॥ सम्पूर्णे तस्मिन्नेव सुवर्णमेक गुरवे देदेत्॥ अन्यथा व्यभिचाराय सर्वमेतदुदाहृतम्॥ अन्यत्रापि॥ देवतागुरुमन्त्राणा
मैक्यं संभावयन् धिया॥ जपेदेकमनाः प्रातः कालान्मध्यंदिनावधि॥ यत्संख्यया समारब्धं तत्कर्तव्यमहर्निशम्॥ यदि न्यूनाधिकं
कुर्याद्व्रतभ्रष्टो भवेन्नरः॥ कुलसम्भवेपि॥ स्नातः शुक्लाम्बरधरः शुचिप्रयनमानसः॥ दिवारात्रौ च कर्तव्यं सर्वकर्मार्थसिद्धये॥
नचान्तरेपि॥ संख्यापूर्णे निजइष्टेजयसंख्यां दशांशतः॥ ततो होमं दशांशेन जलं सम्पूज्य देवताम्॥ तर्पयित्वा विधानेन दशांश
मभिषिञ्चयेत्॥ तद्दशांशेन विप्राणां भोजयेद्विधिपूर्वकम्॥ एष पाशवकल्पसु सर्वतन्त्रेषु सेवित॥ तदुक्तं स्वतन्त्रतन्त्रे॥ दिवा ३३

लक्षं शुचिर्भूत्वा भविष्याशी जपेन्नरः॥ ततस्तु तद्दशांशेन होमयेद्विधिवाप्रिये॥ तर्पयेत्तीर्थतोयेन पयसा सर्पिषापि वा॥ मनुनावा
सिनामिश्रतोयेन परमेश्वरि॥ देवीं चाभिषिञ्चेत्तोये स्तर्पणस्य दशांशतः॥ तद्दशांशं हविष्यान्नं भोजयेद्भक्तितः प्रिये॥ कालीतन्त्र
सिनामिश्रतोयेन परमेश्वरि॥ देवीं चाभिषिञ्चेत्तोये स्तर्पणस्य दशांशतः॥ तद्दशांशं हविष्यान्नं भोजयेद्भक्तितः प्रिये॥ पाशव
विदो विप्रान्दक्षिणां गुरवे देदेत्॥ पाशवं कथितं कल्पं शृणु चान्यं ततः प्रिये॥ एवं पौरश्चरणिक सामान्यविधिपूर्वकम्॥ पाशव
कल्पोक्त पूजापूर्वकं चलक्षजपतद्दशांशेन होमात्मकं पुरश्चरणं पशूनां पर्यवसितमिति॥ ॥अथ वीरपुरश्चरणविधिरुच्यते॥
तदुक्तं कुलचूडामणौ॥ पुरश्चरणकालेतु परशक्तिं प्रपूज्य च॥ दीक्षितां वस्त्रपुष्पाद्यैर्भोज्यैः पायससम्भवैः॥ आरम्भकाले च निय
तं स्वयं पक्वान ॥ नानाविधं पुष्पकं च नानारससमन्वितम्॥ दुग्धं दधिघृतं तक्रं नवनीतं सशर्करम्॥ उपलीखण्डचूर्णं च
नानाविधिरसायनम्॥ नारिकेलं कपित्थं च नागरङ्गं सुदर्शनम्॥ नियाकं बीजपूरं च दाडिमीफलमुत्तमम्॥ नानारायफलं चैव
नानागन्धविलेपनम्॥ चन्दनं मृगनाभिं च श्रीखण्डं नवपल्लवम्॥ कर्पूरं लोध्रकं चैव मलजं वनजं तथा॥ नानाशैलसमुद्भूतं ना
नालङ्कारभूषितम्॥ अन्यगेहे समानीय चार्घोदकविशोधितम्॥ अमृतीकरणं कृत्वा शक्तिं चाभिमुखं नयेत्॥ तेनोदकेन सर्वा

CC-0.In Public Domain. Digitization by eGangotri

कालीतन्त्र.
स्ताः संप्रोक्ष्य विधिपूर्वकम्॥ अमृतीकरणं पश्चात्सकलीकरणादिवा॥ अथाष्टकन्यका मध्ये देवीरूपधरा यतः॥ ब्राह्मणी क्षत्रिया
३४ वैश्या शूद्री च कुलभूषणा॥ वेश्या नापितकन्या च रजकी योगिनी तथा॥ विशेषवैदग्ध्ययुताः सर्वा एवं कुलाङ्गना॥ अष्टकन्या रूपभे
दं विलोक्या सर्वचेष्टितम्॥ ब्राह्मण्याद्याष्टशक्तीनां नामभिः कृतसंज्ञकाः॥ आसनं प्रथमं दत्वा स्वागतं च वदेत्ततः॥ अर्घपाद्यं च मा
नीयं मधुपर्कं जलं तथा॥ स्नापयेद्गन्धपुष्पाभिः केशसंस्कारमाचरेत्॥ धूपयित्वा ततः केशान् कौशेयं च निवेदयेत्॥ ततस्थानान्तरे
पीठमौलौ यपादुकायुगम्॥ दत्वा तत्र समासीनां नानालङ्कारभूषणैः॥ भूषयित्वा विलेपं च गन्धमाल्यं निवेदयेत्॥ नानाशक्तिं स
मावाह्य मूर्धितां तां समानयेत्॥ भोज्यमराउलमध्ये च स्वर्णपात्रे सुशोभने॥ चर्व्यं चोष्यं तथा लेह्यं पेयं चैव च भैक्ष्यकम्॥ अदीक्षिता
नु याशक्तिस्तस्यै मायां निवेदयेत्॥ अथ प्रथमं पूजातत्वोक्तप्रकारेण शङ्खं घटं च संस्थाप्य तेनोदकेन ततः संप्रोक्ष्य यथोक्तक्रमेणास
रूपं विचिन्त्य तदनुसारेण नामधृत्वा सम्पूज्य पाद्यादिभिर्देवीं ध्यात्वा तासां तन्मूर्ध्नि समावाह्य जीवन्यासादिकं विधाय पाद्यादिभिः स
म्पूज्य ततस्ता अस्योभादिकं भुञ्जाना सुसव्यकरौ वृशक्तिस्तोत्रं पठेदिति॥ तदुक्तं तन्त्रेण॥ आसां सव्ययुकरौ ख्ततस्तोत्रं समाचरे ३४

त्॥ मातर्देवी नमस्ते सुब्रह्मरूपधरेऽनघे॥ कृपया हरमे विघ्नं मन्त्रसिद्धिं प्रयच्छ मे॥ महेशि वरदे देवि परमानन्दरूपिणी॥ कृपये
त्यादि॥ कौमारी सर्वविद्येशि कुमारक्रीडने भ्वले॥ कृपयेत्यादि॥ विष्णुरूपधरा देवि विनतासुतवाहिनि॥ कृपया॥ वाराहि वरदे दे
वि दंष्ट्रोद्धृतवसुन्धरे॥ कृपया॥ शक्ररूपधरे देवि शक्रादिसुरपूजिते॥ कृपया॥ चामुण्डे मुण्डमालासृक्चर्चिते विघ्ननाशिनि॥
कृपया॥ महालक्ष्मीर्महामाये क्षोभसन्तापनाशिनि॥ कृपया॥ पितृमातृमये देवि पितृमातृवहिष्कृते॥ एके वहुतचे देवि वि
श्वरूपे नमोऽस्तु ते॥ एतत्स्तोत्रं पठेद्यस्तु कर्मोस्वेषु संयतः॥ विदश्यामा समालोक्य तस्य विघ्नं न जायते॥ कुलीनस्य द्वारदेव्य कथि
तास्तव पुत्रक॥ दीक्षाकाले नित्यपूजा सम्प्रयेनार्चयेद्यदि॥ तस्य पूजाफलं वत्स नीयते यक्ष्यराक्षसैः॥ यदि व्रीडापरा वा स्युर्भोजने
तद्गृहाद्वहिः॥ स्थित्वा स्तोत्रं पठेत्तावद्यावत्तृप्तिः प्रजायते॥ आचम्य मुखवासादि ताम्बूलं च निवेदयेत्॥ दद्याच्च पुनर्माल्यं गन्धच
न्दनपङ्कितम्॥ विसर्ज्य प्रदक्षिणां कृत्य वरं प्रार्थ्य सुखी भवेत्॥ अन्यायदिनाकन्नि निजकन्या निजानुजा॥ अयजा मातुलानी
वा माता वा तत्सपत्निका॥ वयस्या जातितो वापि पूज्या स्युः परमाकला॥ पूज्याः कुलरसैः सर्वाः निजाहङ्कारवर्जिता॥ सर्वाभावे ये

कालीतन्त्र.
कथिता पूजनीयाः प्रयत्नतः॥ संस्कृता संस्कृता वापि जननी वापि नित्यतिः॥ पूर्वाभावे परापूज्या मदंशायोषितो यतः॥ एकश्चेत्कुल
३५ शास्त्रज्ञः पूजार्हस्तत्र भैरवः॥ सर्व एव सुराः पूज्या ब्रह्मविष्णुशिवादयः॥ एकाचे भुवनीतत्र पूजिता चोवलोकिता॥ सर्वा एव परा देव्यः
पूजिताः कुलभैरवः॥ इत्यादौ मध्ये अन्ते च योरुश्वरणिका बीरणां शक्तिपूजामावश्यकम्॥ अन्यथा निन्दाश्रवणात्॥ तदुक्तं कु
लचूडामणितन्त्रादिषु॥ आदौ मध्ये च अन्ते च कलसपूरणौ विशेषतः॥ न पूजयति यः कान्तां तदा विघ्नैर्विलुप्यते॥ पूर्वार्जितं फलं ना
५८ हिषमर्दिनीम्॥प्रणम्यजयदुर्गाख्यांसर्वविघ्नैर्नलुप्यते॥जयदेवीजगद्धात्रीत्रिपुराख्येत्रिदैवते॥भक्तेभ्योवरदेदेविमहिषघ्निनमोस्तु
ते॥मद्यभाण्डंसमालोक्यमत्स्यमांसंवरस्त्रियम्॥दृष्ट्वाचभैरवींदेवींप्रणम्यविमृशन्मनुम्॥घोरविघ्नविनाशायकुलाचारसमृद्धये॥
नमामिवरदेदेविमुण्डमालाविभूषिते॥रक्तधारासमाकीर्णवदनेत्वांनमाम्यहम्॥सर्वविघ्नहरेदेविनमस्तेहरवल्लभे॥एतेषांदर्शनेचै
वयदिनैवंप्रकुर्वते॥शक्तिमन्त्रंपुरस्कृत्यतस्यसिद्धिर्नजायते॥एतेषांमारणोच्चाटंहिंसनंलगुडादिभिः॥करोतियदिपापात्मामद्भक्तःस
कथंभवेत्॥यथानामद्भक्तःसंभूतास्तेकुलजनप्रियाः॥डाकिन्यश्चतथासर्वामदंशसम्भूताभैरव॥नचसिद्धिसमायोगाडाकिनीहिंसनंयदि
अथवाशनपानाद्यमद्भक्तानांविशेषतः॥बटुकानांभैरवाणांतस्यसिद्धिर्नजायते॥नित्यानैमित्तिकीकाम्यादिवारात्र्युभयक्रमात्॥कर्तं
व्यकुलशास्त्रज्ञपूजाभैरवविस्तरैः॥ ॥इतिश्रीमद्राघवभट्टविरचितेकालीतत्वेआचारप्रतिपादनंनामैकादशंतत्वम्॥ ॥अथस्थादिनिय
मः॥तदुक्तंफेत्कारिणीये॥एकलिङ्गेश्मशानेवाशून्यागारेचतुष्पथे॥तत्रस्थःसाधयेद्योगंविद्यांत्रिभुवनेश्वरीम्॥एकलिङ्गपञ्चक्रोशा ५८

यत्रलिङ्गान्तरंनास्तितस्मिन्नित्यर्थः॥तदुक्तंतत्रैव॥पञ्चक्रोशान्तरेयत्रलिङ्गान्तरंनवीक्ष्यते॥तदेकलिङ्गमाख्यातंतत्रसिद्धिरनुत्तमा॥अन्यच्च॥
उज्जटेपर्वतेवापिनिर्जनेवाचतुष्पथे॥देवागारेदेवशून्येनिर्जनैकान्तवेश्मनि॥तदुक्तंनीलतन्त्रे॥शून्यागारेश्मशानेयदिजपतिजडोप्येक
लिङ्गेनडागेगङ्गागर्भेगिरौवाशुचिविमलमतिःसर्वदामन्त्रराजम्॥ध्यात्वैवंदेवदेवीहृदयसरसिजेचीनदेशोद्भवासौविद्यासौन्दर्यराजंहत
रिपुनिचयंनित्यमृद्धिंप्रयच्छेत्॥ ॥अथासनविधिः॥तदुक्तंमत्स्यसूक्ते॥मृदच्चूडकमासीनश्चर्याच्चेषुकोमलेषुच॥विस्तरेषुसमासीनःसा
धयेत्सिद्धिमुत्तमाम्॥मृदुभिन्निर्मितमासाभ्यन्तरेगर्भच्युतमित्यर्थः॥तदुक्तम्॥अर्वाक्षण्मासतोगर्भच्युतमाहुर्मृदुंबुधाः॥अच्चूडकमिति
चूडाकरणाभ्यन्तरेमृतमित्यर्थः॥तदुक्तम्॥चूडोपनयनेर्हीनंमृतमच्चूडकंविदुः॥निवृत्तचूडकोबालोहीनोपनयनःपुमान्॥योमृतःपञ्चमे
वर्षेतमेवकोमलंविदुः॥स्वतन्त्रतन्त्रेपि॥कम्बलोलोहितोवापिकृष्णोवाव्याघ्रचर्मणि॥सन्यासीब्रह्मचारीतुविप्रानुकृष्णचर्मणि॥तदुक्तं
मत्स्यसूक्ते॥कुशासारंद्वीपिचर्मअच्चूडकम्बलंयथा॥पीतवस्त्रंशुभंकृत्वाआसनायप्रकल्पयेत्॥वीराणान्तुवीरासनमावश्यकमेव॥तदु
क्तंकालीतन्त्रे॥मृतासनंविनादेवियोजयेत्कालिकांनरः॥तावत्सनारकीज्ञेयायावदाहूतसंप्लवम्॥स्वतन्त्रेपि॥कम्बलासनविधानंनसा

कालीतत्व. तत्रेणकिन्तुवीरासनावगुणोनेति॥तदुक्तम्॥मृतभावेप्यवंरूपंविस्तरंचप्रकल्पयेत्॥तथाचशवाकारेणकुशासनमासनंपरिकल्पक
५७ म्बलासनायासनेनावगुणम्तउपविशेदित्यर्थः॥मुण्डमालायामपि॥व्याघ्राजिनंसर्वसिद्ध्यैज्ञानसिद्ध्यैमृगाजिनम्॥वस्त्रासनंरोगहरं
वेत्रजंश्रीविवर्द्धनम्॥कौशेयंसिद्धिदंप्रोक्तंकम्बलंसर्वसिद्धिदम्॥शुक्लंवायदिवाकृष्णंविशेषाद्रक्तकम्बलम्॥मृदुकोमलमासीनःस
ञ्जातमपतितंहियत्॥जन्तुव्यापादितंवापिमृतम्वानरवरस्कं॥गर्भच्युतन्त्वम्वापिवेत्तारीणांयोनित्वचम्॥सर्वभोगसमृद्धिदम्॥तच्चंवा
पिगजानाञ्चकुर्यादीरोमृतासनम्॥श्मशानकोष्ठघटितंपीठमायत्रदारुजम्॥नदीक्षितोविशेजातुकृष्णस्यचाजिनेगृही॥एकहस्तं
द्विहस्तंवाचतुरङ्गुलमुच्छ्रितम्॥विशुद्धेआसनेकुर्यात्संस्कारपूजनंबुधः॥इति॥ ॥अथपुष्पविधिः॥तदुक्तंमत्स्यसूक्ते॥सुगन्धिश्वेता
लोहितैःकुसुमैरर्चयेत्कुलैः॥बिल्वैर्मरुवकाद्यैश्चतुलसीवर्जितैःशुभैः॥ओड्रपुष्पैर्विशेषेणावज्रपुष्पेणमिश्रितम्॥सर्वंपुष्पंप्रदद्यात्त
भक्तियुक्तेनचेतसा॥शारदायाञ्च॥सर्वैःपुष्पैःसदापूजाविहिताविहितैरपि॥कर्तव्यासर्वदेवानांभक्तियोगोत्रकारणम्॥तत्रात्र
रैपि॥देवीपूजासदाकार्याजलजैस्थलजैरपि॥विहितैर्वानिसिद्धैर्वाभक्तियुक्तेनचेतसा॥कालीतन्त्रेपि॥नानोपहारबलिभिर्वा ५७

तापुष्पैर्मनोहरैः॥अपामार्गदलैर्भृङ्गैस्तुलसीवर्जितैःशुभैः॥पूजनीयासदाभक्त्यानृणांशीघ्रफलप्रदा॥अथकल्पपुष्पम्॥तदुक्तंमुण्ड
मालायाम्॥आमोदशद्धकाउत्तमासर्वसिद्धिदा॥बलात्कारेणदूतायामध्यमाभोगवर्द्धिनी॥रजोयोगवशाद्याअधमासुखदायि
नी॥स्वयम्भुकुसुमंदेवित्रिविधंभुविजायते॥अन्यत्रापि॥स्वेच्छारतमतीशक्तिःसाप्रसादेविसुरेश्वरि॥तस्याःपुष्पंस्वयंयत्तदुत्तमणी
यंप्रयत्नतः॥तस्मात्तद्रूपपुष्पेणशक्तिंचपूजयेत्सदा॥यथाकालंयथापुष्पंस्वयंयज्ञापयेत्सुकृत्॥गृहीत्वातत्प्रयत्नेनस्वयम्भु
कुसुमंचरेत्॥स्वयम्भुपुष्पयोगेनसाक्षात्तेनसमर्चयेत्॥विद्यांस्वप्नावतींजप्त्वासिद्धमाकर्षणादिकम्॥देवताद्यमहाभागाए
षसारानवाश्रये॥राजानश्चस्त्रियःसर्वानित्यंवश्याभवन्तिहि॥मन्त्रचूडामणौच॥शृणुवत्सकुलद्रव्यमाहात्म्यंपरमंशुभम्॥य
स्त्राप्यकुलदेवेनलभ्यतेवाञ्छितंमहत्॥अमावास्यातिथौदेविसुषुम्नामध्यवर्तिनी॥अमृतंवर्षतेगात्रत्रिदिनंधरणीतले॥तस्मा
त्रियोकुलंदेवयदिविद्यांसमुच्चरेत्॥पूर्वमेवाभवयत्रप्रत्युच्चारणमेवहि॥तस्मात्सर्वप्रयत्नेनअकुर्वितुर्जपंकुरु॥इद्धातरस्मृतन्दे
व्यागलितंपरिगृह्यच॥साधनंसाधयेत्सर्वंकुलाचारस्यसिद्धये॥अन्यत्रापि॥शिवहीनयदाशक्तिःसगोदोवर्षतेहियत्॥तदेवपर

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतन्त्र. मंदुर्लभंस्वयम्भुकुसुमाख्यकम्॥स्वयम्भुकुसुमंद्रव्यंत्रैलोक्येचापिदुर्लभम्॥कचिज्जन्मवरोजेनलभ्यतेवानवाविभो॥यदिनलभ्यतेदेवलः
५८ क्षीरससमन्वितम्॥कस्तूरीकुङ्कुमाक्तञ्चवरीकृत्वानुगापयेत्॥यत्रराजंसमालिख्यपूजयेद्यदिसाधकः॥एतेनासनयोगेनमधुमती
सिद्धिमालभेत्॥सुप्राप्दिदेवदुर्घायेमत्रविद्याप्रकीर्तिताः॥प्रवृत्ताज्ञानयोगेसामानस्यापुनरागता॥ततःप्रयोगविद्यानांमन्त्रारीनाच
कारयेत्॥एवंप्रवृत्ताभवतिनैवनाहककथञ्चन॥एतत्रयाणांमध्येतुस्वयम्भुकुसुमंमहत्॥श्रीक्रमेपि॥कस्तूरीकुङ्कुमञ्चचन्दनागुरुका
दिकम्॥नानासुगन्धिकंदत्वास्त्रीकृत्वातुसाधकः॥एतेनासनयोगेनपूजयेत्परमेश्वरीम्॥स्वयम्भुकुसुमैःपूजांप्रत्यहंयःसमाचरेत्॥
तस्यमधुमतीसिद्धिरचिरादेविप्रजायते॥मुण्डमालायामपि॥पुष्पाण्यपिसदादद्यात्कुङ्कुमासितानिच॥श्वेतंरक्तंजवापुष्पंकर
वीरन्तथाप्रिये॥तगरंमल्लिकाजातीमालतीयूथिकातथा॥धुस्तूराशोकवकुलश्वेतकृष्णापराजिता॥वकपुष्पंबिल्वपत्रंचन्द्रकंना
गकेशरम्॥वज्रिकाकुरिण्टकाक्षीरकंयत्परिकीर्तितम्॥अर्कपुष्पंजवापुष्पंसर्वतन्त्रप्रियंवदेत्॥अष्टम्याञ्चविधानेनसन्तुष्येतस
पार्वति॥पद्मपुष्पेणारक्तेनसन्तुष्टासर्वदेवताः॥कृष्णावायदिवायुक्तंकालिकावरदाभवेत्॥श्मशानधुस्तूरपुष्पेणतुष्टाधूमावतीपरा ५८

श्मशानजातपुष्पेणसन्तुष्टाकालिकापरा॥अन्यपुष्पैश्चविविधैःसन्तुष्टापार्वतीशिवा॥अम्लानस्पतुपत्रेणतुष्टापुष्पेणपार्वति॥अष्ट
म्याञ्चचतुर्दश्यांनानापुष्पैःसमर्चयेत्॥श्मशानेरात्रिशेषेवाशनिभौमदिनेनिशि॥ ॥अथपुष्पदानविधिः॥तदुक्तंशारदायीकायाम्॥
पुष्पंवायदिवापत्रंफलमेवमधोमुखम्॥दुःखदन्तत्समाख्यातंयथोत्पन्नंतथार्पणम्॥अधोमुखंफलन्तेषंपुष्पाञ्जलिविधौत्तु॥
॥ ॥इतिश्रीमन्नारायणभट्टविरचितेकालीतन्त्रेस्नानपुष्पप्रतिपादनंनामद्वादशंतन्त्रम्॥ ॥अथबलिविधिरुच्यते॥देव्युवाच॥एक
बलिंबलिदानेनतुष्टाभवतिचण्डिका॥कथितंपूर्वमस्माभ्यंप्रकाशद्भुतशङ्कर॥ईश्वरउवाच॥अन्यत्तगुह्यंदेवेशिविधानंबलिपूजने॥
कथयामिवरारोहेसुस्थिरंभवशाम्प्रतम्॥दधिक्षीरंगुडंचान्नंपायसंशर्करान्वितम्॥पायसंक्षुद्रमाम्रञ्चनारिकेलंसमोदकम्॥शाशकं
मेषखड्गञ्चसाह्यकंसहशार्यकम्॥रम्भाफलंलड्डुकञ्चभर्जितान्नञ्चपिष्टकम्॥सानमत्स्यञ्चपाठीनंसकुलंदिक्षित्रिकन्तथा॥रोरवञ्चैत्तिश
न्दधामांसंमाहिषमेवच॥पक्षिमांसंवरारोहेडिम्भन्तानासमुद्भवम्॥कृष्णाच्छागंमहामांसंगोधिकांहारिणीन्तथा॥जलजेमत्स्यमांसञ्च
गण्डकीमांसमेवच॥नानाव्यञ्जन — निव्यञ्जनानिमधूनिच॥दध्नादुग्धंघृतेनाक्तंनिशायांदिवसेपिवा॥बलिन्दद्याद्विशेषेणकृष्णाप

कालीतन्त्र. क्षेशुभेदिने॥छागेदत्तेभवेद्वाग्मीमत्स्यदत्तेकविर्भवेत्॥माहिषेधनवृद्धिःस्यान्मृगेमोक्षफलंलभेत्॥दत्तेपक्षिणोमहर्द्धिःस्याद्गोधिकायांमह
५९ हाफलम्॥नरेदत्तेसमृद्धिःस्याद्दृष्टसिद्धिरनुत्तमा॥ललाटस्रवसस्यशिरोभ्रूमध्यदेशतः॥स्वदेहरुधिरेदत्तेरुद्रदेहइवापरः॥चाण्डालबलि
दानेनमहासिद्धिःप्रजायते॥सुधादानेनदेवेशिमहायोगीश्वरोभवेत्॥सुधातुत्रिविधादेविस्फाटिकीसौरिण्डकीतथा॥पैष्टिकीस्फाटिकी
दानेधनवृद्धिरनुत्तमा॥तालकीदानमात्रेणसर्ववश्याभवेद्ध्रुवम्॥कार्शिकीसुरयादेविनियोर्चयेत्परमेश्वरीम्॥गुटिकाञ्जनखड्गादिमार
णोच्चाटनादिभिः॥महासिद्धीश्वरोभूत्वावशेत्कल्पयुतंदिवि॥कुमारीकल्पेपि॥ताम्बूलञ्चसकर्पूरंनारिकेलंसशर्करम्॥मांसञ्चसघृत
ञ्चैवआर्द्रकंसगुडन्तथा॥सतण्डुलन्तिलञ्चैवदधिचैवसशर्करम्॥जम्बीरंपनसञ्चैवआम्रातकफलन्तथा॥कदलीतिन्तिडीचैवश्रीफलं
फलमुत्तमम्॥करञ्जवकुलञ्चैवतालखर्जुरमेवच॥अन्यानिचसुगन्धानिस्वादूनिचफलानिच॥नराःछागास्तथामेषामाहिषाशशका
स्तथा॥एतेषाञ्चैवरक्तानिदेयानिपरमेश्वरि॥इति॥नरबलिदानन्तुराज्ञामेव॥तदुक्तंयामले॥राजानरबलिंदद्यान्नान्योपिपरमेश्वरि
सिंहव्याघ्रनरान्दत्वाब्राह्मणोनरकंव्रजेत्॥नैवेद्यपात्रंयामले॥तैजसेषुचपात्रेषुसौवर्णोराजतेऽथवा॥ताम्रेवाराजतेवापिपद्मपत्रेऽथ ५९

वाततः॥पञ्चदारुमयेवापिनैवेद्यंकल्पयेद्बुधः॥सर्वभावेनमाहेयस्वहस्तघटितेयदि॥यद्योगमर्घपात्रेतुतन्निधायनिवेदयेत्॥अन्यतो
येर्यदुक्तमर्घपात्रेस्थितेतवै॥नगृह्णातिमहादेविदत्तंविधिशतैरपि॥ ॥इतिश्रीमद्राघवभट्टविरचितेकालीतन्त्रेबलिविधानंनाम
त्रयोदशंतन्त्रम्॥ ॥अथप्रायश्चित्तविधिरुच्यते॥तदुक्तंलिङ्गागमे॥शृणुदेविप्रवक्ष्यामिप्रायश्चित्तमनुत्तमम्॥तद्विशुद्धिविधिश्चैव
भैरवेणोतिभाषितम्॥गुरुत्यागकरःशिष्यःप्रायश्चित्तीभवेद्ध्रुवम्॥लक्षंश्रीपादुकाजप्त्वातस्मात्पापाद्विशुध्यति॥मन्त्रत्यागकरःशिष्यस्त
ल्लक्षेणैवकारयेत्॥लक्षमेकंजपेन्मन्त्रंहोमतर्पणतःशुचिः॥एतत्तद्दिव्यवीरयुरुत्यागेनहिपशुगुरुत्यागे॥अतएवयामलेप्युक्तम्॥मधु
लोभाद्यथाभृङ्गःपुष्पात्पुष्पान्तरंव्रजेत्॥गुरुलक्षस्तथाशिष्योगुरोर्गुर्वन्तरंव्रजेत्॥इति॥गुरोरितिपशुगुरोरित्यर्थः॥तदुक्तमन्यत्रापि॥यदि
दैवाद्यशोर्विद्यालभ्यतेकुलजैर्नवै॥द्विजस्यकौलिकींप्राप्यपुनर्विद्यामुपाचरेत्॥अज्ञानसकृतंकर्मनालोच्यंकुलकौलिकैः॥समस्तमा
तस्तत्पापं हरेदेविकृपाद्रुतः॥एवंप्रार्थ्यपुनर्दीक्षांकुर्यात्साधकसत्तमः॥इतिगुरुरित्युपलक्षणम्॥रिपुमन्त्रादिकंपरित्यज्यान्यमन्त्रंगृहीत्वा
दि॥अतएवकचित्पुस्तके॥मन्त्रान्मन्त्रान्तरमित्यपिसङ्गच्छति॥अतएवयामलादौ॥सकलोवीजहीनश्चसन्दि निद्रितस्तथा॥मतव

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

कालीतत्व. स्तेनसिद्धान्तिगुरुस्याद्धूसवानकः॥ तदामिसहस्राशास्त्रानिनुदेवपरित्यजेत्॥ नहुत्वापि गुरुस्याज्ञां नातिसारोवरानने॥ अल्पज्ञोपि गुरुः पू
६० ज्योयोजानातिकुलाकुलम्॥ एकत्र गुरुणासार्द्धं स्वपत्न्युपविशेद्यदि॥ सयातिनरकं घोरं यावदिन्द्राश्चतुर्दश॥ गुरोर्वाक्यं हतं कृत्वा आत्मवाक्य
न्तुरोपयेत्॥ गुरुं जेतुं मनो यस्य स याति नरकार्णवे॥ अनेकपापशोरन्नं भुञ्जते ये च कौलिकाः॥ तेभ्यः प्रकुप्यते देवि तत्संसर्गं न कारयेत्॥
लक्षत्रयं जपेद्धोपां लक्षमाप्यजपां जपेत्॥ होमयेद्विधानेन निष्पापस्यात्तदा ध्रुवम्॥ कौलिकः पशुगामी च परस्त्रीं रमेद्बलात्॥ गो
ष्ठीमध्ये प्रयत्नेन स्पर्शं तत्स्य न कारयेत्॥ एकपात्रं पिबेद्द्रव्यं वीरो माहेश्वरो यदि॥ स्वानोच्छिष्टं भवेत्पानं प्रायश्चित्ती स कौलिकः॥ गायत्री
भिः सहस्रेश उपवासत्रयेण च॥ सम्यक्शोधितचित्तन्तु सुवर्णं गुरवे ददेत्॥ चक्रं कृत्वा तु देवेशि पूजयेत्तर्पणं विना॥ चत्वारि तस्य नश्य
न्ति आयुः प्रज्ञा यशो धनम्॥ अभिषेकं विना स्तने आचार्यत्वं करोति यः॥ योनिकोटिशतं याति रौरवं नरकं व्रजेत्॥ मातृरूपं परित्यज्य स्त्री
रूपं शक्तिमाचरेत्॥ स याति नरकं घोरं जन्मकोटिशतैरपि॥ प्राणलक्षत्रयं जप्त्वा अजपां लक्षमेव च॥ स्वर्यबीजं जपं लक्षं ततः शुद्धिः प्रजा
यते॥ मन्त्रमातरपुत्रीञ्च भगिनीं स्वकुलाङ्गनाम्॥ नरमेत्कौलिको नित्यमेताः सम्यक्तमडये॥ श्रीपात्रग्रहणं कृत्वा चक्रमुत्थापयेद्यदि॥ ६०

पशुपानं भवेत्तस्य प्रायश्चित्तन्तु जायते॥ मन्त्रमातृगमने प्राणान्तं प्रायश्चित्तम्॥ तदुक्तं तन्त्रान्तरे॥ बलाद्यस्त्वेच्छया वापि योरमेन्मन्त्रमातर
म्॥ दशलक्षं मनुं जप्त्वा भूयानन्तं समाचरेत्॥ पुत्रीकुलाङ्गनाभगिनीगमने मूलमन्त्रं लक्षं जप्त्वा शुद्धिः॥ तदुक्तं तत्रैव॥ मन्त्रपुत्रीं प्रपुत्रीं च
भगिनीं स्वकुलाङ्गनाम्॥ रमणाल्लक्षजापेन पूतो भवति साधकः॥ अथ तन्त्रान्तरे॥ पर्वरायपूज्य देवेशि गुरुमग्निं च शक्तितः॥ यदवास्त्वबलि
न्तं मूलमष्टशतं जपेत्॥ पत्रं पुष्पं फलं मूलं मन्त्रपानादि चौषधम्॥ अनिवेद्य न भुञ्जीत दुरितायप्रकल्पितम्॥ अनिवेद्यं तु भुञ्जानो
प्रायश्चित्ती भवेन्नरः॥ देव्याश्चाष्टशतं मन्त्रं जप्त्वा पूतो भवेद्ध्रुवम्॥ अनस्थिप्राणसंघातं हत्वा तु नरकं व्रजेत्॥ हत्वा च पक्षिणां सर्वां स्त्रियश्चे
कादश जपेत्॥ सर्पमार्जारनकुलं श्वानं मुष्कं खरं हयम्॥ गजाश्वांश्च मृगान्सर्वान्हत्वा चाष्टशतं जपेत्॥ जपेदष्टसहस्रन्तु शुद्रजन्तुवधे कृते
हत्वा शूद्रं स्त्रियं बालं मन्त्रं पञ्चशतं जपेत्॥ जपेदष्टसहस्रन्तु सकृद्विनिपातने॥ त्रयोदशसहस्रन्तु दिव्यवीरवधे कृते॥ वीरस्त्रीगमने
वापि वृथापाने तथैव च॥ गुरोः श्रुश्रामपत्नीगमनेन च कौलिकः॥ इदं ज्ञानकृते बोध्यं यं इदमुपलक्षणं स्वं सर्वपक्षिणा इत्यत्रापि बलि
दानव्यतिरेके हिंसाकृते तत्र विहितप्रायश्चित्तं विधेयम्॥ तदुक्तं ब्रह्मयामले॥ कृत्वा वीरवधं मन्त्री वृथापानं गुरोः श्रुयाम्॥ प॥ वीरपत्नीं

कालीतत्व. मन्त्रपुत्रीं रमित्वा लक्षमाजपेत्॥ अन्यत्रापि॥ बलिदानं विना देवि योघातयेद्द्विजादिकान्॥ प्रायश्चित्तं तस्य प्रोक्तं तत्तत्तन्त्रनिदेशतः॥ तदुक्तं का
६१ लीतन्त्रे॥ बलिदानं विना देवि हिंसा सर्वत्र वर्जयेदिति॥ कर्मलोपादिजातपापक्षयार्थं धर्मप्राप्त्यर्थं च दिव्यवीरयोरर्चनं कुर्यात्॥ इदमुपल
क्षणम्॥ तद्विशेषविहितप्रायश्चित्तानुकल्पगङ्गास्नानादिवत्॥ कौलिकानामर्चनमेव प्रायश्चित्तं वोद्धव्यम्॥ तदुक्तं सर्वतन्त्रेपि॥ माहेश्वरांस
मालोक्य पूजयेद्विधिपूर्वपूर्वकम्॥ यथा विभवरूपेण पश्चात्तं निवेदयेच्च॥ तदा तुष्टा भवेद्देवि सर्वान्कामान्लभेद्ध्रुवम्॥ अन्यथा नैव सिद्धिः स्या
त्कुद्धा भवति योगिनी॥ मेदिनीं च सुसम्पूर्णां ब्राह्मणे वेदपारगे॥ दत्वा यत्फलमाप्नोति तत्फलं कौलिकार्चने॥ अश्वमेधसहस्राणि वाजपेय
शतानि च॥ कृत्वा यत्फलमाप्नोति तत्फलं कौलिकार्चने॥ मेरुतुल्यं सुवर्णं तु ब्राह्मणे वेदपारगे॥ दत्वा यत्फलमाप्नोति तत्फलं कौलिकार्चने॥
वापीकूपतडागानि कृत्वा यत्फलमाप्नुयात्॥ तत्फलाल्लक्षगुणितं कौलिकानां प्रपूजने॥ कपिलाश्वगजान्दत्वा यत्फलं लभते नरः॥ तत्फलं
कोटिगुणितं कौलिकानां प्रपूजने॥ कौलिकं निन्दयेद्यस्तु कुलशास्त्रपरायणम्॥ स याति नरके घोरे सद्यस्त्वन संशयः॥ यावदाहूतसंप्लवं
वा॥ तत्प्रायश्चित्तविहीनानामशक्तानां कुलेश्वरि॥ दिव्यवीरार्चनं तेषां प्रायश्चित्ताय कल्पते॥ ॥इति श्रीमद्राघवभट्टविरचिते काली ६१

तत्वे प्रायश्चित्तविधौ चतुर्दशं तत्वम्॥ ॥अथ भावाः॥ तेजोमयं जगत्सर्वं विभाव्य मूर्तिकल्पनम्॥ तत्तत्त्वं च मयैर्मन्त्रैः स्वेन स्वेनैव वापु
नः॥ आत्मानं तन्मयं ध्यात्वा सर्वभावं तथैव च॥ तत्सर्वं योषिति ध्यात्वा चिन्तयेद्यलमानसः॥ अशेषकुलसम्पन्ना नानाजातिसमुद्भवा॥ ना
नादेशोद्भवा वापि गुणालावण्यसंयुता॥ द्वितीयवत्स द्व्यब्दं यावत्स्याद्दशमाब्दिकम्॥ तावत्कुमारी विज्ञेया यन्त्रमन्त्रफलप्रदा॥ कुमारीपूजना
च्चैव कुमारीभोजनादपि॥ एकद्व्यादिबीजानां फलदा नात्र संशयः॥ ताभ्यः पुष्पं फलं वापि अनुलेपादिकं तथा॥ बालप्रियं च नैवेद्यं दत्वा त
द्भावरूपितः॥ दत्वा तदात्मनात्मानं बालभावविचेष्टितः॥ ताभिः प्रायकथालापक्रीडाकौतूहलादिकम्॥ यथा तथा तत्प्रियकृत्कृत्वा सिद्धीश्व
रो भवेत्॥ तस्मात्षोडशपर्यन्तं युवतीति प्रचक्ष्यते॥ तत्र भावप्रकाशश्चेत्स भावः परमो मतः॥ रक्षितव्या प्रयत्नेन भक्षितस्नानकारयेत्॥ तत्र
ल्पानहरिः शक्रोन देवी नापि षोडशी॥ न च मृत्युञ्जयो वापि न न्यासो नापि भावना॥ तस्य मृत्युञ्जयो देव प्रभवन्ति न देवताः॥ शारदेशा भूलयोगेन
नागदंष्ट्रविषेणा वा॥ रौद्रेणाति ज्वरेणैव महाव्याधिवशादपि॥ म्रियन्ते तेन पापेन पुनश्च पशुतां व्रजेत्॥ तस्य पाणिउत्यवेदश्च्यं विचित्रपदज
ल्पना॥ देवता चापि लज्जन्ते किं पुनर्मानवादयः॥ अपि चेत्तत्समानारी मन्त्रमः पुरुषोस्ति चेत्॥ अनिरुद्धसरस्वत्यासमो मन्त्रोस्ति वेत्तदा॥ अस्या

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतन्त्र. जापोऽथजपो ज्ञानमस्यात्मचिन्तनम्॥ योगसंधारणात्सम्यक् ध्यानमस्य न संशयः॥ महापदि महापापे महाग्रहनिवारणे॥ महाभये महोत्पा
६२ ते महाशोके महोत्सवे॥ महामोहे महासौख्ये महादारिद्रसङ्कटे॥ महारण्ये महाशून्ये महाज्ञाने महावने॥ दूराध्वनि पुरावासे दुर्भिक्षे दुर्निमित्त
के॥ समस्तक्लेशसम्पाते स्मरणादेव नाशयेत्॥ अस्या ज्ञानं ध्यानमस्यात्मदर्शनम्॥ तस्मादस्याः समा विद्या नास्ति नैव न संशयः॥ स्मशानश
यने वीरकुलस्त्रीभिर्विहारवान्॥ कुलामृतनिषेवी च कालीतत्त्वस्य कोविदः॥ ब्रह्मादिभुवने तस्य समनास्ति किमु चापरः॥ स स्वयं सुकृती लोके स
एव कुलक्षण॥ धन्या च जननी तस्य येन देवी समर्चिता॥ वक्त्रे सरस्वती तस्य लक्ष्मीस्तस्य सदा गृहे॥ तीर्थानि देहे संसन्ति येन देवी समर्चये
त्॥ गानेन तुम्बुरुः साक्षाद्दानेकर्णसमोपदः॥ रत्नाकरसमो ज्ञानी येन देवी समर्चिता॥ वह्निरिव रिपो हन्ता गाङ्गेव मलनाशकः॥ शुचो शुचिसमः
साक्षादिन्दोरिव सुखप्रदः॥ पितृदेवसमस्मारा कालस्येव दुरासदः॥ वारीशश्च गम्भीरो निर्घोते श्व दुर्धरः॥ वृहस्पतिमो वक्ता धरणीसदृश
क्षमी॥ कन्दर्पसदृशः स्त्रीषु स्त्रदेवी समर्चिता॥ अहो भाग्यमहो लोके कुलज्ञानीपरापरः॥ तेषां मध्ये च यः कोपि कालीसाधनतत्परः॥ त्यज
सित्वं परश्चैव पुमांसं परमं तथा॥ मा दृष्ट्वा चक्रचित्कालेयजसि तं जानन्मये॥ कालीज्ञानि समासाद्य न त्यजन्ति कदाचन॥ नहि कालीसमं ज्ञा ६२

त्वं नहि कालीसमं तन्त्रं॥ नहि कालीसमं ज्ञानं नहि कालीसमं फलम्॥ ये गुणाः परमेशस्य पञ्चकृत्वविधानतः॥ ते गुणाः सर्वयत्नेयं काली
तत्त्वस्य नान्यथा॥ कालिकाहृदये ज्ञानी तत्त्वसाधनतत्परः॥ देववन्मानवो भूत्वा लभेन्मुक्तिं चतुर्विधाम्॥ इति ते कथितं सर्वं कालिकातत्त्वमुत्त
मम्॥ अनेन सं — सर्वकर्मफलं भवेदिति॥ देव्युवाच॥ भगवन् प्रसीद देवेश सर्वप्राणिहिते रत॥ येनावश्यं भवेत्सिद्धिरुपायं वद शङ्कर॥ ई
श्वर उवाच॥ शृणु देवि परं तत्त्वं सर्वज्ञानोत्तमोत्तमम्॥ येन विज्ञानमात्रेण सर्वमत्र उपासकः॥ नोस्मात्परतरो देवो न जातो न जनिष्यति॥ अ
नेकरूपतत्त्वज्ञः सर्वेषां प्रियकारकः॥ मुक्तदुर्गन्धमत्स्यादि सम्यो देवी वलिप्रिये॥ नानासुगन्धियुक्तस्यान्मत्स्यादिभोजनं चरेत्॥ सुगन्धा
मलतैलाधैर्नानामृगविलेपनैः॥ स्नानं कार्यं चाति शुद्धं सूक्ष्मो वासो विधारयेत्॥ सुगन्धिपुष्पमालाभिर्मोल्यालङ्कारभूषितम्॥ स्निग्धं सुमधु
रं स्निग्धं समरूपं मनोहरम्॥ कृतार्थमङ्गं देहं मृदुभाषणतत्परः॥ नाम्ना मधुमती तत्र जायते नात्र संशयः॥ मधुमत्योः फलं देवतस्य भावं शृ
णुष्व मे॥ सुधाधारे धरा वाणी वक्त्रान्तस्य प्रजायते॥ सर्वज्ञः सर्वशास्त्राणामधिपः कुलनायकः॥ चन्द्रसूर्यावधिः पृथ्व्यां भुनक्ति बहुधा सुखं
म्॥ चिरकालं भुवि स्थित्वा चान्ते मोक्षमवाप्नुयात्॥ जलाराधारासंभेदात्तेन जीवेत्सम त्रयुक्॥ यस्य कथितो देव दिव्यभावः सुखावहः॥ न

कालीतन्त्र. देयो यस्य कस्यापि पशोर्गोप्यं प्रयत्नतः॥ वीरभावो महादेव कथ्यते कुलभैरव॥ न च मारीभयं तत्र न च राजभयादिकम्॥ सुमङ्गलं सदा तत्र ध
६३ नपुत्रं विवर्द्धनम्॥ लक्ष्मीस्तत्र महादेव सुस्थिरा च सदा भवेत्॥ यो निर्भिन्नश्चेत्सुप्रश्च न च पापेन युज्यते॥ स तत्र कुजवारे श्मशाने गमने कृते॥
पूजाफलं भवेत्तत्र सप्तवासरसम्मितम्॥ चतुर्दश्यां गते तत्र पक्षपूजाफलं लभेत्॥ नाग तेनार्चिते स्थाने पशुरेवं न संशयः॥ नास्त्यस्य स्मरधिको देव
इति चित्तापरायणः॥ मोदकद्रव्यभुक्त्वानुभवेत्कुलपरायणः॥ साधकक्षोभमापन्नमक्षोभ प्रजायते॥ तस्माद्यत्नाद्भोगयुक्तो भवेद्वीरस
दा सुखी॥ भोगेन मोक्षमाप्नोति भोगेन कुलसाधनम्॥ यत्प्रददाति नि सतियत्करोति यदर्चति॥ तत्सर्वं कुलरूपेण ध्यात्वा च विहरेत्सुखी॥ स्फा
की निर्जने देशे श्मशाने पर्वतेपि वा॥ शून्यगेहे नदीतीरे निःशङ्को विहरेत्सुदा॥ वीराणा जपकालस्तु सर्वस्वं प्रशस्यते॥ सर्वदेशे सर्वपीठे कर्त
व्यं च न संशयः॥ यदि विप्रो भवेद्वेद्यः कुलद्रव्यपरायणः॥ तस्मानेन विधा — कर्तव्यं कुलतोषणम्॥ दत्ते चैक जपपुष्पेप्येदृशस्य फलं लभेत्॥
ब्रह्महत्यादिकं पापं क्षणान्नश्यति निश्चितम्॥ अपरायास्तु माहात्म्यं वक्तुं नैव महेश्वर॥ वीरसाधनकार्यं तु कर्तव्यं वीरपूरुषैः॥ दिव्यैरपि च क
र्तव्यं पशुभिर्नेतु पामरैः॥ नरं पामर कार्यं न च पश्येदिति निश्चितम्॥ यदुक्तं पुरा सङ्केतं तत्र मन्त्रं प्रसाधनम्॥ अञ्जनं गुटिकादीश्च कुर्याद्धी ६३

रो महाबलः॥ दिव्यवीरो न भेदोस्ति यद्वेदः कथ्यते शृणु॥ शान्तो विनीतो मधुरः कलालावण्यसंयुतः॥ दिव्यस्तु स्वकथ्यो वीरश्चाक्रान्तमानसः॥ विभू
तिर्भूषणो वापि चन्दनैर्वा विलेपितः॥ आकारगोपनो वापि व्यक्तो वा कुलभैरवः॥ रक्तचन्दनदिग्धाङ्गो वैशावो वाप्यवैष्णवः॥ असंस्कृतकेश
जालैः संस्कृतो वा कुलेश्वरः॥ अपमाने च पूजायां हृष्टस्तुष्टः सदा भवेत्॥ देवनिन्दापरो वापि तत्पूजादिपरोपि वा॥ पूजाविहिनो हितस्तत्र कुलाला
पमतिस्थितः॥ निजभावसमायुक्तो देववद्विहरेत्क्षितौ॥ स्वकुलान्निपुरश्चर्या कार्या रात्रौ न चान्यथा॥ वेदहीने द्विजे देव यथा मन्त्रेण सत्क्रिया
म्॥ विष्णुभक्तिं विना देव भक्तिर्नैव भवेद्यथा॥ शाक्तं ज्ञानं विना मुक्तिर्यथा हास्याय कल्पते॥ गुरुं विना यथा शास्त्रे नाधिकारः कथञ्चन॥ पति
हीना तु या नारी सर्वकर्मविवर्जिता॥ कुलं विना न यादिव्यो वीरो वा मम पूजकः॥ नाधिकारी भवेद्यस्मात्तस्माद्भावपरो भवेत्॥ अविनीतं कु
लं यस्य स कथं मम पूजकः॥ तस्मात्प्रयत्नात्सततं कार्यं यथास्यादिनयान्वितम्॥ भावाभावात्कुले शास्त्रे नाधिकारकथञ्चन॥ तेन भावविशुद्धस्तु
साधकः कौलिको भवेत्॥ देव्युवाच॥ पशुभावं प्रवक्ष्यामि शृणु त्वं मम भैरव॥ यथाविधि पशुर्विद्यां गृहीत्वा भावतत्परः॥ प्रथमं पूर्वसेवार्थं
यत्नतः सिद्धिमाप्नुयात्॥ न मत्स्यभोजनं वापि न परद्रव्यलोभकृत्॥ सिन्धुतीरे कानने वा पर्वते वा सुरालये॥ विल्वमूले विविक्ते च पुरायक्षेत्रे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

कालीतत्व. सुप्तो भवेत्॥ नग्नां दृष्ट्वा न कुर्यात्तौ दृष्ट्वा दूरतस्त्यजेत्॥ देवतागुरुभावेन ध्यानन्यासमनाहितैः॥ त्रिसन्ध्यं देवतापूजां त्रिसन्ध्यं जपमाचरेत्॥ रात्रौ म
६४ नाचयेच्चस्पृष्टेन्नैव कराच... यामिनी स्यात् सर्वकर्मसु॥ सर्वकाले स्त्रियस्तत्र ... कुर्तुसाधकोत्तमः॥ पुष्पाद्यं जलं चैव
स्वयमानीय पूजयेत्॥ धातुकालं विना गच्छेन्नतु स्वस्त्रियमादरात्॥ पुराणश्रवणे श्रद्धा वेदवादार्थतत्परः॥ नरान्तौ भोजयेद्दिव्यान्त्राम्बूलं पर
मेश्वर॥ गुरुणा यच्च यद्दिष्टं तत्सर्वं यत्नतश्चरेत्॥ अपि तत्कुसुमं चैव हेतुद्रव्यं च भैरव॥ स्पृष्ट्वा स्त्रियं त्रिरात्रेण पञ्चगव्येन शुध्यति॥ रक्तवस्त्रं
न गृह्णीयाद्देवी भक्तिपरायणाः॥ विशुद्धञ्चोक्तपूजादि तत्स्वस्थानमेव च॥ कार्यं न कुर्यात् कथालापं न कुर्याद्देवनिन्दनम्॥ नित्यश्राद्धं गवाग्रासं
त्रिसन्ध्यां वैश्वदेवकम्॥ तीर्थस्नानं पीठदेशगमनं धर्मतत्परः॥ पशुशुद्धिविधौ देव पूर्वेणा सह भैरव॥ अस्याधिकारपूजायां न गुरुत्वे कथं
चन॥ पूर्वस्य नाधिकारोऽस्ति पूजादेशगतागतम्॥ पूर्वतस्तु कौलिके कौर्ये न बहिःकार्यः स्वदेशतः॥ पूर्वदर्शनमात्रेण कुलदर्शनमाचरेत्॥ ब्रह्म
हत्यादिकं पापं वांशकं न च प्रभो॥ पूर्वदर्शनमात्रेण सचराचरस्य न संशयः॥ महत्यासोऽपि देवेश विमुरित्यपि स प्रभो॥ कुलशास्त्रेत्रयं देवगि
रुः कुलनायकः॥ स्वकुले महती निन्दा परयोगे परमेश्वर॥ कस्मादपि च तत्पापं पशुसंज्ञा प्रजायते॥ सर्वथा तत्र भावो हीन प्रकाश्य कथं चन॥ स ६४

भावश्च भाव श्च पशुभावः कीर्तिता द्विधाः॥ स भावः पशुभावेन जगत्त्रयविभावनात्॥ वीरभावो भवेद्देवि दिव्यभावश्च जायते॥ वीरात् प्रजायते दिव्यो दि
व्याद्वीरः प्रजायते॥ दिव्यवीरेण भेदोऽस्ति सास्यम चो विधीयते॥ भावस्तु मनसो धर्मः शब्दः साहि कथं भवेत्॥ तस्माद्भावो न शक्यो देवि चं समुदा
हृतम्॥ यथेक्षुगुडमाधुर्यं वसनाप्रीयते प्रभो॥ तथा भावविभावस्तु मनसा परिभाव्यते॥ एक एव महादेवो नानात्वं भजते प्रभुः॥ उपाधिभावभेदे
न भावो भेदेन दृश्यते॥ आनन्दघनसन्दोहः प्रभुः प्रकृतिरूपधृक्॥ रसरूपस्स आत्मा स प्रभुः परमो मतः॥ श्रोतव्यः स च मन्तव्यः निदिध्यातव्य एव सः॥
साक्षात्कार्यः स आत्मा आगमैर्विविधैः प्रभो॥ श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यो मननादिभिः॥ सोपपत्तिभिरेवायं ध्यातव्यो गुरुदेशिके॥ तदा स ए
व सर्वात्मा प्रत्यक्षो भवति क्षणात्॥ तस्मिन्देहे तु देवेश प्रत्यक्षे परमेश्वर॥ भवैर्बहुविधैर्देव भवेत्सा पिनीयते॥ मुक्तानाना ---- गविचे
कोयथारसः॥ दुग्धाज्यस्यास्य योगेन नानात्वं लभते प्रभो॥ तद्गोऽन जायते देव सत्समिन परो रसः॥ तस्माद्दधि -- हव्यं तस्मादपि रसोदयः॥ सर्व
व कारणं तत्र तस्मात् सर्वं चलक्ष्यते॥ दृश्यते च महादेव न कार्यं नापि कारणम्॥ तथैवायं स आत्मा नानाविधयोनिमुक्त॥ जायते जनिष्यते ज
नः कलभेदाद्विभज्यते॥ स जातः समृतो वृद्धः समुक्तः स सुखी पुमान्॥ स स्त्री स नपुंसकः स्या --- स्वमेव रसः॥ नानाध्यानसमायोगान्नाना

कालीतत्व. त्वं भजते प्रभो॥ एक एव स आत्मा सर्वरूपी सनातनः॥ अव्यक्तः स च व्यक्तः स्यात् प्रकृत्या ज्ञायते क्रमात्॥ तस्मात् प्रकृतियोगेन ज्ञायते नान्यथा क्व
६५ चित्॥ विना घटत्वयोगेन प्रत्यक्षोऽपि यथा घटः॥ इतरा द्वयमानो ऽपि न भेदमुपगच्छति॥ मां विना देव पुरुषो न चयाति कथं चन॥ न प्रयोगेन
तु ज्ञानेन श्रुत्यान गुरुक्रमात्॥ प्रकृत्या ज्ञायते ऽस्मिन् प्रकृत्या लुप्यते पुमान्॥ प्रकृत्यधिष्ठितं सर्वं प्रकृत्या वस्थितं जगत्॥ प्रकृत्या भेदमाप्नोति
प्रकृत्या भेदमाप्नुयात्॥ नरस्तु प्रकृतिश्चैव न पुमान् परमेश्वरः॥ तयोः समरसं ज्ञानं वस्तुतत्त्वं महेश्वर॥ उभयोः समवायस्तु वस्तुतत्त्वं परं पदम्॥
ज्ञानेनास्मि स्वयं प्राप्तश्चित्स्वरूपः पुमानसौ॥ निराकारं सर्वदेव प्रमाणागौरवः पुमान्॥ व्यक्तो भवति देवेश स्वयमात्मसमुद्भवः॥ उपायोऽस्
ति बहुधा ज्ञातुं ब्रह्म सनातनम्॥ तथापि प्रकृतेर्योगात्क्षिप्रमव्यय तां व्रजेत्॥ मायात्रिका ज्ञानसेतुर्दैव चैव प्रचक्षते॥ नानादेशं समुत्तीर्य स
मुत्तरं मन्ये चिरात्॥ तन्तुनेनात्र मास्थाय क्षणाद्यातिर्यथा प्रभो॥ विष्णुत्वं चैव शैवत्वं ब्रह्मत्वं चैव भैरव॥ वैजात्यं ज्ञाति चेत्तत्र कथं चन तद्विकार
णाम्॥ तस्मात्परं परायाता स्ते हि कारणतां गतः॥ न कारणं हि तद्वस्तु साक्षात्प्रतिकारणम्॥ स्त्रीभावः प्रकृतिर्ज्ञेया पुंभावः पुरुषोत्तमः॥ त्रिप
ज्ञेय विभागेन ज्ञायातां भैरवेश्वर॥ घटप्रत्यक्षतायां तु ज्ञातो कोऽयं च कोयथा॥ चक्षुरादितरं किंचिद्दधिकं निर्विकल्पनम्॥ घटत्वं पुनरेतस्य ६५

भेदकारणमेव हि॥ यथा त्रित्रिविभागेन यथाव्य ज्ञतां गतः॥ साक्षात्कारणमेवेन प्रकृत्या चैव भैरव॥ दिव्यभावो वीरभावो यस्य चित्ते व्यवस्थि
तः॥ जीवन्मुक्तः स आत्मा भोगार्थं न रचते महीम्॥ देवीपुत्रः स आत्मा भैरवः परिकीर्तितः॥ भावत्रयाणां मध्ये तु भावौ तौ परिकीर्तितौ॥ तव कथ्यं
महादेव कुलसार कुलोत्तमैरिति॥ ॥ इति श्रीमद्राघवभट्टविरचिते कालीतत्त्वे भावनिर्णयो नाम पञ्चदशं तत्त्वम्॥ ॥ अथ कुमारीपूजन
विधिरुच्यते॥ तदुक्तं यामलादौ॥ एकवर्षा भवेत् सन्ध्या द्विवर्षा च सरस्वती॥ त्रिवर्षा च त्रिधामूर्तिश्चतुर्वर्षा च कालिका॥ सुभगा पञ्चवर्षा षड्
वर्षा च भवेदुमा॥ सप्तभिर्मालिनी साक्षादष्टवर्षा च कुब्जिका॥ नवभिः कालसङ्कर्षा दशभिश्चापराजिता॥ एकादशाब्दे रुद्राणी द्वादशाब्दे च भैरवी
वी॥ त्रयोदशे महालक्ष्मीर्द्विसप्ता कुलनायिका॥ क्षेत्रज्ञा पञ्चदशभिः षोडशे चाम्बिका मता॥ एवं क्रमेण सम्पूज्येत् यावत्पुष्पं न विद्यते॥ प्रतिपदा
दिपूजा त्वं वृद्धिभेदेन पूजयेत्॥ महापर्वसु सर्वेषु विशेषाच्च पवित्रके॥ महानवम्यां देवेशि कुमारीं च प्रपूजयेत्॥ कुमारीं पूजयेद्यस्तु षोडशोप
चभक्तितः॥ पूजयित्वा च भक्त्या च सर्वसम्पत्तिमान् भवेत्॥ पूजयेत् कुलविद्याना मेकामानवभैरवी॥ एवं प्रणवयोगेन चैतन्यमर्चयेत्तनुम्॥ ऐं
कारेण जलं देयं ह्रीं कारेण पदसेचनम्॥ श्रीं कारेणार्घ्यं दद्याच्च कूर्चबीजेन चन्दनम्॥ शक्तिबीजेन पुष्पाणि धूपं पञ्चेन दापयेत्॥ अर्चयेद्देवमड

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतन्त्र. ग्नानिकामेश्वर्यादिनामतः॥वागुरेणपुरक्षोभेमायावीजेनगुणाष्टकम्॥श्रियोवीजेश्रियोनाथस्त्रींवीजेनाधिसंशयः॥भैरवस्यतुवीजेनषड
६८ त्वमुपजायते॥कुमारिकाग्रहंनाथसदात्वचक्रमारिका॥अस्योनरशतमवापिस्कांकन्यांप्रपूजयेत्॥पूजिताप्रतिपूज्यन्तेनिर्दहन्त्यपमानिता॥
भूर्भुवोभूर्निमादेवकुमारीरुद्रपूजिता॥असुरादुर्दुरानामास्नेदुस्त्यहादपि॥भूतवेतालगन्धर्वाडाकिनीयक्षराक्षसाः॥नदीयन्देवताःसर्वे
भूर्भुवस्वैवभैरव॥पृथिव्यादीनिसर्वाणिब्रह्माण्डंसचराचरम्॥ब्रह्माविष्णुहरश्चैवईश्वरश्चसदाशिव॥भैरवगणसर्वंदुस्थाश्चयस्तुकन्यांप्र
पूजयेत्॥कालाग्निशिवपर्यन्तंतथाकार्यादिसंहति॥सप्तद्वीपासमुद्राश्चभुवनानिचतुर्दश॥विभिनद्युक्तकैमारींभोजयेच्चैवभैरवीम्॥पा
द्यमर्घंतथाधूपंकुङ्कुमंचन्दनंशुभम्॥भक्तिभावेनसम्पूज्यनिवेदयेत्सुसाधकः॥प्रदक्षिणात्रयङ्कुर्यादाडिमश्चेशुभंभवेत्॥पश्चाद्दक्षि
णांदेयारजतंस्वर्णमौक्तिकम्॥विवाहयेत्स्वयंकन्याब्रह्महत्याविनश्यति॥गोहत्यावास्त्रीहत्याचसर्वपापंप्रणश्यति॥मातापितरौदेवभ्रा
तरश्चैवसर्वथा॥येचयेचे———पुःकन्यादानंप्रकुर्वते॥भुक्तिमुक्तिफलन्तेषांसर्वसौभाग्यसम्पदः॥रुद्रलोकेवसेन्नित्यंत्रिनेत्रोभगवा
न्हरः॥षष्टिकोटिसहस्राणिअश्वमेधमेधफलंलभेत्॥तत्फलंलभतेसद्यःकन्यांयस्तुविभावयेत्॥वालुकासागरेयावत्तावद्रुद्रनरेश्वरः॥ ६६

एकैकंकुलमुकृत्यस्वर्गलोकेगतेऽपिच॥तावत्सभुञ्जतेभोगान्यावद्भूमिर्दिवौकसः॥कन्यादानंमहादानंसर्वदानेषुचोत्तमम्॥दौर्भाग्यनश्यति
क्षिप्रंसौभाग्यञ्चप्रवर्तते॥राजद्वारेभवेत्पूजामानश्चैवकुलेश्वर॥सर्वथैवकुमारींश्चपूजयेच्चप्रयत्नतः॥महाभयसमुत्पन्नेकन्यकाश्चप्रपू
जयेत्॥अन्तेचलभतेमोक्षंसत्यंसत्यन्तुभैरव॥ ॥अथपद्धतिः॥प्रतिपदिसन्ध्यानाम्नीकुमारिकामानीयगन्धोदकेनसंस्नाप्यचन्दनादिना
संलिप्यकामरूपपीठेनवकोणचक्रंनिर्माययुष्पसङ्कीर्णोपुरोवर्त्तिनिपीठेसंवेश्य॥प्रथमत्रिकोणे॥ऐंह्रींश्रींह्स्रौंहुंसेंकुलवागीश्वर्यैनमः॥
ऐंपभगमालिन्यै२॥ततःषट्कोणेऽङ्गकुमार्याःशक्तिःपूजयेद्यथा॥ऐंकुलकुमारिकेहृदयायनमः॥ऐं५नायिकेशिरसेस्वाहा॥ऐं५कुल
भैरविशिखायैवौषट्॥ऐं५कुलवागीश्वरीकवचायहुम्॥ऐं५ ॥ऐंकुलपालिकेअस्त्रायफट्॥ऐं५सिद्धिज्ञापेपूर्वव
क्त्रायनमः॥ऐं५जपेउत्तरवक्त्रायनमः॥ऐं५कुब्जिकेपश्चिमवक्त्रायनमः॥ऐं५कान्तिकेदक्षिणवक्त्रायनमः॥सम्यक्संनिसम्पूज्य॥ऐं५सन्ध्ये
कुलकुमारिकायैइदमाचमनीयं२॥ऐंह्रींसन्ध्यायैकुलकुमारिकायैपाद्यंनमः॥श्रींसन्ध्यायैकुलकुमारिकायैएषअर्घो२॥ह्स्रौंसन्ध्यायैकु
लकुमारिकायैइदंचन्दनं२॥हुंसन्ध्यायैकुलकुमारिकायैइदमुष्पं२॥सेंसन्ध्यायैकुलकुमारिकायैइदंवस्त्रं२॥ऐं५सन्ध्यायैकुलकुमारि

कालीतन्त्र. कायैइदंवस्त्रं२॥एवंक्रमेणषोडशोपचारैर्दशोपचारैर्वाकुमारींपूजयित्वाखिलचक्रेसपरिवारांमूलदेवतांसम्पूज्यप्रदक्षिणीकृत्यदण्डव
६७ त्प्रणम्ययथासम्भवंस्वर्णादिदक्षिणांदत्वाविसर्ज्य॥साध्यंकुमारिकेप्रातःक्षमस्वेतिविसर्जयेदिति॥एवंद्वितीयदिनेसरस्वतीकुमारिके
सम्पूजयेत्॥तृतीयदिनेत्रिमूर्तिकुमारिकांपूजयेदेवंचतुर्थदिनेकालिकांकुलकुमारिकांपूजयेदेवंपञ्चमीषष्ठीसप्तमीअष्टमीनवमी
दशमीएकादशीद्वादशीत्रयोदशीचतुर्दशीपौर्णमासीक्रमेणयथासंख्यंसुभगाउमामालिनीकुब्जिकाकामसंकर्षणीअपराजितारुद्रा
णीभैरवीमहालक्ष्मीपीठनायिकाक्षेत्रज्ञाचर्चिकाकुलकुमारिकाःपूजयेत्॥यदिचएकस्मिन्नेवदिवसेनानावयस्काःकुमारींपूजयत्
तदपिचवयोनुसारेणसन्ध्यादिनामसंज्ञाकार्याबहुतराभावेएकत्रापिवयोनुसारेणसंज्ञाकृत्वापुष्पादशपर्यन्तंपूजयेदिति॥स्थिरवि
त्तश्चस्वयंभवेदिति॥तदुक्तंमुण्डमालायाम्॥कुमारीपूजनेऽशक्तोनारींस्वप्नेनस्मरेदित्यन्यत्रापिप्रेसताम्भानकारयेदितितथाकृतेऽनि
ष्टस्यापिश्रवणात्॥तदुक्तंभावचूडामणौ॥नरविसुहरिशम्भुनदेवीनापिषोडशी॥नवामृत्युञ्जयोवापिनन्यासोनचभावना॥तस्यमृत्युः
क्षयेदेवप्रभवन्तिनदेवता॥ ॥इतिश्रीमद्राघवभट्टविरचितेकालीतन्त्रेकुमारीपूजनविधौषोडशंतन्त्रम्॥ ॥अथमालाविधिः॥तदु ६७

क्तंकालीतन्त्रे॥रुद्राक्षमालयाचैवराजदन्तेनमेरुणा॥जपेदितिशेषः॥तत्रैवदन्तेनकालिकायास्तुपूर्वोक्तन्तुविदुर्लभा॥यामलेपि॥नरे
भास्वक्षमुण्डानांछिन्नानांरणसंकुले॥मालांवैकारयेद्धन्यांमहाविद्यांसुसाधकः॥अन्यत्रापि॥गजवाजिनराणाञ्चमुण्डानामक्षमालया
लक्षमावर्तयेन्मन्त्रंमहाविद्यांसुसाधकः॥विशुद्धेश्वरमहातन्त्रे॥मालाविधानंपरमंशृणुपार्वतितत्त्वतः॥येनविज्ञानमात्रेणमन्त्राःसिद्ध
न्तितत्क्षणात्॥अनुलोमविलोमेनमन्त्रमावर्तभेदतः॥मन्त्रेणान्तरितान्वर्णान्वर्णानान्तरितंमनुः॥कुर्यात्द्वर्णमयींमालांसर्वमन्त्रप्रदीपनम्॥
क्षकारंमेरुरूपन्तुलंघनंनैवकारयेत्॥एतत्परमरहस्यंलयोक्तन्तेयशस्विनि॥त्वयागुप्तभवंकार्यंनाख्येयंयस्यकस्यचित्॥यामलेपि॥
सविन्दुंवर्णमुच्चार्य———त्वंजपेत्सुधीः॥सुमेरुंकंकल्पयित्वाजपेन्तुनाभिलंघयेत्॥अथकरमालायथा॥वृहच्छ्रीक्रमे॥तर्जन्ययेत्तथा
मध्येयोजपेत्सतुपापकृत्॥अनामायास्त्रयंपर्वकनिष्ठायास्त्रयन्तथा॥मध्यमायास्त्रयंपर्वतर्जनीमूलपर्वणि॥जपेदित्यर्थः॥हंसपारमे
श्वरेपि॥पर्वद्वयमनामायापरिवर्तेननैवक्रमात्॥पर्वत्रयंमध्यमायातर्जन्येकंसमाहरेत्॥शक्तिमालासमाख्यातासर्वमन्त्रप्रदीपिका॥
नियआप्यद्वैरेकुर्याच्चतुकाम्यद्रूपचनेति॥अथमालासंस्कारः॥तदुक्तंनीलतन्त्रे॥एकैकमालमादायब्रह्मग्रन्थिविनिर्दिशेत्॥अनुलोम

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतत्व. विलोमाभ्यां मातृकाभ्यां तिलाज्यपेत॥ ...॥ इति श्रीमद्राघवभट्टविरचिते कालीतत्त्वे सप्तदशं तत्त्वम्॥ ॥
९८ ॐनमः कालिकायै॥ कैलासशिखरारूढं भैरवं चन्द्रशेखरम्॥ वक्षःस्थलसमासीना भैरवी परिपृच्छति॥ भैरव्युवाच॥ देवेश परमेशान लोका
नुग्रहकारक॥ कवचं सूचितं पूर्वं किमर्थं न प्रकाशितम्॥ यदि मे महती प्रीतिस्तवास्ति कुलभैरव॥ कवचं कालिकादेव्याः कथयस्वानुकम्पया॥
भैरव उवाच॥ अप्रकाश्यमिदं देवि नरलोके विशेषतः॥ लक्षवारं बोधितापि स्त्रीस्वभावाद्धि पृच्छसि॥ देव्युवाच॥ सेवकाबहवो देव कुलधर्मप
रायणाः॥ यतस्तेन्यक्तजीवाश्च शवोपरि चितोपरि॥ तेषां प्रयोगसिद्ध्यर्थं स्वरक्षार्थं विशेषतः॥ पृच्छामि बहुशो देव कथयस्व प्रसादतः॥ श्रीभैर
व उवाच॥ कथयामि शृणु प्राज्ञे कालिकाकवचं परम्॥ गोपनीयं पशोरग्रे स्वयोनिरपरे यथा॥ सर्वविद्यामहाराज्ञी कालिकादेवीकवचस्य
भैरव ऋषिरुष्णिक्छन्दो दक्षिणरूपिणी कालिका देवता हूँ बीजं ह्रीं शक्तिः क्रीं कीलकं सर्वार्थसाधनपुरःसरमन्त्रसिद्ध्यै जपे विनियोगः॥ सहस्रारे
महापद्मे कर्पूरधवलो गुरुः॥ वामोरुस्थितशक्तिश्च सदा सर्वत्र रक्षतु॥ परमाख्यगुरुः पातु परापरगुरुस्तथा॥ परमेष्ठी गुरुः पातु दिव्यः सिद्धि
श्च मानवः॥ महादेवी सदा पातु महादेवस्तथावतु॥ त्रिपुरो भैरवः पातु दिव्यरूपधरः सदा॥ ब्रह्मानन्दः सदा पातु पूर्णदेवस्तथावतु॥ चलचित्त ९८

सदा पातु चलाचलश्च पातु माम्॥ कुमारः क्रोधनश्चैव वरदस्स्मरदीपनः॥ मायामायावती चैव सिद्धौघाः पान्तु सर्वदा॥ विमलः कुशलश्चैव भीम
सेनः सुधाकरः॥ मीनो गोरक्षकश्चैव भोजदेवः प्रजापतिः॥ शिरसः पादपर्यन्तं पातु मां घोरदक्षिणा॥ तथा शिरसि मां काली हृदिमूले च रक्षतु॥
सम्पूर्णविग्रहा देवी सदा सर्वत्र रक्षतु॥ क्रीं क्रीं क्रीं वदने पातु हृदि ह्रीं ह्रीं सदावतु॥ हूँ हूँ पातु सदा धारे कालिका दक्षिणा हृदि॥ क्रीं पूर्वे हूँ हूँ दक्षे क्रीं
क्रीं क्रीं वामतोवतु॥ पृष्ठे पातु सदा स्वाहा मूलं सर्वत्र रक्षतु॥ षडङ्गयुवती पातु षडङ्गेषु सदैव माम्॥ यन्त्रराजः सदा पातु ऊर्ध्वाधो दिग्विदिक्स्थितः
चक्रराजस्थिताश्चापि देवताः परिपान्तु माम्॥ उग्रा उग्रप्रभा दीप्ता पान्तु पूर्वत्रिकोणके॥ नीला घना बलाका च तथा परत्रिकोणके॥ मात्रा मुद्रा मि
ता चैव तथा मध्ये त्रिकोणके॥ काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी॥ बहिः षट्कोणगाः पान्तु विप्रचित्ता तथा प्रिये॥ सर्वाः श्यामाः खड्गधरा
वामहस्तेन तर्जनाः॥ ब्राह्मी पूर्वदले पातु नारायणी तथाग्निके॥ माहेश्वरी दक्षदले चामुण्डा रक्षसेवतु॥ कौमारी पश्चिमे पातु वायव्ये चापराजि
ता॥ वाराही चोत्तरे पातु नारसिंही शिरेवतु॥ ऐं ह्रीं असिताङ्गः पूर्वे भैरवः परिरक्षतु॥ ऐं ह्रीं रुरुश्चाग्निकोणे ऐं ह्रीं चण्डश्च दक्षिणे॥ ऐं ह्रीं क्रोधो नैरृ
ते स्यादैं ह्रीं उन्मत्तकस्तथा॥ पश्चिमे ऐं ह्रीं मां कपाली रक्षतु वायुकोणके॥ ऐं ह्रीं भीषणनामा च उत्तरेवतु॥ ऐं ह्रीं संहार ऐशान्यां मातृणां संगगाः

कालीतत्व. शिवाः॥ ऐं हेतुवटुकः पूर्वदले पातु सदैव माम्॥ ऐं त्रिपुरान्तवटुकाग्नेयां सर्वदावतु॥ ऐं वह्निवेतालोपि वटुको दक्षिणे मां सदावतु॥ ऐं अग्निजिह्व
९९ टुर्व्याने नैरृत्यां पश्चिमे तथा॥ ऐं कालवटुकः पातु ऐं करालवटुस्तथा॥ वायव्यामैं एकपाद उत्तरे वटुकोवतु॥ ऐं भीमवटुकः पातु ऐशान्यां दिशि
मां सदा॥ ऐं ह्रीं ह्रीं हूँ फट् स्वाहा घोराश्चतुःषष्टिमातरः॥ ऊर्ध्वाधो दक्षमामाग्रे पृष्ठदेशे सुपान्तु माम्॥ ऐं हुं सिंहव्याघ्रमुखी पूर्वे मां परिरक्षतु॥ ऐं कौं
कौं सर्पास्यमुखा अग्निकोणे सदावतु॥ ऐं मौं मौं मृगमेषमुखी दक्षिणे मां सदावतु॥ ऐं चौं चौं गजवाजिमुखी नैरृत्यां मां सदावतु॥ ऐं मैं मैं
विडालमुखी पश्चिमे पातु मां सदा॥ ऐं वौं वौं क्रोष्टुमुखी दक्षिणे मां सदावतु॥ ऐं हौं हौं ह्रस्वदीर्घमुखी लम्बोदरमहोदरी॥ पातु मामुत्तरे को
णे ऐं ह्रीं ह्रीं शिवकोणके॥ ह्रस्वजङ्घा तालजङ्घा प्रलम्बोष्ठी सदावतु॥ एताः श्मशानवासिन्यो भीषणा विकृतानना॥ पान्तु मां सर्वदा देव्यः साध
काभीष्टपूरिकाः॥ इन्द्रो मां पूर्वतो रक्षेदाग्नेयामग्निरेव च॥ दक्षे यमः सदा पातु नैरृत्यां नैरृतिश्च माम्॥ वरुणोवतु मां पश्चाद्वायुर्मां पातु वा
यवे॥ कुबेरश्चोत्तरे पायादैशान्यां तु सदा शिवः॥ ऊर्ध्वं ब्रह्मा सदा पातु अधश्चानन्तदेवता॥ पूर्वादिदिक्स्थिता पान्तु वज्राद्याश्चायुधाश्च माम्॥
कालिका पातु शिरसि हृदये कालिकावतु॥ दिक्षु मां कालिका पातु विदिक्षु कालिकावतु॥ ऊर्ध्वे मे कालिका पातु अधश्च कालिकावतु॥ चर्मसृ ९९

ङ्मांसमेदोस्थिमज्जाशुक्राणि मेवतु॥ इन्द्रियाणि मनश्चैव देहं सिद्धिश्च मेवतु॥ आकेशात्पादपर्यन्तं कालिका मे सदावतु॥ वियन्तं कालिका पातु प
थि मां पातु कालिका॥ शयने कालिका पातु दारान्मे पातु कालिका॥ पुत्रान्मे कालिका पातु धनं मे कालिकावतु॥ यत्र मे संशयो विघ्नस्तत्र माम्
तु कालिका॥ इतीदं कवचं देवि ब्रह्मलोकेपि दुर्लभम्॥ तव प्रीत्या मयाख्यातं गोपनीयं स्वयोनिवत्॥ तव स्मृते तु देवेशि सर्वयज्ञफलं लभेत्॥
सर्वपापक्षयं याति वाञ्छा सर्वत्र विन्दति॥ नाम्नः शतगुणं स्तोत्रं ध्यानं तस्माच्छताधिकम्॥ शुचिः समाहितो भूत्वा भक्तिश्रद्धासमन्वितः॥ सं
स्थाप्य वामभागे तु शक्तिं स्वाभिपरायणाम्॥ रक्तवस्त्रसमासीनः शिवमन्त्रपरांशु भाम्॥ स॥ या शक्तिः सा महादेवी शिवरूपस्तु साधकः॥ अ
न्योन्यचिन्तनाद्देवि देवत्वमुपजायते॥ शक्तियुक्तो जयेद्देवीं चक्रे वा मनसापि वा॥ भावेश्च मधुपर्काद्यैस्ताम्बूलाद्यैः सुवासितैः॥ ततस्तु कवचं
दिव्यं पठेदेकमनाः प्रिये॥ तस्य सर्वार्थसिद्धिः स्यान्नात्र कार्यविचारणा॥ इदं रहस्यं परमं परं स्वस्त्ययनं महत्॥ यः सकृत्तु पठेद्देवि शृणुयाद्वा
समाहितः॥ स सर्वान्स लभते कामान्परे देवीपुरं व्रजेत्॥ सकृद्यस्तु पठेद्देवि कवचं देवदुर्लभम्॥ सर्वयज्ञफलं तस्य भवेदेव न संशयः॥ संया
मे स जयेच्छत्रून्मातङ्गानिव केशरी॥ अस्त्राणि तस्य शस्त्राणि शरीरे प्रभवन्ति हि॥ तस्य व्याधिः कदाचिन्न दुःखं नास्ति कदाचन॥ गतिस्तस्ये

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतन्त्र. वसर्वंजयमोसुल्योसदा भवेत्॥ दीर्घायुः कामभोगी स्याद्गुरुभक्तो भवेत्सदा॥ अहो कवचमाहात्म्यं पठ्यमानस्य नित्यशः॥ विनापि योगचर्ये
७० रा योगीनां समतां व्रजेत्॥ भूर्जत्वचि समालिख्य चक्रमन्त्रविनिर्मितम्॥ मध्ये त्रिकोणमालिख्य साध्यसाधकयोर्लिपिम्॥ ऊर्द्धरेखे मूलमन्त्रं च
मातृकार्णान्वेष्टयेत्॥ लघुमिश्रेण चन्द्रेण चन्दनाभ्यां च सुन्दरि॥ एतद्यन्त्रं महेशानि सुरस्येव तु दुर्लभम्॥ गोरोचनकुङ्कुमेन नदासकवचं लि
खेत्॥ श्वेतसूत्रेण संवेष्ट्य यन्त्रोपरि मरूपयेत्॥ पञ्चामृते मग्नबेश्वापयित्वा सुशोभने॥ सम्पूज्य देवतारूपां गुटिकां सर्वकामदाम्॥
प्राणप्रतिष्ठामन्त्रेण प्राणांस्तत्र नियोजयेत्॥ अत्र योनिं ततो ध्यात्वा तत्र संस्थापयेद्बुधः॥ स्यात् गुटिकां देवि कम्बलया स्विलप्रदा॥ शीर्षे
वक्षसि करे देविना मोसन्मनकारिणी॥ वध्वा वामभुजे ह्येषा वैरिपक्षक्षयङ्करी॥ दक्षिणे बाहुमूले वै यदि तिष्ठति सर्वदा॥ नदा सर्वार्थसिद्धिः
स्याद्यद्यमनासिवर्तते॥ च्यह हकवचस्यास्य पठनाद्धरणात्प्रिये॥ सर्वान्कामानवाप्नोति तत्वले हात्प्रकाशितम्॥ गुरोः पादप्रसादेन सिद्धिः स्याद्
दिलभ्यते॥ तथैव कवचं देवि त्रिलोके सुदुर्लभम्॥ स च देवो हरः साक्षात्पत्नी परमेश्वरी॥ यस्य भक्तिर्गुरौ नित्यं वर्तते देवि विप्रिये॥
न रामस्य यत्रस्या सिद्धिर्भवति नान्यथा॥ कवचस्य तथा सिद्धिर्गुटिकायाश्च सुन्दरि॥ अज्ञात्वा कवचं देवि विनायस्तु गुरुपादुकाम्॥ न ७०

स लक्षमवाप्नोति परे च नरकं व्रजेत्॥ सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः॥ न शक्नोमि प्रभावं तु कवचस्य तु वर्णितुम्॥ यस्मै कस्मै न दातव्यं क
वचं परमदुर्लभम्॥ न देयं परशिष्येभ्यः कृपणेभ्यश्च सुन्दरि॥ शिष्याय भक्तिहीनाय दुष्टकाय तथैव च॥ गुरुभक्तिविहीनाय परदारपराय च॥
निन्दकाय कुशीलाय दातिकाय च सुन्दरि॥ यो ददाति निषिद्धेभ्यः कवचं मन्त्रसंयुतम्॥ देयं शिष्याय शान्ताय गुरुभक्तिपराय च॥ सर्वलक्षणयु
क्ताय तन्त्रयुताय च॥ ॥इत्युत्तरतन्त्रे कालीप्रस्तारे कालीभैरवसम्वादे कालीकवचं समाप्तम्॥ ॥इत्यष्टादशं तत्त्वम्॥ ॥अथ शान्तिः॥
चक्रमध्ये घटे भग्ने मात्रे च पतिते भुवि॥ दीपनाशे च शान्त्यर्थमीश्वरं कारयेद्बुधः॥ क्षोभः स्याद्यदि वीराणां शान्तिना चक्रलेश्वरि॥ अन्यथापि च कृत्या
ते कुर्यात् शान्तिं सुसाधकः॥ तदुक्तमुदयकरपङ्क्तौ॥ कृत्वा मन्त्रं तु स्मरेद्गुरुपदं देवीं कलां चिन्मयीं पश्चाद्यावरं पत्नीस बन्धुं तत्प्रीपर्यन्तकं गतैः॥
पुष्पादिभिरभिरचितं च निविडं सम्मोहकं ध्वंसकं ये सिवन्ति पिबन्ति पान्ति स तु ते भुक्तिं च मुक्तिं पराम्॥ तन्त्रान्तरे च॥ सिन्दूरतिलकं भाले गोरोचन
दिराश्रवम्॥ हृत्वापि वेकुलं ध्यायत्तथा देवी च चिन्मयीम्॥ रुद्रयामलेपि॥ साधकेभ्योऽथ शक्तिभ्यो दद्यान्निर्माल्यचन्दनम्॥ सामयिके समं कु
र्यादि विधानादि भक्तराम्॥ अन्यत्रापि॥ निवसे चक्रमेणापं क्वचित्कारेणायथा॥ शक्तियुक्तो वसेद्वापि युग्मयुग्मविधानतः॥ शिवशक्तिप्रिया

कालीतन्त्र. सर्वं चक्रमध्ये समर्पयेत्॥ तन्त्रान्तरे च॥ ततः पुष्पं समादाय गुरोः पात्रे निवेदयेत्॥ गुरवे वा निवेद्याथ दूत्यै दत्वा स्वयं हरेत्॥ भावचूडामणौ च॥ साक्षा
७१ द्यदि गुरुर्न स्यात्तदा तोये विनिःक्षिपेत्॥ अथोत्तरतन्त्रे॥ अनुज्ञां पुरतो लब्ध्वा गृह्णाति मीनिः स्वयं वदेत्॥ गुरुस्त्वेनाभ्यनुज्ञातो गुरुणा वा कुलीनकैः॥ गृ
ह्णीयाच्च स्वयं सिद्धो यद्वपन्नासनं सुधीः॥ कुलार्णवे च॥ एकासनेन विशेये भुञ्जीत चैकभोजने॥ एकपात्रं पिबेद्द्रव्यं नैर्याति नरकाध्वनि॥ विनामन्त्रे
णाप्यपूजा विना मांसेन तर्पणम्॥ विना शक्त्या च यत्स्थानं तत्स्थानं निष्फलं भवेत्॥ स्वशक्तिं वीरशक्तिं नारीक्षितां गुरुमयशीम्॥ पाययित्वा पिबेद्द्रव्य
मिति शास्त्रस्य निर्णयः॥ न पश्चाच्चमूर्ध्नि पात्रं न बिन्दुं पातयेदधः॥ नैकहस्तेन दातव्यं न मुद्राविवर्जितं पुनः॥ नार्चयेदेकहस्तेन न पिबेदेकपाणि
ना॥ अन्योन्यचर्वणं कृत्वा पिबेत्तद्धृतं सुधीः॥ सव्येनोद्धृत्य पात्रं तु मुद्रां कृत्वाऽपसव्यतः॥ विना सङ्केतयोगेन न कुर्याद्द्रव्यसङ्गनिम्॥ साधारो नो
द्धरेत्पात्रमाधारे विनिःक्षिपेत्॥ पात्रं न चालयेत्स्थानात् कुर्यान्न जयशङ्करम्॥ सशब्दं न पिबेद्द्रव्यं न थैव न च पूजयेत्॥ उच्छिष्टे न स्पृशेच्चक्रे कु
लद्रव्याणि सुन्दरि॥ बहिः शब्दान्यच्चक्रे कुलद्रव्याणि नापयेत्॥ निष्ठीवनमधोवायुं चक्रमध्ये विवर्जयेत्॥ स्वपात्रस्थितहेतुं च नदद्यादन्यस्य वा
यच॥ दत्ते च सिद्धिहानिः स्यात् क्रुद्धो भवति योगिनी॥ परिहासं प्रलापं च वितण्डं बहुभाषणम्॥ औदास्यं च भयं क्रोधं चक्रमध्ये विवर्जयेत्॥ ७१

नान्योन्यचाइमे पात्रं न पात्रमानयेद्बुधः॥ गुरुशक्तिं सुतं नाथ गुरुज्येष्ठकनिष्ठयोः॥ उच्छिष्टं भक्षयेत्स्त्रीणां ताभ्यो नोच्छिष्टमर्पयेत्॥ चक्रमध्ये च
नियतं मन्मथोपतनं भवेत्॥ कनिष्ठानां स्वशिष्याणां स्यादुच्छिष्टचर्वणम्॥ दम्पत्योस्तेन भन्येभ्यः स भवेदापदास्पदम्॥ अन्यत्रापि॥ शक्त्युच्छि
ष्टं पिबेद्द्रव्यं वीरोच्छिष्टं तु चर्वणम्॥ पीत्वा पीत्वा पुनः पीत्वा यावत्पतति भूतले॥ उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते॥ शान्तिस्तोत्रम्॥
तदुक्तं कुलचूडामणौ॥ पीत्वा स्थायि जनैः सर्वैः शान्तिस्तोत्रं ततः पठेत्॥ नश्यन्तु प्रेतकूष्माण्डा नश्यन्तु दूषका नराः॥ साधकानां शिवाः सन्तु आ
म्नायपरिपालिनाम्॥ जयन्ति मातरः सर्वा जयन्ति योगिनीगणाः॥ जयन्ति सिद्धडाकिन्यो जयन्ति गुरुपङ्क्तयः॥ जयन्ति साधकाः सर्वे विशुद्धाः कौ
लिका नराः॥ समयाचारसम्पन्ना जयन्ति पूजका नराः॥ नन्दन्तु भैरिमा सिद्धा नन्दन्तु कुलपालकाः॥ इन्द्राद्या देवताः सन्तु तृप्यन्तु वास्तुदेवताः॥
चन्द्रसूर्यादयो देवा तृप्यन्तु मम भक्तितः॥ नक्षत्राणि ग्रहा योगाः करणा वासराश्च ये॥ सर्वे ते सुखिनो सर्पा नश्यन्तु पक्षिपसिराः॥ पशवस्तुरगाश्चै
व पर्वताः कन्दरा गुहाः॥ ऋषयो ब्राह्मणाः सर्वे कुर्वन्तु मे सदा शुभम्॥ शुभा मे विदिताः सन्तु मित्राणि सिद्धन्तु पूजकाः॥ ये ये पापधियः सुदूषकाः स्त
मन्दकाः पूजकाः सेवाचारविमर्दनः स्वदयाभयाश्चये साधकाः॥ दृष्ट्वा चक्रमपूर्वमर्चनविधौ ये कालिकादूषकाः ते नैयान्तु विनाशमत्र समये

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कालीतत्व. श्रीभैरवस्याज्ञया॥साधकाना॥ [illegible] ॥ [illegible] ॥ [illegible] ॥इतिस्तुता॥शत्रवोनाशमायान्तुममनिन्दाक
७२ राश्चये॥इहासाधकानाञ्चनेनश्यन्तुशिवाज्ञया॥इतिस्तुति॥देवताग्रेतुसम्भोगेदेवताप्रीणनंभवेत्॥सम्भोगन्तुपरंकृत्वादेवींहृदिसमान
येत्॥कृतकृत्योभवेन्मचीनात्रकार्याविचारणा॥अभिवन्दनमाचर्यअर्घामृतपिवेत्ततः॥न्युब्जीकृत्यस्वकंपात्रंतत्रपुष्पंविनिःक्षिपेत्॥प्र
क्षाल्यगोपयेत्पात्रंतत्वचिन्तापरोभवेत्॥ततस्तदमृतंस्निग्धंभ्रूमोमायावीजंविलिख्यकनिष्ठाङ्गुलिनायंयंस्पृशतिपादेनयंयंपश्यतिचक्षु
षा॥सस्वदेवतांयान्नियदिशाक्रसमोभवेदितिमन्त्रेणतिलकंकृत्वास्वयंयथासुखेनविभवेदिति॥पात्रनिर्माणंयथा॥तदुक्तंकुलसारे॥
नयनाधिवासंरव्यातकौषिसुपरमेश्वरि॥हेतुपानंप्रकर्तव्यमित्युक्तंकुलशासने॥इतोप्यधिकपानन्तुकर्तव्यञ्च साधकैः॥कर्णतौकि
कतोलकमित्यर्थः॥तदुक्तंकुलोड्डीशे॥एकादशमाषस्यात्तदष्टौकर्षउच्यते॥अथपद्धतिः॥विधिवदर्घपात्रादिसंस्थाप्यतद्भैरवपात्रंसं
स्थाप्य॥हेतुनासंपूर्यविधिवत्संशोध्य॥ऐँक्लींसौः‌ब्रह्माण्डरससम्भूतमशेषरससम्भवम्॥आपूरितंमहापात्रंपीयूषरसमावह‌म्॥अखण्डै
करसानन्दकरेवरसुधात्मनि॥स्वच्छन्दस्फुरणामत्रनिधेह्यकुलरूपिणि॥क्लींअकुलस्थामृताकारेसिद्धिज्ञानकरेवरे॥अमृतत्वंनिधेहि० ७२

स्मिन्वस्तुनिक्लींस्वरूपिणि॥सोऽहंरूपेणकरन्तस्यकृत्वास्यैनत्स्वरूपिणि॥भूत्वापरामृताकारंमयिविस्फुरणंकुरु॥इतिमन्त्रंपठित्वातत्रपुष्पाणिः
क्षिपेत्॥विधिवद्देवतांपूजयित्वातत्पात्रञ्चआनन्दभैरवायनिवेद्यचक्राकारेणपंक्त्याकारेणवाभिन्नाभिन्नासनेषुशक्तियोगपक्षयुग्मक्रमे
णपश्चासनेनसाधकानुपविश्यतेषांललाटेचन्दनाक्षतंदत्वाशिवशक्तिवृन्दायपुष्पादिकंनिवेद्यस्वगुरुंचन्दनादिभिःसम्पूज्यतत्पात्रेभरव
रौडकरसाकारपरेपरतरात्मनिस्वच्छन्दस्फुरणामन्त्रनिधेह्यकुलनायिके॥ह्रींश्रींपरमस्वामिनिपरमाकाशशून्यवाहिनिचन्द्रसूर्याग्निभक्षि
णिपात्रंविशस्वाहेतिमन्त्रेणपुष्पन्दत्वाशुद्धिसहितंतस्मैसमर्प्यप्रणमेत्॥गुरोरभावेतत्पात्रजलेनिःक्षिपेत्ततःशक्तिपात्रंसाधकपात्रा
णिज्येष्ठानुक्रमेणवीरपात्रामृतेनसम्पूज्यपूर्वोक्तक्रमेणैकैकंपुष्पन्दत्वातेषामग्रेआधारेषुसंस्थाप्यभक्त्याहस्ताभ्यांसङ्गृहीत्वातदुपरिमू
लमन्त्रमष्टधाप्रजप्यानन्दभैरवानन्दभैरव्यौगुरुंदेवताञ्चसन्तर्प्यस्वस्वकल्पोक्तविधिनातत्वशुद्धिंविधायश्रीमद्भैरवशेखरेत्यादिनाभिवन्द्यवा
महस्तेनमुद्रोत्यपरस्परंचन्दनंकृत्वाग्रहणामीतिशक्तिसाधकेभ्योप्याज्ञांगृहीत्वातैश्चजुषस्वेत्यभ्यनुज्ञातोमूलाधारात्कुण्डलिनीमिष्टदेवतास्व
रूपमाजिह्वान्तंविभाव्यगुरुपादुकांस्मृत्वाशिवोहमितिविचिन्त्यहस्ताभ्यांपात्रंधृत्वामूलमन्त्रमुच्चरन्कुण्डलिनीमुखेनपयेदितितत्तोप्याकांक्षाचे

कालीतत्व. त्तदापात्रमाधारेपरिपूर्वकत्वांस्थाप्यहेमंमीनरसावहमित्यादिनाभिमन्त्र्यपूर्ववत्स्वीकृत्यपुनरप्याकांक्षासत्यांमध्यंमीनरसावहइत्यादिनाभि
७३ न्ययावत्तृप्तिंनिष्पाद्यस्वयमपितथाविधायशान्तिस्तोत्रंतैःसहपठित्वातत्तैर्देवतायैशक्तियोगपक्षेपरानन्दंविधायद्रव्यलिप्तविधौभ्रू
मोमायावीजंविलिख्ययंयमितिमन्त्रेणाकनिष्ठाङ्गुलितिलकंकृत्वाहृदिदेवीसमावाह्यशक्तिसाधकेभ्योयथासम्भवंपुष्पादिकंनिवेद्यप्रणम्य
यामयडङ्न्यासेविधाययथासुखंविहरेदिति॥ ॥इतिश्रीमद्राघवभट्टविरचितेकालीतत्वेशान्तिविधौडनविंशतितत्वम्॥ ॥अथमन्त्रवि
धिरुच्यते॥तदुक्तंकालिकाश्रुतौ॥अथसर्वांविद्यांप्राप्यममेकंद्वयंत्रयंवानामसमुद्धितंवाकृत्वाजपेदितिसस्याशीतिनान्यथ्यःतिष्ठोमसत्यं
तत्सत्॥अगुरुंपरितोष्यगृहीत्वायान्मन्त्रराजंगुरुस्त्वयिशिष्यायसत्कुलिनायविद्याभक्तायसुश्रूषवस्त्रियंस्पृष्ट्वास्वयंपतिपूज्यनिशायांनिरू
वस्काकौशिवगेहेलक्षंतदद्भ्वाजप्यादेयम्॥ॐसत्यंतत्सत्नान्यप्रकारेणसिद्धिर्भवतीहवैकालिकामनोर्वातारामनोर्वातित्रिपुरामनोर्वा
सर्वदुर्गामममनोद्यत्यांशिवंॐतत्सत्इति॥कालीतन्त्रेच॥कालीहृदयविद्याञ्चसिद्धिविद्यांमहोदयाम्॥पुरायेनयथासिद्धिर्नेवाप्नुश्चिदिवौक
सः॥कामाक्षरविन्दुसंस्थमदिरानादविन्दुभिः॥मन्त्रराजमिदंख्यातंदुर्लभंपापचेतसाम्॥सुकृतंसुलभंभक्त्यासाधकानांमहात्मनाम्॥त्रिगुणा ७३

नुविशेषेणसर्वशास्त्रप्रबोधिका॥अनयासदृशीविद्यानहिसारस्वतप्रदा॥ध्यानपूजादिकंसर्वंसाधनञ्चपुरस्क्रिया॥अनिरुद्धसरस्वत्याःसमा
नसर्वं रितम्॥कुलचूडामणावपि॥ब्रह्मासरस्वतीयुक्तोदेवतामुखसंस्थितः॥बीजशक्तिसमायुक्तःकालीमन्त्रउदाहृतम्॥एकंवाद्विगुणंवापि
त्रिगुणंवापिभैरव॥जप्याचाकर्षयस्वैरंस्थावरजङ्गमादिकम्॥स्वविद्यामहाविद्यागुह्याद्गुह्यतरास्मृता॥पूर्ववीजपरंशक्तिवीजेनमूर्तिकल्प
ना॥षट्दीर्घभाजावीजेनकुर्यादङ्गादिकल्पनम्॥ध्यायत्करालस्यदंष्ट्रानीलोत्पलविलोचना॥स्फुरत्कवकरश्रेणीकृतकाञ्चीदिगम्बराम्॥वीरा
सनसमासीनांमहाकालोपरिस्थिताम्॥श्रुतिमूलसमाकीर्णांसृक्कणींचण्डनादिनीम्॥मुण्डमालागलद्रक्तचर्चितांपीवरस्तनीम्॥मदिरामोदि
स्फालकल्पितामखिलमेदिनीम्॥वामेखड्गखण्डमुण्डधारिणीदक्षिणेकरे॥वराभययुतांघोरवक्त्रांलोलजिह्विकाम्॥शङ्कन्नपक्षसंशान्कवा
णाकर्षविस्फूरणाम्॥शिवाभिर्घोररावाभिःसेवितांप्रणयोदिताम्॥चण्डहासचण्डनादचण्डस्फालेश्वभैरवैः॥गृहीत्वानवकंकालजयशब्दप
रायणैः॥सेविताखिलसिद्धौघमुनिभिःसेवितांपराम्॥एवंतांकालिकांध्यात्वापूजयेत्कुलनायकः॥यांविनापरपुरावेणविवरान्तःप्रसर्पणाम्॥
यत्किञ्चित्कुलसिद्धिस्तुजायतेनमनागपि॥सर्वसिद्धिप्रदादेवीहेलयापिहिचिन्तितम्॥नाअनःसारदक्षिणानाम्नीत्रिलोकेप्रगीयते॥विद्यार

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतन्त्र. लंग्रन्थमपि श्रुत्वाकरोत्यवतंशयः॥मायाद्वयंकूर्चयुग्मंभैरवन्त्रमादनत्रयम्॥मायिवीश्वरयुतंदक्षिणेकालिकेपदम्॥संहारक्रमयोगेनवीरसप्रक
७४ मुद्धरेत्॥एकविंशाक्षरोमन्त्रस्ताराद्योविश्वपूजितः॥आकाशंवामकर्णास्युतंबिन्दुविभूषितम्॥चतुर्थंबीजमारव्यातंजैत्नोक्तवशकारणम्॥स्वा
हान्तश्चत्रयोविंशाक्षरोयंमन्त्रराजकः॥स्वाहाविनैकविंशत्य क्षरःकामरोमतः॥विंशत्यर्णामहाविद्यास्वाहाप्रणववर्जिता॥ध्यानपूजादिकंस
र्वंदक्षिणावदुपाचरेत्॥अथवक्ष्यमहाविद्यांसिद्धिविद्यांमहोदयाम्॥ईश्वरेणपुराप्रोक्तादेवीहृस्यसंज्ञिकाम्॥यस्यज्ञानप्रभावेनकलयाति
जगत्त्रयम्॥प्रणवंपूर्वमुच्चार्यहृल्लेखावीजमुद्धरेत्॥रतिवीजंसमुद्धृत्यप्रपञ्चमभगान्वितः॥ठद्वयेनसमायुक्ताविद्यावर्णैःप्रकीर्तिताः॥अन
यासदृशीविद्याकालीतन्त्रेषुदुर्लभा॥भैरवोस्यऋषिःप्रोक्तोविराट्छन्दउदाहृतम्॥सिद्धिकालीब्रह्मरूपादेवताभुवनेश्वरी॥रतिवीजमस्या
हृल्लेखाशक्तिरुच्यते॥हृल्लेखाषड्दीर्घकेणप्रणवाद्येनकल्पयेत्॥अङ्गंषट्कंततोन्यस्यध्यात्वादेवींशिवोभवेत्॥खड्गोमिन्दुचिंवक्षरदम्
नरसाप्लावितांगींत्रिनेत्रांसव्येपाणौकपालाकुलमृतमथोमुक्तकेशींपिबन्ती॥दिग्वस्त्रांवद्धकाञ्चीमणिमययमुकुटाद्यैर्युतादीप्तजिह्वांपा
यानीलोत्पलाभारविशशिविलसत्कुण्डलालीढपादा॥जपेदिदंशनिसाहस्र्यंसहस्रकेणसंयुतम्॥होमयेत्तुदशांशेनमृदुपुष्पेणमन्त्रवित्॥ ७४

त्रिकोणाकुण्डंसामान्यसिद्धिविद्यःशिवोभवेत्॥पूजनञ्चप्रयोगश्चदक्षिणावदुपाचरेत्॥एकाक्षर्यामिहाकल्पसमानंसर्वमेववा॥स्वतन्त्रेपि॥
श्मशानकालिकामन्त्रंश्रृणुष्वावहितासिवे॥वाणीमायान्ततोलक्ष्मीकामवीजन्ततःपरम्॥कालिकेसंपुटत्वेनचतुर्थंवीजमालिखेत्॥एकादशा
र्णोदेवोयंचतुर्वर्गप्रदायिनी॥ऋषिर्भृगुर्निचृच्छन्दःस्यादेवताकालिकास्मृता॥श्मशानाद्याचवाग्वायेवीजशक्तिमहेश्वरी॥कीलकंकामवीजन्तुश्रृ
णुपूजाविधिप्रिये॥चतुर्थिश्चतुर्वर्णास्तुविद्यामन्त्रैःषडङ्गकम्॥विन्यस्यध्यानंकुर्वीतकालिकायाःसमाहितः॥अञ्जनाद्रिनिभांदेवींश्मशानतलवा
सिनीम्॥त्रिनेत्रांमुक्तकेशीञ्चशुष्कमांसातिभीषणाम्॥पिङ्गाक्षींवामहस्तेनमद्यपूर्णकपालकम्॥सद्यःकृत्यशिरोदक्षहस्तेनदधतींशिवाः॥स्मि
तवक्त्रांसदाचासमांसचर्वणतत्परम्॥नानालङ्कारभूषाङ्गीनग्नांमत्तांसदासवैः॥स्वध्यात्वायजेदेवींश्मशानेतुविशेषतः॥गृहेवापिगृहस्थश्चमत्स्य
मांसैःसुभोजनैः॥नग्नोभूत्वामहापूजाकुर्याद्भक्त्योसमाहितः॥पञ्चमास्वदलंवृत्तंनद्धावधरणीतलम्॥चतुर्द्वारंसमायुक्तंसन्ध्यमूलंसमालिखेत्॥
दलेष्वष्टसुविलिखेत्कवर्गाद्यष्टवर्गकः॥धरण्यांविलिखेदाद्यंचतुष्कञ्चचतुष्ककम्॥पूर्वादिउत्तरान्याञ्चमध्येदेवींप्रपूजयेत्॥ब्रह्माण्याद्यायजे
न्मातृःकलाष्टकमुपूर्वतः॥भैरवानसिताङ्गाद्यान्धरण्यांपूजयेत्प्रिये॥असिताङ्गंरुरुंचण्डंक्रोधमुन्मत्तभैरवम्॥कपालीभीषणाश्चैवसंहारंचाष्टमं

कालीतन्त्र. यजेदिति॥चतुर्लक्षंजपेन्मन्त्रंतद्दशांशेनहोमयेत्॥अथमन्त्रान्तरे॥कामवीजसमालिख्यकालिकायैपदंवरे॥नमोन्तेनचदेवेशिसप्तार्णोमन्त्रउ
७५ त्तमः॥सर्वाङ्गंकालिकादेवीअन्यत्सर्वन्तुपूर्ववत्॥श्रीगुरोःकृपयालब्ध्वासर्वसिद्धिमवाप्नुयादिति॥अथपञ्चदशी॥तदुक्तंतन्त्रैव॥कामवीजत्रय
न्त्वाकूर्चयुग्मंततोलिखेत्॥लज्जायुग्मंसमाभाष्यसंवोधनद्वयन्ततः॥पश्चाद्वह्निप्रियायोज्याविद्यापञ्चदशाक्षरी॥पूजनञ्चप्रयोगश्चदक्षिणाव
दुपाचरेत्॥वर्णाद्यंवह्निसंयुक्तंविधुरतिविलितंतत्त्रयंकूर्चयुग्मंलज्जायुग्मञ्चपश्चात्स्मितमुखतदधस्तद्वयंयोयिता॥मातर्येयेजपन्तिस्मरहरसं
हितभावयन्तंस्वरूपंतलक्ष्मीलास्यलीलाकमलदलदृशःकामरूपाभवन्ति॥अनयासदृशीविद्यानभूतोनभविष्यति॥यामासाद्यशिवोब्रह्मावि
ष्णवाद्युपेयुषइति॥कुलोड्डीशतन्त्रोक्तशापस्तुद्वाविंशत्यक्षरीपरोक्तये॥अन्यत्रप्रमाणाभावात्॥तदुक्तंसिद्धविद्याप्रदीपे॥द्वाविंशत्यंपरीविद्या
क्षिप्रसिद्धिप्रदायतः॥तेनवि महेशेनसम्वादहरणमयोः॥महाविद्यापुटीकारःप्रवोधायप्रकल्पयेत्॥स्वंगुरुप्रसादेनसिद्धिर्भवतिभैरवि॥
॥ ॥इतिश्रीमद्राघवभट्टविरचितेकालीतन्त्रेमन्त्रभेदकथनंनामविंशतितमंतन्त्रम्॥ ॥अथविद्यामाहात्म्यम्॥एवंसमस्तविद्यानांराज्ञीसो
तुंनशक्यते॥वक्त्रकोटिसहस्रस्तुजिह्वाकोटिशतैरपि॥सर्वसिद्धिप्रदादेवीअनिरुद्धसरस्वती॥तस्मादस्याज्ञानमात्राप्तिद्धयःसंभवन्तिहि॥अ ७५

निरुद्धसरस्वत्याज्ञानमात्रेणसाधकः॥पाण्डित्येचकवित्वेचवागीशसमनस्यंमुग्रतानिश्चितम्॥भैरवउवाच॥चतुर्थाश्रमिणान्देविमोक्षदातं
सदाकथम्॥कुलभावविरोधित्वात्संशयंममदूरयः॥देव्युवाच॥मोक्षद्वारञ्चवहुलंयद्यस्तिकुलभैरव॥केवलंकुलयोगेनप्रसीदामिनसंशयः
चतुर्थाश्रमिणान्देवअवधूताश्रमोमहान्॥अत्राहंकुलयोगेनप्रसीदामिनसंशयः॥यदिनस्यात्तथावत्सश्रृणुतत्कथयामितेज्ञानाभावेसमु
त्पन्नेसम्प्राप्यचतदाज्ञया॥तदायोगीविमुक्तःस्यात्तांप्रपूज्यकुलान्तरे॥कुण्डलीशक्तिविवरेतदायोगंसमभ्यसेत्॥निर्द्वन्द्वोनिरहङ्कारःशुद्धनाः
